काशीविद्यासुधानिधिः

श्रीगणेशाय नमः ।

श्रीमद्विजयिनीदेवीपाठशालादयोदितः ।
प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्करश्मिः स्फुटयतु काशीविद्यासुधानिधिः
प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

THE PANDIT.

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE

DEVOTED TO

SANSKRIT LITERATURE

NEW SERIES.

Nos. 1-3] January-March, [1917.

Vol. XXXIX.

KĀRIKĀVALĪ AND MUKTĀVALĪ.

* श्री श्री गुरुदेवो विजयतेतराम् *

**चूड़ामणीकृतविधुर्वलयीकृतवासुकिः ।
भवो भवतु भव्याय लीलाताण्डवपण्डितः ॥**

चूड़ामणीकृतविधुः—अचूड़ामणिः चूड़ामणिवत् सम्पद्यमान इति चूड़ामणीकृतः (अभूततद्भावे च्वि), that which is turned into a चूड़ामणि not being a चूड़ामणि in itself; चूड़ामणीकृतो विधुर्येन सः, he by whom the moon is used as a jewel to ornament his head.

वलयीकृतवासुकिः—अवलयं वलयं सम्पद्यते इति वलयीकृतः, that which, not being a वलय, is used or treated as a वलय; वलयीकृतो वासुकिर्येन सः, he by whom वासुकि the king of serpents is used as a bracelet.

लीलाताण्डवपण्डितः—लीलया ताण्डवं, dancing with ease or grace; तत्र (तस्मिन्) पण्डितः, skillful in that.

भवः- lit. the source (of all beings), the God S'iva.

भव्याय भवतु—be for prosperity.

May the God S'iva, by whom the moon has been used as a jewel to ornament his head, and Vāsuki the King of serpents as a bracelet, prosper my undertaking.

Taking the words of the stanza in the order in which they stand, it may be objected that in it there is समाप्तपुनरात्तत्वं काव्यदोषः, which consists in going back to a substantive, whose आकांक्षा has been satisfied by the verb in the predicate, for the purpose of joining to it an adjective for which it has no natural आकांक्षा.

What is this आकांक्षा? It is the expectation which the utterance of a word raises in the mind of the hearer for some other word or words, to make the sense

complete. The power in a word to raise this expectation is also called आकांक्षा. In Grammar, this power in the words, is known as व्यपेक्षा. It is by this power, that several words are united into one whole called a sentence. This आकांक्षा is real and necessary, where it is natural. A*कारक, for instance, naturally raises the आकांक्षा for a verb; a word indicating some relationship, for the correlative; a word or phrase indicating some phenomenon due to some cause or reason, for some word or words indicatng the how or the why; an adjective for a substantive; an adverb, for a verb; and so on. But a substantive never gives rise to an expectation for an adjective. Hence in a natural sentence the adjective always precedes the substantive. Thus in the sentence under consideration, the adjectives चुड़ामणीकृतविधुः and वलयीकृतवासुकिः occupy their natural and proper places; but लीलाताण्डवपण्डितः, which comes after the substantive which it is meant to qualify, and even after the verb which has already satisfied all आकांक्षा raised by the substantive, occupies a place entirely beyond the limit of natural आकांक्षा, and thus compels us to go back to the substantive, for raising an artificial आकांक्षा for it, by the question कथंभूतो भवः, in order to make room for the adjective, as an answer to this question.

The *एकदेशी proposes to avoid the दोष by taking

---

* A noun or pronoun in a particular case-ending, standing in relation to a verb, is called a कारक. The word literally means "a cause." The action indicated by a verb is an effect produced by many causes, each of which, according to the nature of its relation to the effect, is differently named as कर्ता, कर्म etc.

* This term in Philosophy means one who gives an imperfect answer to a question, taking into consideration only one side of it.

लीलाताण्डवपण्डित: as the substantive, and भव:, चूड़ामणीकृतविधु:, and वलयीकृतवासुकि: as its adjuncts. But दिनकरी denies the existence of the दोष, and the necessity of explaining it. For, the adjectives चूड़ामणीकृतविधुः and वलयीकृतवासुकिः naturally give rise to the questions किमिति विधोश्चूड़ामणीकरणं, किमर्थं वा वासुकेर्वलयीकरणं, and thus to the आकांक्षा for the reason why, which is supplied by लीलाताण्डवपण्डितः ।

निजनिर्म्मितकारिकावली-
मतिसंक्षिप्तचिरन्तनोक्तिभिः ।
विशदीकरवाणि कौतुकान्ननु
राजीवदयावशंवदः ॥

The author invites the attention of his disciples to what he is going to do, by this stanza.

निजनिर्म्मितकारिकावलीम्—निजेन निर्म्मिता या कारिकावली ताम्. The कारिकावली which was composed by myself.

अतिसंक्षिप्तचिरन्तनोक्तिभिः—अति संक्षेपा यासु ताः, those in which there is great brevity (of words); चिरन्तनानाम् उक्तयः, the sayings or arguments of the ancients, such as कणाद्.etc.; अति संक्षिप्ताश्चिरन्तनोक्तयस्ताभिः, employing in an abbreviated form the sayings or arguments of the ancients, such as कणाद् etc.

विशदीकरवाणि—अविशदं विशदं करवाणि, I elucidate (the Kārikāvalí which needs elucidation).

कौतुकात्—with ease, as if in sport; ननु, indeed [goes with कौतुकात्], *i. e.* कौतुकादेव, without feeling any thing like the labour of a serious undertaking.

राजीवदयावशंवदः—*राजीवे या दया, kindness to the begin-

---

* Some suppose that राजीव was the name of the author's grandson, for whose benefit he undertook to explain the Kārikāvalī.

ner, तया वशंवदः, being under the influence of that, *i. e.* out of kindness to the beginner

It is just out of kindness to the beginner, and in mere sport, that I undertake to explain the Kārikāvalí composed by me ; in the elucidations I employ the arguments of the ancient sages, such as Kaṇáda etc., although in an abbreviated form.

सद्रव्या गुणगुम्फिता सुकृतिनां सत्कर्म्मणां ज्ञापिका
सत्सामान्यविशेषनित्यमिलिताभावप्रकर्षोज्ज्वला ॥
विष्णोर्वक्षसि विश्वनाथकृतिना सिद्धान्तमुक्तावली ।
विन्यस्ता मनसो मुदं वितनुतां सद्युक्तिरेषा चिरम् ।

सद्रव्या—द्रव्यैः सहिता *i. e.* प्रतिपादकतया द्रव्यैर्युक्ता, having Dravyas or substances for a subject for treatment.

गुणगुम्फिता—गुणैर्गुम्फिता *i.e.* प्रतिपादकतया गुणैर्युक्ता, having Guṇas or qualities for its subject matter.

सत्कर्म्मणां ज्ञापिका-सताम् *i. e.* उत्क्षेपणादीनां कर्म्मणां ज्ञापिका, treating of the different kinds of Karma or activity, as throwing up &c.

सत्सामान्यविशेषनित्यमिलिता—*सत् *i. e.* जातिरूपं, सामान्यं,

---

* सामान्य, a property common to many individuals, is of two kinds, जाति and उपाधि; as the author treats of the former kind of सामान्य alone, the term सत्सामान्य is employed to mean the only kind of सामान्य (*i. e.* जातिरूपसामान्य) existing (*i. e.* treated of) in this book. Hence सत् is explained as जातिरूपं here. But this explanation of the word सत् is a far-fetched one, and as the author, in the text सामान्यं सविशेषकं &c., uses the term सामान्य as synonymous with जाति, and has no qualifying word there to indicate that he wishes it to be understood as distinct from the other kind of सामान्य (उपाधि) refered to here, a commentator

विशेषाः, नित्यः *i. e.* समवायः, तैर्मिलिता *i. e.* प्रतिपादकतया युक्ता, with generic or specific property, *i. e.* the property which constitutes a genus or a species, principles of ultimate difference, and indestructible relation, as its subject matter; or सन्ति सामान्यविशेषनित्यमिलितानि यस्यां सा, that in which there are, the generic or specific property, principles of ultimate difference, and the indestructible relation, as some of the subjects treated of. नित्यमिलितं is taken in this second explanation as नित्यसंबन्धः *i. e.* समवायः or indestructible relation.

अभावप्रकर्षोज्ज्वला—अभावस्य प्रकर्षः, *i. e.* प्रागभावादिभेदेन वैलक्षण्यं, तस्य उज्ज्वला *i. e.* प्रकाशिका, explaining अभाव or non-existence of all the different kinds, such as प्रागभाव or non-existence before coming into being &c.

एषा—*i. e.* बुद्धिस्था, as yet existing in my mind. (Observe that the word एषा "this," is always used to point out something near at hand, and as the Siddhānta Muktāvalī has not yet been composed, it can only refer to it as existing in the author's mind, and as just going to be produced).

सिद्धान्तमुक्तावली—सिद्धान्ता एव मुक्तास्तासामावली, a string of pearls, the pearls of which are the conclusions or decisions of philosophical inquiries.

विश्वनाथकृतिना—by the author, Viśwanātha.

विष्णोर्वक्षसि विन्यस्ता—offered as an ornament to adorn the breast of the God Vishṇu.

---

cannot be justified to take सामान्य in this context in its general sense, and then particularise it with सत् taken in this far-fetched and therefore questionable sense of जातिरूपं Hence the latter explanation सन्ति &c., in which सामान्य is taken in the sense of जाति, (in which sense the author everywhere uses it.

सुकृतिनां—पण्डितानां, of the learned.

वितनुतां—lit. may it spread or increase.

सद्युक्तिः-(an adjunct of सिद्धान्तमुक्तावली). सत्यः युक्तयो यस्यां, that in which there are arguments, *i. e.* that which is supported by reasoning. This word is intended to perform the function of a sentence by itself, meaning 'for, it is supported by reasoning," in answer to the question, "How can it give pleasure to the learned?"

May Siddhānta Muktāvalī, having Dravya, Guṇa &c. for its subject matter, and offered to the God Vishṇu by its author, please the learned, for it is supported by reasoning.

The resemblance of सिद्धान्तमुक्तावली to मुक्तावली (a string of pearls), implied by the author's offering it as an ornament to adorn the breast of Vishṇu, is further indicated by the adjectives सद्रव्या &c., which in the case of a string of pearls may be explained thus :—

सद्रव्या— साध्यतया द्रव्यवती *i. e* द्रव्यसाध्या, requiring money to purchase it with, valuable.

गुणगुम्फिता—गुणेन सूत्रेण गुम्फिता निर्म्मिता, put together or strung by means of a thread.

सुकृतिनां—पुण्यवतां, of the virtuous (to be read in this case with सत्कर्म्मणां).

सत्कर्म्मणां ज्ञापिका—सन्ति *i. e.* समीचीनानि (भगवद्भजनादिरूपाणि) कर्म्माणि (पूर्वजन्मकृतानि) तेषां ज्ञापिका, indicative of good deeds (done in a previous life, whose merits qualify the doer to possess such valuable things in this life).

सत्सामान्यविशेषानित्यामिलिता—सत्सामान्यं *i. e.* समीचीना जातिः, good kind; विशेषः *i. e.* महत्वानिर्मलत्वादि, excellence consisting in bigness, purity &c, ताभ्यां मिलिता—possessing these qualities.

अभावप्रकर्षोज्ज्वला-अभावे *i. e.* तेजोऽभावेऽन्धकारे प्रकर्षेण

उज्ज्वला *i. e.* प्रकाशिका, emitting a lustre bright enough to make things visible, where there is no light.

The object of this Sloka is four fold :—

1. to state the (a) विषय or subject treated, (b) प्रयोजन or necessity of writing the treatise, (c) सम्बन्ध, or the relation between the subject matter and the treatise, and (d) अधिकारी, or the person qualified to read it;

2. to remove any doubts as to the completeness of the treatise, that might arise from words like अति संक्षिप्त &c. in the preceding Śloka. This is done, by presenting at length the list of the subjects treated of, and by indicating the method of treatment, by the word सद्युक्ति :;

3. to make an offering of it to God in accordance with the sacred precept of Krishṇa:—

यत्करोषि यदश्नासि तज्जुहोषि ददासि यत्।
यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम्॥

4. to give the name of the treatise and its author, for the sake of fame.

Observe with regard to No. 1., that the विषय's are stated by name; the प्रयोजन is to be inferred to be पदार्थतत्त्वावधारण, or finding out, the true nature of, or truth about पदार्थ's or categories, as a matter of course; the सम्बन्ध is implied to be प्रतिपाद्यप्रतिपादकभाव, the relation between things established or made definitely known, and the establisher or that which makes them definitely known, by the compounds सद्रव्या &c., which have to be explained as प्रतिपादकतया द्रव्यवती &c., and by the adjunct सद्युक्तिः. Thus the two ideas put together mean that there is in this book, युक्त्या प्रतिपादकता or the virtue of making things definitely known by means of reasoning, or in other words, there is विशेषतः प्रति

पादकता, which consists in making things known by उद्देश or naming, लक्षण or defining, and परीक्षा or examining, as distinct from सामान्यत: प्रतिपादकता which consists in naming (उद्देश) alone. Thus the सम्बन्ध here practically indicates the method of treatment.

The qualified reader is left to be inferred to be the person desiring definite knowledge of things.

विघ्नविघाताय कृतं मंगलं
शिष्य शिक्षायै निबध्नाति नूतनेति ॥

विघ्नविघाताय—विघ्नानां विघातस्तस्मै, for the destruction or removal of obstacles.

मंगलं—an auspicious action, such as a prayer, benediction &c, done when one is going to begin an undertaking.

शिष्यशिक्षायै-शिष्याणां शिक्षा तस्यै, for teaching or setting an example to the disciples, शिष्या अप्येवं कुर्युरित्यभिप्रायेणेत्यर्थः, *i. e.* with the object that the disciples also will do so (when they begin any undertaking); निबध्नाति-he (the author) writes (the मंगल) in the form of the S'loka नूतन &c.).

The author puts here the Mangala already done mentally, in the form of the S'loka नूतन *&c., to set an example to his disciples.*

ननु मंगलं न विघ्नध्वंसं प्रति
न वा समाप्तिं प्रति कारणम् ॥

ननु-इति शंकायां—It is very difficult to translate this word here. This use of the word to head an objection or a contrary proposition, is very frequent in a book like the Siddhānta Muktāvalī, full of argumentative

वात् । न च तेजश्चाक्षुषसाक्षात्कारस्य तथाभूतालोकसम्बन्धस्य व्यभिचारात्(१) न क्वचिदपि व्यतिरेकसिद्धिरित्याद्यूह्यम् । प्रमाणबलात्तेजोऽव्य-

भावः ॥ ननु चतुरणुकेपि जालस्थसौरालोकसंस्कार्यत्वमुक्तप्रायमित्याशङ्क्याह ॥ न चेति ॥ व्यभिचारोत्र व्यतिरेकः ॥ अयमाशयः । तेजश्चाक्षुषसाक्षात्कारालोकसंयोगयोः कार्यकारणभावसिद्धौ तथा कल्पना स्यात्तत्सिद्धिश्च नियतान्वयव्यतिरेकाभ्यां । तदेतरसकलकारणसमवधाने आलोकसमवधाने घटचाक्षुषसाक्षात्कारोत्पत्तिस्तदसमवधाने नेतिवत् इतरकारणसमवधानेप्यालोकसमवधानापराधेन तेजश्चाक्षुषसाक्षात्कारस्य क्वचिद्व्यतिरेकसिद्धिरस्ति येन स तयोः कल्प्येत । सति विषयभूते तेजसि तदवयवसौरादितेजसामावश्यकत्वात् असति तस्मिंस्तद्व्यतिरेकादेव साक्षात्कारव्यतिरेकोपपत्तौ व्यञ्जकालोकव्यतिरेकस्याकिञ्चित्करत्वात् इति ॥ यद्वा द्रव्यत्ववाद्यभिमते पूर्वान्वयव्यतिरेकिणि तेजस्येव व्यभिचारादित्यारभ्य संयोगाभावादित्यन्तेनान्वयव्याप्तिं निरस्य व्यतिरेकव्याप्तिं निरस्यति ॥ न चेत्यादिना ॥ यद्द्रव्यं तन्न बाह्यालोकासहकृतचक्षुर्ग्राह्यमिति नियतव्यतिरेकसिद्धिः क्वचिदपि न तेजश्चतुरणुकचाक्षुषसाक्षात्कारस्य तथाभूतालोकसंबन्धव्यभिचारात् । तथाभूतालोकजन्यभिन्नचाक्षुषसाक्षात्कारविषये चतुरणुक एव नियमभङ्गादि-

(१) लोकसम्बन्धव्यतिरेकादिति. पा० २ पु० ।

तिरिक्तत्वेन विशेषणीयमिति यदि तर्हि तमोव्यतिरेकेण(१) प्रमाणबलादेव विशेष्यताम्। प्रत्युतैतस्य बाह्यालोकव्यतिरेकसहकृतचक्षुर्ग्राह्यत्वावधारणबलेन पृथिव्यादेर्बाह्यालोकसापेक्षच-

त्यर्थः। नच सौरालोकसंस्कार्यतोक्तेर्न व्यभिचारः। अनारब्धमहासौरालोके तत्त्वतुरणुके तत्संस्कार्यतानुपपत्तेरिति भावः। ननु हेतौ तेजोव्यतिरिक्तत्वे सतीति विशेषणात्तेजोव्यतिरिक्तद्रव्यभेदस्य साध्यत्वाद्वा न व्यभिचार इत्यत आह॥ प्रमाणबलादिति। तेजोद्रव्यत्वसाधकप्रमाणबलादित्यर्थः। तर्हि तेजोद्रव्यत्वसाधकप्रमाणबलात्तमोव्यतिरेकेणापि हेतुसाध्ययोरन्यतरद्विशेष्यतां तथा च स्वरूपासिद्धिसिद्धसाधनाभ्यं तन्निरासाय विशेषणत्यागे च व्याप्यत्वासिद्ध्या नाद्रव्यत्वसिद्धिरित्याह॥ तर्हीति॥ किञ्च पृथिवीजलवैधर्म्येण बाह्यालोकानपेक्षचक्षुर्ग्राह्यत्वेन तमसो द्रव्यत्वसाधने तेजसानैकान्त्यविरोधयोरन्यतरदावश्यकं तेजोवैधर्म्येण तत्सापेक्षचक्षुर्ग्राह्यत्वेन पृथिवीजलयोरद्रव्यत्वसाधने तु न किञ्चिद्दूषणमिति तदेव साधयितुमुचितमित्याह॥ प्रत्युतेति॥ नन्वत्रापि गन्धस्नेहाश्रयद्रव्यान्तरकल्पनाप्रसंगो बाधक इत्यत आह। इन्द्रियेति। न च चक्षुरुन्मीलनान्वयव्यतिरेकानुविधानानुपपत्तिस्तमोग्रहस्य चक्षुःश्रवःश्रोत्रवत्तामसेन्द्रियस्य चक्षुर्गोलकाधिष्ठानत्वात्॥ न च तद्व्यवस्थापकगुणाभावादसि-

(१) व्यतिरेकेणापीति पा० २ पु०।

तु तेजसि न व्यभिचारः । तत्राप्यवयविनो ग्रहेऽवयवस्यावयवावयवस्यावयव्यन्तरस्य वा विषयसंस्कारक(१)तेजसो विद्यमानत्वात् । न च तैजसत्रसरेणुस्थले नैवं सम्भवतीति वाच्यम् । तस्य जालस्थसौरालोकसंस्कार्यत्वात् । न च संयोगेन बाह्यालोकस्य संस्कारकत्वं संयोगत्वस्यातन्त्रत्वात्(२) । तस्माच्चाक्षुषभावसाक्षात्कारमात्र एव बाह्यालोकापेक्षेत्याहुः । तन्न(३)

त्यर्थः । तत्रापि तदपेक्षायामनवस्थया नियमासिद्धिरिति भावः ॥ एकदेशिसमाधिन्दूषयितुमनुवदति ॥ अन्ये त्विति ॥ अवयविनोवयवान्तरस्य वा विषयसंस्कारकस्य विद्यमानत्वादिति योजना(४) ॥ ननु तेजस्त्रसरेणुग्रहेवयवानामतीन्द्रियतयाऽसंस्कारकत्वात्तत्र व्यभिचार इत्याशङ्क्याह ॥ न चेति ॥ न हि सर्वतो विततान्धकारे केवलतेजस्त्रसरेणुग्रहः संप्रतिपन्नः बहुलालोके तु तदवयवानामसंस्कारकत्वेपि न क्षतिरित्याह ॥ तस्येति ॥ संयोगत्वस्येति । सामान्ये बाधके सत्येव नियमस्य विशेषनिष्ठत्वकल्पनादिति भावः । बाह्यालोकस्य विषयसंस्कारकत्वे संयोगित्वमेव तन्त्रं इत्याशयेन दूषयति-

(१) अवयविनो ग्रहेऽवयवस्य अवयवस्य ग्रहेऽवयविनोऽवयवान्तरस्य वा विषयसंस्कारकस्येति पा० २ पु० ।

(२) संयोगस्यातन्त्रत्वादिति पा० २ पु० ।

(३) तन्नेत्यनन्तरं तथाहि इति पाठो विशेषः २ पु० ।

(४) अवयविनो ग्रहेऽवयवस्यावयवस्य ग्रहेऽवयविनोऽवयवान्तरस्य वा विषयसंस्कारकस्येति पा० २ पु० ।

अन्वयव्यतिरेकाभ्यां घटादिचाक्षुषसाक्षात्कारे बाह्यालोकसम्बन्धस्य कारणता गृह्यते । सा च न सम्बन्धिसम्बन्धत्वेन परम्परासम्बन्धेऽपि कार्योदयप्रसङ्गात् । नापि संयोगसमवायसाधारणसाक्षात्सम्बन्धत्वेन तस्यैवानिर्वचनात् तन्निर्वचनेऽपि वा तदपेक्षया संयोगत्वस्य लघुत्वात् । तथा च संयोगत्वमेव तन्त्रम् । न च तेजोग्रहेपि बाह्यालोकसंयोगापेक्षैव चक्षुषः । महालोकस्यावयवावयवसंयोगसम्भवेपि तेजश्चतुरणुके तदवयवावयवसंयोगस्यायोग्यत्वेन तथाभूतसंयोगाभा-

---

तन्नेति ॥ अन्वयेति ॥ सत्यपि चक्षुःसन्निकर्षेन्धकारस्थघटादेः साक्षात्कारानुपपत्तेस्तत्रैव दीपादिसमवधाने सत्युत्पत्तेरित्येवंरूपाभ्यामित्यर्थः ॥ संयोगतन्त्रतां व्यवस्थापयिष्यन्परिशिनष्टि सा चेति ॥ परम्परेति । अन्धकारवद्गृहान्तर्वर्तिभित्तिभागसन्निकृष्टस्य घटादेर्बहिर्भित्तिभागसन्निकृष्टदीपादपि साक्षात्कारापत्तेरित्यर्थः ॥ तस्यैवेति ॥ उभयानुगतस्य साक्षात्सम्बन्धत्वस्येत्यर्थः । ननु संयोगसमवायान्यतरत्वेन तन्निर्वचनं सुशकमेवेत्यत आह ॥ तन्निर्वचनेपीति ॥ लघुत्वादिति ॥ संयोगत्वस्य जातित्वेनाखण्डत्वादित्यर्थः ॥ ननु संयोगतन्त्रतायामपि न तेजसि व्यभिचारः तदवयवावयवपरम्परासंयोगसम्भवादित्याशङ्क्याह ॥ न च तेजोग्रह इति ॥ तथाभूतेति ॥ योग्यप्रतियोगिकेत्यर्थः । अन्वयव्यतिरेकाभ्यां तस्यैव तत्र हेतुत्वावधारणादिति

वह्नीरसत्वमेव वाङ्गीक्रियतां । तेजोऽभावत्वे तु कथं गत्यादिप्रत्ययः । अभावत्वेनोपस्थिते भावधर्मारोपासम्भवात् । (अन्यथा तदनुपस्थिते भावधर्मारोपासम्भवात्)(१) । न च स्वाभाविकगतेरन्यगत्यनुविधानानुपपत्तिः । आश्रयचलनानुविधानस्य पद्मरागप्रभायामेव दर्शनात् । किंच तेजोत्यन्ताभावरूपत्वे तमसि उत्पन्नव्यवहारो न स्यात् । प्रागभावरूपत्वेपि तथा । ध्वंसत्वेपि विना-

परपक्षे बाधकमाह । तेजोभावत्वे त्विति ॥ भावधर्माणां तेषामभावे प्रमासम्भव इत्यर्थः । नन्वारोपः सम्भवेदित्याशङ्क्य किमभावत्वोपस्थापकसामग्रीसमवधाने गतिभ्रमः तदसमवधाने वेति विकल्प्याद्ये दूषणमाह ॥ अभावत्वेनेति ॥ उपस्थिते उपतिष्ठमान इत्यर्थः । विशेष्यभानस्यारोपाहेतुत्वात् । यद्भानं यत्र प्रतिबन्धकं तत्सामग्र्या अपि तत्र प्रतिबन्धकत्वादिति भावः । द्वितीय आह अन्यथेति ॥ गतिप्रतीतिकाले आलोकाभावार्थकतमःपदोल्लेखादभावत्वान्येन रूपेणानुपस्थितेरवश्यन्तदुपस्थापकसामग्रीसमवधानं पूर्वं वाच्यमिति तेन प्रतिबन्धान्नारोपसम्भव इत्यर्थः ॥ ननु दोषमाहात्म्यादिना सत्यपि विशेषदर्शनेऽत्रारोपोऽभ्युपेयः अन्यथा गतेरन्यगत्यनुविधानानुपपत्तेरित्यत आह ॥ न च स्वाभाविकेति ॥ पद्मरागेति ॥ स्वाभाविकगतेरित्यनुषज्य-

(१) चिह्नस्थपाठः प्रथमपुस्तके नास्ति ।

शित्वं न स्यात्(१)। अन्योन्याभावेपि तथा। अपि च तमसि नीलसाक्षात्कारस्य भ्रान्तत्वे अनीलन्तम इति विपरीतसाक्षात्कारोपि स्यात्। न चायं कदाचिदपि कस्यापि भवति। प्रत्युत योगिनोपि नीलप्रत्यय एव तत्रोन्नीयते। नीलत्वेनाप्रतीयमाने तस्मिन् तमोव्यवहारो न स्यात्। नात्रालोकः किं पुनरन्धकार इति व्यवहाराच्चालोकाभावातिरिक्त एवायमन्धकार इति पूर्वपक्षः॥

ते। विकल्पानुपपन्नमपि तस्याभावत्वमित्याह। किञ्चेति॥ उत्पन्नादीति आदिपदेन ध्वस्तत्वोपग्रहः॥ भ्रमत्वव्यापकविपरीतसाक्षात्काराभावान्नीलसाक्षात्कारो न भ्रम इत्याह। अपि चेति। ननु भ्रमकाले विपरीतसाक्षात्काराभावेपि तद्दर्शनान्न तद्व्यापकत्वं तस्येत्यत आह॥ न चायं कदाचिदपीति॥ नन्वस्त्येव योगिनामनीलप्रत्यय इत्याह॥ प्रत्युतेति॥ सिद्धे भ्रमत्वे विशेषदर्शित्वाद्योगिनां विपरीतप्रत्ययकल्पनं तस्माच्च भ्रमत्वसिद्धिरित्यन्योन्याश्रयादिति भावः। नन्वस्माकमेवास्त्यनीलप्रत्ययस्तमसि आत्मन्यालोकाभावात्मकतमःप्रतीतेर्नीलोल्लेखित्वाभावादित्यत आह॥ नीलत्वेनेति॥ सहप्रयोगानुपपत्त्यापि नालोकाभावस्तम इत्याह नात्रालोक इति॥

(१) ध्वंसत्वे विनाशितत्वं नेति पा० २ पु०।

क्षुर्ग्राह्यत्वात् भावत्वं त्यज्यताम् । इन्द्रियान्तरमेव वा तमोग्राहकमस्तु । अत एव तामसादिन्द्रियाद्न्धतमसेऽपि पेचकादीनां तत्तद्वस्तुग्रहः ॥

स्यादेतत् तमः किं नित्यमनित्यं वा ? आद्ये रूपवतो नित्यस्याचाक्षुषत्वप्रसङ्गः । द्वितीये त्वारभ्यं स्यात् । न च निःस्पर्शद्रव्यस्या(१)रम्भकत्वं द्रव्यसमवायिकारणतायां स्पर्शवद्द्रव्यस्य प्रयोजकत्वात् । न च मूर्तत्वमेव तत्र प्रयोजकं मनसोऽप्यारम्भकत्वप्रसङ्गात् । एतदपि न । रूप-

द्धिः । गुणत्वस्य व्यवस्थापकतायामतन्त्रत्वादिन्द्रियान्तराग्राह्यग्रहणमात्रस्य प्रकृतेऽपि सत्वादिति भावः । विपक्षबाधकत्वेन तस्योपयोगान्तरमाह ॥ अत एवेति ॥ आलोकाभावे चक्षुषस्तत्रासामर्थ्यात् इति भावः ॥ न च दिवापि तेषां तद्ग्रहापत्तिः । आलोकस्यैव तमसस्तत्र सहकारित्वात् ।

रूपवत्वहेतोरसिद्धिं शङ्कते ॥ स्यादेतदिति ॥ अचाक्षुषत्वप्रसङ्गादिति । परमाणोरिवेति शेषः । द्वितीये रूपवतोऽनित्यत्वे । आरभ्यमिति । द्रव्यमिति शेषः । अस्तु स्वावयवारब्धन्तम इति आशङ्क्य तेषां स्पर्शवत्वे तदारब्धद्रव्ये तमस्यपि स्पर्शवत्वमित्यभिप्रेत्य निःस्पर्शवत्वे बाधकमाह । न च निःस्पर्शेति । द्रव्यसमवायिकारणत्वं न निःस्पर्शस्येत्यर्थः ॥ तमो न

(१) निःस्पर्शस्य द्रव्यस्येति पा० २ पु० ।

वत्वे नित्यत्वेपि त्रुटेश्चाक्षुषत्वाभ्युपगमात्(१) । मनसि मूर्तत्वानङ्गीकारात् । अनुद्भूतस्पर्श एव वा कल्प्यताम् । न चोद्भूतनीलरूपस्योद्भूतस्पर्शसामानाधिकरण्यनियमः पृथिव्यामेव तथात्वात् । एवं रसानुद्भवोपि कल्प्यताम् । तेजो-

रूपवत् स्पर्शवदनारब्धचाक्षुषत्वाज्जातिवदिति पर्यवसितमनुमानम् । त्रुटौ व्यभिचारेण दूषयति ॥ रूपवत्व इति ॥ ननु चाक्षुषद्रव्यत्वेन त्रुटौ सावयवत्वसिद्धेर्धर्मिग्राहकमानबलेन च मनोमूर्तत्वसिद्धेर्नैतदिति शङ्कमानं प्रति हेतोर्विशेषणासिद्धिर्वेत्याह ॥ अनुद्भूतस्पर्श एवेति ॥ तमो नानुद्भूतस्पर्श उद्भूतनीलरूपाच्छंखवत् । पित्तधातौ व्यभिचारवारणाय नीलेति । इत्यनुमानमाशङ्क्य साधनावच्छिन्नसाध्यव्यापकपृथिवीत्वोपाधिना दूषयति ॥ न चोद्भूतनीलेति ॥ पृथिव्यामेवेति ॥ अन्यथा पृथिव्यामुद्भूतयो रूपस्पर्शयोः सामानाधिकरण्यनियमावधारणात्तेजस्यप्यन्यतरानुद्भवे अन्यतरोद्भवो न स्यादिति भावः । ननु नीलरूपसमानाधिकरणस्पर्शस्य रसव्याप्यत्वस्यावधारणात्तद्व्यावृत्त्या स्पर्शोपि तमसो व्यावर्ततेत्याशङ्क्याह । एवं रसेति । उपपत्तिसौकर्यादाह ॥ तेजोवदिति ॥ यथा रूपसमानाधिकरणस्पर्शस्य न रसव्याप्यता तथा नीलरूपसमानाधिकरणस्यापि साधनावच्छिन्नसाध्यव्यापकस्य पृथिवीस्पर्शत्वस्य तत्रोपाधित्वादिति भावः ॥ स्वपक्षे साधकमुक्त्वा

(१) चाक्षुषत्वस्वीकारादिति पा० २ पु० ।

अत्रोच्यते ॥ यद्यपि भावत्वतन्नियतधर्मप्रकारिका प्रतीतिस्तमोविषयानुभवसिद्धा तथापि तेजोव्यतिरिक्तभावगोचरचाक्षुषसाक्षात्कारस्य विषयसंस्कारकबाह्यालोकापेक्षानियमावधारणबलेन भ्रान्तत्वकल्पनमेव युक्तम् (१)। न च तेजोव्यतिरेकवत्तमोव्यतिरेकेण विशेषणीयमिदं। तेजोद्रव्यत्वस्यानन्यथासिद्धप्रमाणावधृतत्वात्। न च तमोव्यतिरेक एव तेज आस्तामिति वाच्यम्।

सिद्धान्ताभिधानं प्रतिजानीते॥ अत्रोच्यत इति॥ पूर्वपक्षरहस्यं निरस्यन्ननुवदति यद्यपीति। प्रतीतिर्यथासम्भवमनुमितिप्रत्यक्षादिरूपा। व्यापकानुपलम्भबाधेन निरस्यति॥ तथापीति॥ यदुक्तं तथात्वे प्रमाणाभावादिति तदसिद्धमित्याह। तेजोव्यतिरिक्तेत्यादिना। तेजोभावे व्यभिचारवारणाय भावेति। तेजसि व्यभिचारवारणायाह तेजोव्यतिरिक्तेति। घटादिस्पार्शनसाक्षात्कारे व्यभिचारवारणाय चाक्षुषेति। तेजःसाक्षात्कारे विषयस्य तेजसोऽपेक्षणादाह विषयसंस्कारकेति। स्वस्य च स्वासंस्कारकत्वादिति भावः। चक्षूरूपस्य तेजसश्चाक्षुषसाक्षात्कारमात्र एवापेक्षणादाह॥ बाह्येति॥ इन्द्रियभिन्नेत्यर्थः॥ युक्तमिति॥ लाघवादिति शेषः। तस्यास्तमसि भावधर्मप्रतीतेः। तेजःप्रतिबन्दिं निरस्यति॥ न चेति॥ अन्यथेति॥ उष्णस्पर्शादेराश्रयान्तरासिद्धेरित्यर्थः। विनिगमकाभावात्तेज एव तमोभावोऽस्तु इत्य-

---

(१) युक्तं तस्याः प्रतीतेरिति पा० २ पु०।

तथा सत्युष्णस्पर्शभास्वररूपाश्रयद्रव्यान्तरकल्पनापातात्। अन्यथा कस्यारोपस्तेजसि स्यात्। तमसि तु क्लृप्तस्यैव नीलरूपादेरारोप इति न कल्पनागौरवम्। न च तमोभावत्वग्रहायत(१)तेजोपेक्षैव सङ्कोच्यतामिति वाच्यम्। तथा सति गौरवप्रसङ्गात्। तथा हि। तमो द्रव्यान्तरं कल्पनीयम्।

विज्ञाताश्रयशङ्कामुद्धाटयन्निरस्यति॥ न चेति॥ कल्पनेति॥ ततश्च गौरवमिति भावः॥ त्यज्यतां तर्हि सेत्यत आह॥ अन्यथा कस्येति॥ धर्माणामिति शेषः॥ तादात्म्यारोपाभिप्रायेण यथाश्रुतमेव वा योज्यम्। ननु प्रकृते रूपादिप्रतीतेरसति बाधके प्रमात्वात्तमसो भावत्वं प्रकल्प्यालोकापेक्षा सङ्कोच्यतामुत तेजोव्यतिरिक्तभावचाक्षुषसाक्षात्कारे आलोकस्य जनकतावधारणबलेन भावत्वं त्यज्यताम्। अन्त्ये रूपपरिमाणगत्युत्पत्तिविनाशादिप्रत्ययानां भ्रान्तत्वं कल्प्यम्। अभावत्वेन प्रतीयमाने क्वचिदक्लृप्तो भावधर्मारोपश्च। तद्वरमेकव्याप्तिसङ्कोचमात्रकल्पनमित्याशङ्क्याह॥ न च तमोभावत्वे त्विति। गौरवेति॥ तमोव्यतिरिक्तत्वविशेषणप्रक्षेपे प्रामाणिकगौरवप्रसङ्गादित्यर्थः॥ तेजोद्रव्यानङ्गीकारे त्वौष्ण्यादिबुद्ध्यनुपपत्तेस्तेजोव्यतिरेकविशेषणे प्रामाणिकं गौरवम्। न च तमोव्यतिरेकविशेषणानङ्गीकारे तस्याभावत्वप्रसक्तौ पूर्वगौरवद्वयं तस्य फलमुखत्वादिति भावः॥ यदि तादृशोपि गौरवादभावत्वत्यागस्तदा विशे-

(१) ग्रहात् नियतेति पाठा० २ पु०।

तत्र रूपवत्त्वेऽपि निःस्पर्शवत्त्वकल्पनम् । उद्भूतनीलरूपवत्त्वे चानुद्भूतस्पर्शवत्त्वम् । निःस्पर्शस्य वा कथमारम्भकत्वम् । तत्र स्पर्शवद्द्रव्यत्वस्य प्रयोजकत्वात् । मूर्त्तत्वापेक्षया तस्य लघुत्वात् । आलोकाभावव्यङ्ग्यत्वमधिकमेव कल्पनीयम् ।

षणप्रक्षेपे तदप्यधिकमस्त्येवेत्याशयेन गौरवान्तरमुपन्यस्यति ॥ तथाहीति ॥ रूपवत्त्वेऽप्यस्पर्शवत्त्वमस्पर्शस्याप्यारम्भकत्वम् आलोकाभावव्यङ्ग्यत्वं चेति गौरवत्रयम् । उद्भूतनीलरूपस्यानुद्भूतस्पर्शत्वमालोकाभावव्यङ्ग्यत्वं चेति द्वयमिति पक्षभेदेन द्रष्टव्यम् ॥ स्पर्शवदिति ॥ स्पर्शवदनंत्यावयवित्वस्येत्यर्थः ॥ ननूक्तं मूर्त्तत्वमेव तत्र प्रयोजकमित्यत आह ॥ मूर्त्तत्वेति ॥ इयत्तावच्छेदविशेषितपरिमाणत्वोपाध्यपेक्षया स्पर्शवत्त्वस्य जातित्वेनाखण्डत्वादिति भावः ॥ ननु तथापि वेगवत्त्वं क्रियावत्त्वं वा तत्र तन्त्रमस्तु स्पर्शवत्त्वतुल्यत्वात् । मनस्तु नारम्भकम् । वेगक्रिययोस्तत्र परैरनङ्गीकारात् ॥ स्वमतेऽपि मनसः क्रियावत्त्वेऽपि तदारभ्यत्वाभिमतस्य प्रतीयमानतया प्रतीयमानधर्माश्रयतया वा पुरुषार्थसाधनत्वादर्शनादनारम्भकतोपपत्तेस्तमसश्च तद्दर्शनादारम्भकतोपपत्तेरिति चेत् न नित्यस्य स्वरूपयोग्यस्य फलोपधाननियमेन मनसोऽप्यारम्भकत्वस्य दुःपरिहरत्वात् । अन्यथा द्रव्यत्वादेरेवारम्भकताप्रयोजकत्वप्रसङ्गात् । पूर्वोक्तगौरवे वा तात्पर्यात् ॥ न केवलमक्लृप्तकल्पना किन्तु क्लृप्तविरुद्धकल्पनापीत्याह । आलोकेति॥ नन्वेवं तमस्तेजोवैधर्म्यात् पृथिव्यादीनामभावत्वापत्तिरित्यत आह । न च पृथिव्यादीना-

न च पृथिव्यादीनामप्येवमभावत्वापत्तिरिति वाच्यम्। तत्र गन्धादेरनन्यथासिद्धस्य गुणस्य द्रव्यत्वव्यवस्थापकत्वात्। तमसस्तु न तथाभूतो गुण उपलभ्यते उपलभ्यमानस्त्वन्यथासिद्ध एव। कथं वा विशेषगुणयोग्यतामन्तरेण प्रत्यक्षमूर्तत्व-मप्यस्य। भावधर्मारोपोऽप्यभावत्वानुपस्थितिद-शायामुपपद्यते। अभावत्वानुपस्थितिस्तु दोषव-

मिति ॥ अनन्यथेति ॥ स्वाश्रयद्रव्यकल्पनामन्तरेणानु-पपन्नप्रतीतिकस्येत्यर्थः। गुणादौ व्यभिचारवारणायाह मूर्तत्वमिति। तथा च व्यापकानुपलब्धिबाधितं तमसो भावत्वमिति भावः। रूपाद्यारोप्यकोटिविपरीतकोटि-व्याप्याभावत्वरूपविशेषदर्शने कथं रूपाद्यारोप इति पूर्वपक्षे परिहारमाह ॥ भावधर्मारोपोपीति ॥ यद्यपि नीलन्तम इत्यालोकाभावत्वघटितप्रवृत्तिनिमित्तक(१)-तमःपदोल्लेखेऽभावत्वानुपस्थित्यभिधानमयुक्तं तथापि न विद्यन्ते भावा रूपपरिमाणगत्यादयोऽस्मिन्नित्य-भावं तत्त्वेना(२)नुपस्थितिदशायां आरोप्यरूपादिरा-हित्येनानुपस्थितिदशायामित्येवात्र विवक्षितम्। अयं भावः। यद्विशेषदर्शनाभावे यो भ्रमः स तद्विशेषद-र्शननिवर्त्यः। न च नीलारोपोऽभावत्वविशेषदर्श-नाभावजन्यः येन तद्दर्शने न स्यात्। नीलन्तम इति प्रतीतेः सर्वसिद्धत्वात्। किन्तु नीरूपत्वादिप्रत्यक्षाभा-

(१) प्रवृत्तिकेति पाठा० २ पु०।

(२) न्नित्यभावेत्वेनेति पा० २ पु०।

शादेव समर्थनीया । दोषस्तु तथा वस्तुस्वरूपमेव । अदृष्टादिकमेव वा । पद्मरागप्रभायां चलनबुद्धेराश्रयचलनानुविधायितानियमो नास्त्येव । का-

वहेतुक इति तत्प्रत्यक्षे परं न भवेत् । एवं च तथा पीतत्वाभावव्याप्यशंखत्वदर्शनं सदपि न विरोधि । यच्च विरोध्यपीतत्वप्रत्यक्षं तद्दोषप्राबल्यान्नास्तीति भवति पीतः शङ्ख इति भ्रमः । एवमिहाप्यालोकाभावत्वदर्शनं सदपि न विरोधि विरोधि वा नीलप्रत्यक्षं नास्त्येव दोषप्राबल्यादिति युक्तो भ्रमः ॥ नन्वेवं दोषस्यानियतत्वात्तदपगमे कदाचिदनीलप्रत्ययप्रसङ्ग इत्यत आह । दोषस्तु वस्तुस्वरूपमेवेति ॥ अस्मिन्पक्षे वस्तुस्वरूपस्य(१) प्रमातृमात्रसाधारण्याद्योगिनोपि नीलप्रत्यय एवोन्नीयत इति ज्ञेयम् ॥ अदृष्टादिकमेव वेति ॥ आरोपहेतुकसुखाद्यनुभावकादृष्टादिकमेव वेत्यर्थः । आदिपदेन भ्रमप्रयोजकप्रबलनीलसंस्कारपरिग्रहः । अत्र च पक्षद्वये योगिनां तत्सत्तानियमे प्रमाणाभावान्नीलप्रत्ययाभावोपपत्तिः । इदमेव च पक्षद्वयमभिप्रेत्य योगिनोपि नीलप्रत्यय एवोन्नीयत इति निरस्तमिति वक्ष्यति ॥ यदुक्तं स्वाभाविकगतेरपि पद्मरागप्रभावदन्यगत्यनुविधानमुपपद्यत इति । तत्र दृष्टान्तं विघटयति । पद्मरागादिप्रभायामिति । कारणवशात्कुड्याद्यावरणविगमवशात् ॥ ननु तमसोपि नान्यगत्यनुविधाननियमः । स्थितेपि स्तम्भादौ प्राक्पश्चाद्दीपसम्बन्धादिना छायाचलनोपलम्भात् । कुड्यादिनाऽप्राप्तपरभागायाश्छायायास्तदपगमे

(१) वस्तुस्वरूपस्य दोषस्येति० पा० २ पु० ।

रणवशादन्यत्रापि तथा चलनोपलम्भात् । यद्वा तमो यदि गतिमत्स्यात् तेजोभावाविषयकचाक्षुषसाक्षात्काराविषयो न स्यात् । तथा तमो यदि

परभागप्राप्तिदर्शनाच्चेत्यस्वरसादाह । तमो यदि गतिमत्स्यात् तेजोभावाविषयकचाक्षुषसाक्षात्काराविषयो न स्यात् इति । अत्रालोकाजन्यचाक्षुषसाक्षात्कारविशेष्यं पक्षः तेन तमःसंज्ञकस्य पुंसो पक्षतया न विपर्ययपर्यवसानें-शतो बाधः । गतिमत्वं च समवायेन गत्यधिकरणत्वं तेन न कालादौ व्यभिचारः । न वा चौरादिगत्यधिकरणे तमसि बाधेन विपर्ययापर्यवसानं । साक्षात्काराविषयो न स्यादित्युक्ते आपाद्याप्रसिद्धिः साक्षात्कारविषयित्वस्य केवलान्वयित्वात् । लौकिकत्वेन साक्षात्कारविशेषणे चेष्टापत्तिरतस्तेजोभावाविषयकेति साक्षात्कारविशेषणम् ॥ तत्राप्यभावपदस्य भावाभावसाधारणाभावपरतयाऽऽपाद्यविपर्ययहेतावप्रसिद्धिस्तद्वारणाय तेजःपदम् । आकाशाद्यभावाविषयसाक्षात्काराविषयत्वाभावस्य तमस्यपि सत्त्वात् इष्टापत्तिवारणाय तदिति तु मन्दम् । आद्यनञा सामान्याभावविवक्षायामिष्टापत्त्यसम्भवात् । तदविवक्षायां तु सत्यपि तेजःपदे यत्किञ्चित्तेजोभावमादायेष्टापत्त्यपरिहारात् । एतेन सामान्याभावानङ्गीकर्तृमते नैतदित्यपि प्रत्युक्तम् ॥ अन्ये तु घटाभावाभावरूपे घटेऽभावाविषयसाक्षात्काराविषये व्यभिचारवारणाय तेजःपदमित्याहुः । तदपि मन्दम् । अभावपदेनात्राभावैकस्वभावस्य न्यायोपादानत्वात् । अन्यथाऽभावाविषयत्वाप्रसिद्ध्याऽऽपाद्याप्रसिद्धेः । घटतेजोभावाविति

समूहालम्बनविषये व्यभिचारवारणायाद्यं नञ्द्वयम् । घटे च तेजोभावविषयकसाक्षात्कारविषयत्वेपि घटोयमिति तदविषयसाक्षात्कारविषयत्वमप्यस्तीति न व्यभिचारः ॥ ननु तेजोभावविषयकसाक्षात्काराविषयः स्यादित्येवास्तु । न च व्यभिचारः घटोयमिति साक्षात्कारविषयतादशायां तेजोभावविषयकसाक्षात्काराविषयत्वस्य पर्युदासवृत्त्या लभ्यस्य सत्त्वादिति चेत् न तेजोभावविषयसाक्षात्कारविषयान्यत्वस्य च पर्युदासलभ्यस्य घटादावसत्त्वेन व्यभिचारानुद्धारान्नञ्त्रयोपादानात् । तेजोभावविषयसाक्षात्कारभिन्नसाक्षात्कारविषयत्वस्य च पर्युदासालाभात् । भावमुखस्य तस्य विवक्षितसाध्यस्यापाद्यान्तरत्वेनावधारणात् । न च तथापि समूहालम्बनविषयतादशायां घटतेजोभावाविषयकबुद्ध्यविषयत्वमस्तीति व्यभिचारान्न निस्तार इति वाच्यम् । अविषयपदेन विषयभिन्नस्योक्तत्वात् । ननु समस्तोपादानेपि मनसि व्यभिचारावक्रोक्तिवैयर्थ्यं च तेजोभावाविषयसाक्षात्कारविषयः स्यादित्यस्यापि सुवचत्वात् इति चेत् न मनोव्यभिचारनिरासायैव तदादरात् । तथाहि आपाद्यतेजोभावाविषयसाक्षात्काराविषयत्वाभावो द्विधा । तेजोभावाविषयसाक्षात्कारविषयत्वाद्वा तेजोभावविषयकसाक्षात्काराविषयाद्वा । तन्नाद्यं प्रकारमादाय घटादौ व्यभिचारवारणम् । द्वितीयप्रकारस्य घटतेजोभावाविति समूहालम्बनविषयत्वेन तत्रासम्भवात् । मनसि च द्वितीयप्रकारमादातमसि तूभयमप्यनिष्टमिति । तेजोभावविषयकसाक्षात्काराविषयो न स्यादित्युक्ते त्विष्टापत्तिः । तमःपद-

जन्यतेजोभावाविषयबुद्ध्यविषयत्वाभावेनेष्टापत्तिवारणाय साक्षात्कारपदम्। कश्चित्तु चाक्षुषं तमो यदि चाक्षुषगतिमत्स्यात् आलोकव्यङ्ग्यं स्यात् इत्यत्र तात्पर्यं वक्रोक्तावभिरुचिमात्रमित्याह। क्वचित्पुस्तके तमो यदि गतिमत् स्यात् तेजोभावविषयसाक्षात्कारविषयो न स्यादिति पाठः। तत्रापि तेजःपदप्रयोजनं पूर्ववदेव। ननु तेजोभाववायू इति स्पार्शनसाक्षात्कारविषये वायौ भट्टमते मूलशैथिल्यम् गृहाङ्गणयोस्तेजोभावघटाविति साक्षात्कारविषये घटादौ स्वमतेपि। अत्राहुः विषयेण साक्षात्कारो विषयसाक्षात्कारः साधनं कृतेति समासः। आलोकाभावे विषयसाक्षात्कार आलोकाभावविषयसाक्षात्कारः। स च चाक्षुषो विवक्षितः। तेनालोकाजन्यविषयजन्यचाक्षुषसाक्षात्कारविषयो न स्यादिति पर्यवसितम्। तत्रालोकाजन्यपदेन घटादौ व्यभिचारनिरासः। चाक्षुषपदेन परमते वायौ। विषयजन्यपदेनालोकाभावकालीनप्रमेयत्वप्रकारकचाक्षुषसाक्षात्कारविषयघटादावेव व्यभिचारनिरासः। नन्वेवमपीदृशबिडालोलूकादिचाक्षुषसाक्षात्कारविषये तत्रैव व्यभिचारः। न च मानुषेति विशेषणाददोषः। अञ्जनादिसंस्कृततस्करादिचक्षुर्जन्यसाक्षात्कारविषयतया तत्रैव व्यभिचारतादवस्थ्यादिति चेत् न। तत्रापि विषयसंस्कारकालोकस्य फलबलेन कल्पनात्। न च तस्यानुद्भूतरूपत्वे संस्कारकतापत्तिः। उद्भूतरूपत्वे च तैरिवान्येनापि तद्ग्रहापत्तिरिति वाच्यम्। नयनगतपित्तधातुवत् प्रतिनियतपुरुषग्राह्यतोपपत्तेरिति। ननु तमसस्तेजोभावाविषयसाक्षा-

तेजोभिन्नत्वे सति गतिमत्स्यात् तेजोविषयकचाक्षुषसाक्षात्कारविषयकगतिमत्स्यादित्यत्र ता-

त्काराविषयत्वाभावापादने इष्टापत्तिः । तमोद्रव्यत्ववादिमते आलोकाभावव्यङ्ग्यस्यापि तमसः साक्षात्कारे आलोकाभावस्याविषयत्वात् । न हि व्यङ्ग्यप्रतीतौ व्यञ्जकभाननियमः । घटादिचाक्षुषसाक्षात्कारे व्यञ्जकालोकोल्लेखनियमे आलोकवान्घट इत्येव तदाकारप्रसङ्गात् । गवादिप्रतीतौ सास्नादेर्विषयत्वप्रसङ्गाच्चेत्यस्वरसादाह तथा तमो यदीति । तेजो न विषयो यस्य चाक्षुषसाक्षात्कारस्य तदविषयगतिः स्यादित्यर्थः । अत्र नञ्द्वयानुपादाने मनसि मूलशैथिल्यम् । तेजस्तमसी चलत इति समूहालम्बनविषयतया तमसीष्टापत्तिश्चेति यथोक्तम् । न चैवमप्युक्तसमूहालम्बनदशायामिष्टापत्तिः उत्तरनञः प्रसज्यप्रतिषेधार्थत्वात् । चाक्षुषपदं च तेजोविषयकस्पार्शनसाक्षात्कारविषयगतौ घटादौ व्यभिचारवारणाय । न च तेजोविषयताशून्यचाक्षुषसाक्षात्कारविषये घटादौ व्यभिचारः । तेजोऽजन्यत्वस्यैव तदर्थत्वात् । अत एव पूर्वास्वरसनिस्तारोपि । चक्षुषैव तेजसाजन्ये(१) कथं तेजोऽजन्यत्वमिति चेत् न विषयसंस्कारकतेजस एव तेजःपदार्थत्वात् । अत एव तेजसि व्यभिचारवारणायापादके तेजोभिन्नत्वविशेषणम् । गतिमत्पदं संपातायातम् न त्वा-

(१) चक्षुषि च तेजसाजन्ये इति पा० २ पु० ।

त्पर्यात् । न च प्रतियोगिग्रहानुपपत्तिः । सर्वत्र तथाकल्पनात् । तमोव्यवहारस्तु प्रौढ-प्रकाशकतेजस्संसर्गाभावनिबन्धन एव दोषवशा-

---

पाद्ये विवक्षितं । शिष्टं पूर्ववत् । अपरे तु नञ्द्वयरहितमापाद्यं मत्वा चाक्षुषपदव्यत्ययमाहुः । नन्वभावत्वपक्षे देशकालविप्रकृष्टस्य तेजोमात्रस्यासर्वज्ञेन दुर्विज्ञानतया कथं तत्प्रतियोगिकतमोबुद्धिः स्यादित्याशङ्क्याह । न चेति । सर्वत्रेति । सामान्यलक्षणादिना सकलप्रतियोग्युपस्थितेः सामान्याभावप्रतीतिमात्रसाधारण्यादिति भावः । ननु तेजोभावस्य तमस्त्वे दीपवत्पथि सौराद्यालोकाभावमादाय तमोव्यवहारः स्यादित्यत आह तमोमात्रेति । अन्योन्याभावव्यावृत्त्यै संसर्गेति । यत्किंचित्तेजस्संसर्गाभावव्यावृत्त्यै यावदिति । सोष्मणि तमस्यव्याप्तिनिरासाय प्रकाशकेति ॥ न चोष्मणोपि प्रत्यासत्तिविधया स्वस्पर्शप्रकाशकत्वमस्त्येवेति वाच्यम् । उद्भूतानभिभूतरूपत्वस्यैव तदर्थत्वात् । एतेन प्रकाशकता ज्ञानजनकतेति ज्ञानरूपाचाक्षुषघटितप्रतियोगिकत्वात्तमसः चाक्षुषत्वानुपपत्तिरित्यपास्तम् । प्रभासंवलिते छायातमसि अव्याप्तिवारणाय प्रौढेति ॥ प्रौढिरुद्भूतानभिभूतस्पर्शता । अत्र तमःस्वरूपं योग्योद्भूतरूपप्रत्येकतेजस्संसर्गाभाव एव । व्यवहारः परं यावदन्तर्भावप्रयुक्तः । न च प्रत्येकं तमस्त्वे यत्किञ्चित्तेजसि सत्यपि तेजोन्तराभावमादाय तमोव्यवहारः स्यादिति वाच्यम् । कार्यदर्शनबलेन तेजोन्तरस्य प्रतिबन्धक-

त्प्रतियोगिनोनवभासेपि तेजोभावावभासाविरो-
धाच्च । अभावत्वग्रहे हि प्रतियोगिग्रहापेक्षणात् ।

त्वकल्पनात् । न च छायारूपतमोव्यवहारेपि तेजोन्तरस्य प्रतिबन्धकतापत्तिः । कार्योन्नेयधर्माणां यथाकार्यमुन्नयनादिति व्यवहारपदं प्रयुञ्जानस्याशय इति वदन्ति । 'तु' शब्दोऽवतमसादिव्यवहाराणामन्यनिबन्धनत्वसूचनाय । तत्र रूपग्राहकतेजःसंवलितः तदवान्तरविशेषग्राहकयावत्तेजःसंसर्गाभावोऽवतमसम् । रूपत्वावान्तरजातिग्राहकतेजस्संवलितः प्रौढप्रकाशकयावत्तेजःसंसर्गाभावश्छाया । यावदालोकाभावोऽन्धतमसम् । सर्वेषु चैतेषु लक्षणेषु तत्तज्ज्ञानविशेषपरिचायितजातिविशेषविशिष्ट एवालोकः प्रतियोगीति न ज्ञानगर्भतया तेषामचाक्षुषत्वप्रसङ्गः । ननूद्भूतरूपस्पर्शस्य द्रव्यप्रत्यक्षकताप्रयोजकत्वपक्षे प्रभाद्यतीन्द्रियतेजःप्रतियोगिकमन्धतमसं कथं चाक्षुषं स्यादिति चेन्न तदालोकगतरूपविशेषाभावस्यैव तमस्त्वात् । परिहृताशामपि प्रतियोगिग्रहानुपपत्तौ सिंहावलोकितेन स्मृतमेकदेशिनः परिहारान्तरमाह ॥ दोषवशादिति ॥ दोषश्चानियत इति तेजोभावस्त्वेन तत्प्रतीतौ तदभावो द्रष्टव्यः । नन्वभावज्ञानसामान्यहेतोः प्रतियोगिज्ञानस्याभावे कथं दोषादपि तदवभास इत्याशङ्क्याह ॥ अभावत्वग्रहे हीति । अभावत्वप्रकारके तद्ग्रह इत्यर्थः । यद्यपि तमःप्रतीत्यंशे न दोषजन्यता वा सिद्धा न तरामभावत्वाग्रहः प्रतियोग्यग्रहो वेति नायं परिहारस्त-

तत्र राशिष्विव कश्चित्समुदायिव्यतिरेकप्रयुक्त एव विनाशप्रत्ययः । एवमुत्पत्तिप्रत्ययोऽप्यूह्यः । नीलरूपारोपविशिष्टस्तेजस्संसर्गाभावस्तम इति केचित्(१) । अत्र चाक्षुषः प्रत्ययः कथमिति तच्चिन्त्यम् । यत्पुनरुक्तं नीलन्तम इति प्रत्ययस्य

यापि पूर्वपरिहार एव तात्पर्यम् । नन्वालोकाभावोऽपि न सः । तथाहि न तावदत्यन्ताभावः । उत्पादविनाशप्रत्ययालम्बनत्वानुपपत्तेः । अत एव न प्रागभावध्वंसावपीत्यत आह । तत्रेति ॥ शिवादित्यमतमाह । नीलरूपेति । आरोपस्य चक्षुरग्राह्यत्वेन तद्विशिष्टसंसर्गाभावात्मनस्तमसोऽप्यचाक्षुषत्वप्रसङ्ग इति दूषयति अत्रेति । ननु ज्ञानोपनीतनीलारोपविशेषणकालोकसंसर्गाभावप्रतीतेश्चाक्षुषत्वे को विरोधः । तदिन्द्रिययोग्यविशेष्यकत्वस्यैव तदिन्द्रियकरणतानियामकत्वात् । न च लौकिकचाक्षुषप्रत्ययः कथं स्यादिति विवक्षितमिति वाच्यम् । तत्राप्यालोकांशे ज्ञानलक्षणप्रत्यासत्तिजन्यत्वेन तमःप्रतीतेः सर्वांशे लौकिकत्वानुपपत्तेरिति चेत् न नीलारोपस्य ज्ञानाभावेन तदुपनयसहकृतचक्षुर्ग्राह्यानुपपत्तेर्विवक्षितत्वात् । भ्रमत्वस्य विपरीतप्रत्ययावसेयत्वात्प्रकृते च तदभावान्नीलप्रत्ययो न भ्रम इति पूर्वपक्षोक्तमनूद्य निराकरोति ॥ यत्पुनरुक्तमिति ॥ दोषकाली-

(१) कश्चिदिति पाठा० २ पु० ।

भ्रान्तत्वेऽनीलन्तम इति प्रतीतिः कदाचिदपि स्यात् इति । तदपि मन्दं शरीरेऽहं प्रत्ययवदुपपत्तेः । अत एव योगिनोपि तथा प्रत्यय एवोन्नीयत इति निरस्तम् । पेचकादीनां बाह्यालोकनिरपेक्षं चक्षुर्ग्राहकमित्यसिद्धमेव । (तेजोन्तरस्य विद्यमानत्वात् । अत एव ते दिवा न पश्यन्ति । तस्य सौरालोकेनाभिभूतत्वात् । तेषां तत्सहचरचक्षुर्ग्राहकत्वमिति नियमात्)(१) । नात्रालोकः किं

नविपरीतप्रत्ययाभावमात्रान्नाभ्रमत्वसिद्धिरित्याह शरीर इति ॥ ननु तत्त्वज्ञानदशायां बाधादस्तु देहादेरहं प्रत्ययस्य भ्रमत्वं इह तु वस्तुस्वरूपस्यैव दोषस्य तमःप्रत्ययमात्रेऽनुवृत्तेर्न विपरीतप्रत्ययोपपत्तिरिति चेन्न अदृष्टादिदोषाभिप्रायेणैवमभिधानात् । अत एवाह । अत एवेति । नीलभ्रमप्रयोजकस्यादृष्टादेर्दोषस्य योगिष्वभावादेवेत्यर्थः । ननु तेजोव्यतिरिक्तभावगोचरचाक्षुषसाक्षात्कारे बाह्यालोकापेक्षेति मूलमेवासिद्धम् पेचकादिचाक्षुषसाक्षात्कारे व्यभिचारादित्याशङ्क्याह पेचकादीनामिति । नन्वेवं तदभिभावकसौरालोकसहकृतेनैव तच्चक्षुषा कुतो न तद्ग्रह इत्याशङ्क्याह तेषामिति । फलबलादालोकविशेषस्यैव सहकारित्वकल्पनादिति भावः । सहप्रयोगा-

(१) ( ) चिह्नस्थपाठो द्वितीयपुस्तके ।

पुनरन्धकार इति व्यवहारस्तु नात्र घटः किन्तु तदभाव इतिवद्विवरणरूपादिना समर्थनीय इति सर्वं समंजसम् ॥

इत्यन्धकारवादः ॥

नुपपत्तिं निरस्यति नात्रेति । विधिमुखः प्रत्ययस्तु प्रलयादिवदुपपादनीयः इत्याह ॥ इति सर्वं समञ्जसमिति ॥

इति श्रीसकलसामन्तचक्रचूडामणिमरीचिमंजरीपरागपिञ्जरितचरण–कमलकलिकर्णावतार–श्रीमत्प्रतापराजोद्योजितशेषानन्तविरचितायां न्यायसिद्धान्तदीपप्रभायामन्धकारवादप्रकरणम् ॥

किं तत्कारणत्वम्?। कार्यनियतपूर्ववर्तित्वं वा। कार्यनियतपूर्ववृत्तिजातीयत्वं वा । अनन्यथासिद्धनियतपूर्ववर्तित्वं वा । कार्यसहभावे सत्येतदेव वा । सहकारिविरहप्रयुक्तकार्याभाववत्वं वा। अन्यद्वा । नाद्यः । कुम्भकारपितुरपि

तत्पदसूचययाक्षेपसङ्गत्या कारणपदप्रवृत्तिनिमित्तविचारस्यानवसरतां परिहरन्नेव विप्रतिपत्तिमूलकं संशयमाह ॥ किं तत्कारणमिति ॥ तत्पूर्वप्रकरणयोस्तत्र तत्रोपक्षिप्तकारणत्वं कारणपदप्रवृत्तिनिमित्तधर्मि । तत्र संशयकोटीराह ॥ नियतेति ॥ अस्य कारणपदार्थत्वेऽनुत्पादितकार्ये वनस्थदण्डादावप्रवृत्तिप्रसङ्गः इष्टसाधनत्वाज्ञानादित्यरुचया जातीयत्वविशेषणेन कोट्यन्तरमाह । कार्येति । तन्तुरूपादौ पटादिकारणताप्रसंगभयादाह । अनन्यथासिद्धेति । अनन्यथासिद्धनियतपूर्ववर्तिजातीयविनश्यदवस्थकर्मण्यतिप्रसङ्गादाह । कार्यसहभावेति । प्रतिव्यक्तिकार्यसहभावोपासने वनस्थदण्डादावप्रवृत्तिप्रसङ्गः । सहभूतजातीयत्वविवक्षायानुसरण स एव दोष इत्यत आह । सहकारीति । कुंभकारपितुरपीति । यद्यपि कुम्भकारत्वेन तस्य कारणत्वमिष्टमेव तथापि कुम्भकारपितृत्वेनापि तत्स्यादिति भावः । किञ्च किमिदं कारणमात्रलक्षणमुत तत्तत्कार्यकारणलक्षणं इति विकल्प्य कार्यापेक्षया पूर्वत्वस्यासंभन्ननिरस्तत्वात्कार्यपदवैयर्थ्येनाद्यं मुनिरसम्मन्वानः कार्यपदस्वरससूचिते यत्कार्यापेक्षया यन्नि-

कुम्भम्प्रति कारणत्वप्रसङ्गात् । आकाशादेः कार्यमात्रे कारणत्वप्रसङ्गाच्च । किञ्च पूर्ववर्तित्वं प्रागभावावच्छिन्नसमयवर्तित्वं । तथा च तयोरकारणत्वप्रसङ्गात् । न हि प्रागभावावच्छिन्ने समये प्रागभावो वर्तते । समये समयो वा । किञ्चैवं घटादिकं प्रति रासभोपि कारणं स्यात् । तस्यापि घटादिनियतपूर्वसमयवर्तित्वात् । न ह्यनादौ संसारे कस्यापि घटस्य पूर्वं रासभो न वर्तते ।

यतपूर्ववृत्ति तत्तत्कारणमिति द्वितीयपक्षे दूषणमाह आकाशादेरिति । पूर्वत्वं प्रागभावावच्छिन्नत्वं । तत्र प्रागभावः समयविशेषणं उपलक्षणं वेति विकल्पयोभयत्र दूषणं संगृह्णाति । तथाच तयोरिति । सङ्ग्रहं विभजते ॥ विशिष्टे प्रागभावशत आत्माश्रयप्रसङ्गादिति भावः । उपलक्षणत्वपक्षे आह समय इति । स्वात्मनि वृत्तिविरोधादिदानीं मध्यं दिनमितिप्रतीतेरुपाधिमात्रविषयत्वादुपधेयांशेऽव्याप्त्यापातादिति भावः । कालविशेषवादिपूर्वपदसमभिव्याहृतान्नियतपदाद्दैशिकनियमाप्रतीतेराह । किञ्चैवमित्यादिना । घटविशेषे दैशिकव्यभिचारान्नियमभंगसमन्वानं प्रत्याह । नहीति । अत एवेति । रासभातिव्याप्तेरेवेत्यर्थः । नियतपूर्ववर्तिजातीयत्वं हि न तद्वृत्तिजातिमत्वमात्रं सत्तयातिप्रसङ्गात् । किन्तु पूर्ववृत्तितानियमावच्छेदकजातिमत्त्वमिति स्थिते जातिपदस्य मुख्यामुख्यार्थत्वविकल्पयो-

अत एव न द्वितीयः । आकाशादेरकारणत्वप्रसङ्गाच्च । न ह्याकाशादीनां तज्जातीयत्वेन कारणत्वावधारणम्(१) । एकव्यक्तिकत्वेन तत्र जातेरभावात् । न च जातित्व(२)मुपलक्षणम् । उपाधे-

राद्य ऽव्याप्तिमाह । आकाशादेरिति । यद्यपि जन्यगुणकारणतावच्छेदकद्रव्यत्वजातिसत्त्वेनेतरेषामिवाकाशस्यापि कारणत्वे नानुपपत्तिस्तथापि आकाशादिमात्रवृत्तिः शब्दादिविशेषं प्रतीष्यमाणा सा न स्यादिति विवक्षितम् । एतदेव विवृण्वन् हेतुमाह नहीति । तदपि कुत इत्यत आह । एकव्यक्तिकत्वेनेति । तत्र तन्मात्रे तन्मात्रवृत्तेर्धर्मस्यैकव्यक्तिकत्वेनानेकवृत्तित्वघटितजातित्वाभावादित्यर्थः । नन्वस्तु जातिपदमजहत्स्वार्थलक्षणया कारणतावच्छेदकधर्ममात्रपरमित्यत आह । न चेति ॥ तथाप्यव्याप्तिरित्याह । उपाधेरपीति । कारणव्यक्त्यनेकत्वे ह्यानन्त्यव्यभिचाराभ्यां कारणताग्रहानुपपत्त्या युज्यतेऽनुगतावच्छेदकैकधर्मापेक्षा । इह त्वाकाशकालादिव्यक्तिरेकैकेति तत्कारणताग्रहे आनन्त्यव्यभिचारशङ्काया असम्भवात्किमवच्छेदकधर्मग्रहेण । न च कारणताया ससम्बन्धिकपदार्थतया सम्बन्धितावच्छेदकप्रकारकज्ञानसाध्यज्ञानत्वावच्छेदकाग्रहे तद्ग्रहानु-

(१) कारणत्वमिति पा० २ पु० ।
(२) जातीयत्वमिति पा० २ पु० ।

रपि तदवच्छेदकस्याभावात् । न ह्याकाशादीनां कारणत्वं केनाप्यवच्छिद्यते । नापि तृतीयः । अनन्यथासिद्धत्वं ह्यन्यथासिद्धिविरहः । अन्यथासिद्धिश्च प्रकारान्तरेणोत्पत्तिर्ज्ञप्तिर्वा । अन्यत्वं च कार्यापेक्षयान्यापेक्षया वा । न तावदाद्यः । दण्डादेरप्यकारणत्वप्रसङ्गात् । न हि घटादिभिन्नप्रकारेण दण्डादेर्नोत्पत्तिः । नित्यस्य कार्यमात्रं प्रति कारणत्वप्रसङ्गाच्च । एवं ज्ञप्तिपक्षोऽपि निरस्तः । न द्वितीयः । यत्किञ्चिदपेक्षया प्रकारान्तरोत्पत्तिज्ञप्त्योः सर्वसाधारण्यात् । अनन्य-

पपत्तिरिति वाच्यम् । ससम्बन्धिकप्रत्यक्ष एव तथा नियमात् । अवान्तरवैजात्यानुपस्थितावप्यतिप्रसक्तेन स्वर्गत्वेन रूपेणोपस्थिते स्वर्गविशेषे ज्योतिष्टोमादिकारणतायाः श्रुत्या बोधात् । आकाशादिकारणतायाश्चाप्रत्यक्षत्वादिति भावः । कार्यादन्येन रूपेणोत्पत्तिविरहोऽनन्यथासिद्धिरित्याद्ये दोषमाह ॥ दण्डादेरिति ॥ अनादिष्वतिव्याप्तिमप्याह नित्यस्येति । विशेष्यव्यतिरेकप्रयुक्तस्य विशिष्टव्यतिरेकस्य तत्रापि सुवचत्वादिति भावः । कार्यादन्येन प्रकारेण ज्ञप्तिविरह इति द्वितीयमप्युक्ताव्याप्त्यतिदेशेन दूषयति । एवमिति । घटादिज्ञप्तिप्रकाराद्घटत्वादेरन्येन प्रकारेण(१) दण्डादिज्ञप्तिसम्भवादव्याप्तिरित्यर्थः । सर्वेति ॥ तथा च तयोः कार्यकारणमात्रसाधारण्येन तदविरहादव्याप्तिरिति

(१) दण्डत्वादिनेति पाठविशेषो १ पु० ।

थासिद्ध्यनिर्वचनादेव न चतुर्थोपि । तन्निर्वचने त्वनन्यथासिद्धनियतपूर्ववर्तित्वेन तत्त्वे शेष(१)-वैयर्थ्यात् । न च कुम्भं प्रति कुम्भकारपितुरपि कारणत्वव्युदासार्थं(२) सहभावो विशेषणमिति वाच्यम् । अनन्यथासिद्ध्यैव तन्निरासात् । कथमन्यथा घटसहभावेपि न कपालरूपादेः कारणत्वम् । कथं

भावः । शेषेति । कार्यसहभावेत्यर्थः । व्यावर्त्यान्तरसद्भावादवैयर्थ्यमाशंक्याह ॥ न चेति ॥ अपिशब्दानन्तरं कुम्भकारपितृत्वेनेति शेषो द्रष्टव्यः । कुम्भकारत्वेन तत्कारणतायाः सिद्धान्तत्वेनाव्युदसनीयत्वात् । तद्व्यावृत्तेरन्यथासिद्धेर्वैयर्थ्यं तदवस्थमित्याह । अनन्यथासिद्ध्यैवेति । कुम्भकारपूर्ववृत्तित्वज्ञानोपजीवितज्ज्ञानविषयतया कुम्भकारपितृत्वेन तस्यान्यथासिद्धेरिह चानन्यथासिद्धिविशेषणादिति भावः । कार्यसहभावेन कृतकार्यत्वादनन्यथासिद्धिरेव त्यज्यतामित्याशङ्क्याह कथमन्यथेति । आदिपदेन कदाचित्कार्यसहभूतस्य कुम्भकारपितुरपि संग्रहः । एवं चानन्यथासिद्धेत्यस्यावश्यकत्वेनैव कुम्भकारपितृनिरासात्सहभावविशेषणवैयर्थ्यमिति भावः । न वैयर्थ्यमात्रम् किन्तु अव्याप्त्यापादकतापीत्याह ॥ कथं वेति । ननु सहभावेप्यस्ति सहभावनिरूप-

(१) नियतपूर्ववर्तित्वेनैवोपपत्तौ इति पा० २ पु० ।

(२) कारणत्वप्रसङ्गव्युदासार्थमिति पा० २ पु० ।

वा कार्यासहभूतस्य यागादेश्च कारणत्वम्। न च व्यापारद्वारा तस्य सहभाव इति वाच्यं बाधात्। न च सहभावनिरूपकत्वमेव सहभावशब्दार्थ इति वाच्यम्॥ एतदन्तर्भावेन कारणपदार्थत्वे व्यापाराग्रहदशायां कारणव्यवहारोच्छेदप्रसंगात्॥ न च

कत्वं यागादीनां तथाहि स्वर्गविशेषनियतपूर्ववर्तिता तावदपूर्वविशेषेऽवगम्यते सा च नापूर्वत्वेनैव यत्किञ्चिदपूर्वादपि फलप्रसङ्गात्। किन्तु यागविशेषापूर्वत्वेन। अत्र चापूर्वस्येव यागस्याप्यस्ति सहभावनिरूपकत्वं न हि यागमज्ञात्वा तदपूर्वत्वेन तस्य स्वर्गविशेषसहभावः सुग्रह इति। तदेव चात्र विवक्षितमिति शङ्कमानं प्रत्याह न च सहभावेति। किमेतावता भंग्यन्तरेण व्यापारद्वारा कार्यसहभावनिरूपकत्वे सत्यनन्यथासिद्धनियतपूर्ववर्त्तित्वं लक्षणमित्युच्यते उत कार्यसहभावनिरूपकत्वे सतीत्याद्येव लक्षणं यागादौ व्यापारद्वारा तत्पर्यवसानमिति विकल्प्य नाद्य इत्याह। एतदन्तर्भावेनेति। व्यापारे व्यापारान्तराभावेन व्यापारिणि यागादावपि कारणताग्रहदशायां तद्ग्रहोत्तरकल्प्यव्यापारानुपस्थित्या व्यापारद्वारा सहभावनिरूपकत्वस्य दुर्ज्ञानत्वात् कारणताऽग्रहप्रसङ्गादित्यर्थः। द्वितीयस्तु ध्वंसासहभूतस्य प्रतियोगिनः तत्राकारणताप्रसङ्गेन बहिरेव निरस्यः। ननु द्रव्यारंभकसंयोगनाशकालीनेनावयविकर्मणा स्वाव्यवहितोत्तरक्षणवर्तिध्वंसप्रतियोगिनि स्वाश्रये संयोगविभागादेरजननात्तदसहभूतकर्मविशेषव्यावृत्त्यै सहभाव-

विनश्यदवस्थकर्मादिव्यावृत्त्यर्थं सहभावो विशेषणमिति वाच्यं । तत्रापि स्वरूपयोग्यतारूपकारणत्वस्येष्टत्वात् ॥ कार्याभावस्तु तत्र सहकारिविरहात् ॥ किंच कार्यसहभूतत्वे सति अनन्यथासिद्ध-

विशेषणमास्तामित्याशंक्याह । न च विनश्यदिति । विनश्यदवस्थस्य कर्म विनश्यदवस्थकर्म विनश्यत्समवायिकर्मेत्यर्थः । एतच्च कार्योत्तरकालं सत एव समवायित्वमित्यनादृत्योक्तम् । वस्तुतस्तदाश्रयणे कर्माभाव एवेति ध्येयम् । विनश्यदवस्थं च तत् कर्म चेति न युक्तं । द्वितीयक्षणे विनश्यदवस्थस्यैव तस्य कार्यसहभूतत्वात्तेन व्यवच्छेदस्य शंकितुमशक्यत्वात् । फलोपधानस्यापि तत्र संभवेन स्वरूपयोग्यताया एवेष्टत्वाभिधानायोगात्कार्याभावस्त्वित्यादिना विरोधाच्च । न चैवं विनश्यदवस्थस्य कर्माश्रयस्य व्यवच्छेद्यताया अनाशंकितत्वात्तज्जातीयत्वं तु विनश्यदवस्थसाधारणमिति कथं तद्व्यवच्छेद इत्यभिधानानौचित्यमिति वाच्यम् । विनश्यदवस्थपदेन तद्गतकर्मण एव लक्षणादिति तद्व्यावृत्त्यै विशेषणोपादानेपि प्रत्युताव्याप्तिरित्याह स्वरूपयोग्यतेति । लाघवेन कर्मत्वस्यैव संयोगादिजनकतावच्छेदकत्वात्तस्य च विनश्यदवस्थकर्मसाधारणत्वादिति भावः । ननु तस्यापि स्वरूपयोग्यत्वे कदाचित्फलोपधानप्रसंग इत्यत आह कार्याभावस्त्विति । उत्तरकाले समवायिविरहादित्यर्थः । वस्तुतो विशेषणोपादानेपि तद्व्यावृत्तेरशक्यतया वैयर्थ्यं दुर्वारमित्याह । किंचेत्यादिना । तच्च

धनियतपूर्ववृत्तिजातीयत्वं त्वयापि वाच्यं। न तु प्रतिव्यक्ति कार्यसहभावः। अन्यथा कारणत्वानिश्चयेन प्रवृत्तिः क्वापि न स्यात्। सहभावस्य कार्योत्पत्तेः पूर्वं निरूपयितुं अशक्यत्वात्। तज्जातीयत्वं तु विनश्यदवस्थसाधारणमिति कथं सहभावेनापि विशेषणेन तद्व्यवच्छेदः॥ नापि पंचमः। सहकारिनिर्वचने आत्माश्रयप्रसंगात्॥ सहकारिपदेन तदन्यविवक्षायां विरहपदेन च संसर्गाभावविवक्षायां तदितरसंसर्गाभावप्रयुक्तकार्याभावत्वमित्यर्थः स्यात्॥ तत्र किं प्रयुक्तत्वन्तज्जन्यत्वं तद्व्याप्यत्वन्तद्व्यापकत्वं वा॥ एवं कार्याभावोपि प्रागभावो वाऽत्यंताभावो वा प्रध्वंसो वा॥ संसर्गाभावत्वेन रूपेण त्रितयमपि वा॥ न तावदाद्यः।

सत्यन्तं न जातीयत्वान्तस्य विशेषणं। सहभावस्येत्यादिवक्ष्यमाणदोषतुल्यत्वापत्तेः। किन्तु वर्त्यन्तस्य तच्च जातीयत्वस्येति ध्येयम्। सहकारित्वेति। सहकारिपदपर्यालोचनयेत्यर्थः। समुच्चित्यकारित्वस्यैव सहकारिपदार्थत्वादिति भावः। ननु सहकारिपदमत्र वस्तुतो लक्ष्यकारणताकभिन्नलक्षकमत आह। सहकारिपदेनेति।

ननु तथापि तंत्वादौ पटाद्यन्योन्याभावस्य तुर्याद्यन्योन्याभावाप्रयुक्तत्वादव्याप्तिरित्यत आह। विरहपदेनेति। तदितरेति। लक्ष्यकारणताकेतरेत्यर्थः। संसर्गाभावत्वेनेति। अन्योन्याभावे जन्यत्वाद्यसंभवादिति

प्रागभावात्यन्ताभावयोरजन्यत्वात्। ध्वंसस्यापि दंडविरहाजन्यत्वात् । संसर्गाभावत्वेन त्रितयसाधारणेप्येतदेव दूषणं । नापि द्वितीयः। यावत्तदितरसमवहितेऽपि तत्र(१) शिलाशकलादौ विकल्पितकार्याभावस्य दर्शनात् । सहकारिविरहव्यतिरेकेपिं कार्याभावसंभवाद्व्याप्यत्वात् । नापि तृतीयः। प्रागभावस्य तदितरविरहव्याप-

भावः । आद्य इति । लक्ष्यकारणताकेतरसंसर्गाभावजन्यकार्यप्रागभावाद्यन्यतरवत्वपक्ष इत्यर्थः । प्रागभावेति । तथाच तयोर्जन्यत्वविशेषणाप्रसिद्ध्या विशिष्टलक्षणासम्भव इति भावः। दंडविरहेति ॥ दण्डपदन्तदितरकारणतालक्षणाभिप्रायम् । आश्रयनाशादिजन्यत्वात्तस्येति भावः । एतदेवेति । प्रागभावात्यन्ताभावयोरजन्यत्वात् ध्वंसस्य दंडविरहाजन्यत्वादित्येवेत्यर्थः । द्वितीयः । लक्ष्यकारणताकेतरसंसर्गाभावव्याप्यकार्यप्रागभावाद्यन्यतमवत्पक्ष इत्यर्थः । यावत्तदितरेति । इदं च व्यापकत्वाभिमतबीजेतरसंसर्गाभावविरहोपदर्शनाय । शिलाशकलादावित्यादिपदेनाङ्कुरसमवायिकारणपरिग्रहः । विकल्पितेति । शिलाशकलेत्यन्ताभावस्य समवायिनि प्रागभावध्वंसाभावयोः त्रिष्वपि संसर्गाभावस्य दर्शनान्न व्याप्यत्वमित्यर्थः । तृतीय इति । लक्ष्यकारणताकेतरसंसर्गाभाव-

(१) तत्र तत्रेति पा० २ पु० ।

सर्वसत्यत्वमते यथा स्वरूपविशेषादेव घटादेश्चिरस्थायित्वं, सुखदुःखादेश्च नियमेनाशुतरविनाशित्वम्, एवं मिथ्यात्वमतेऽपि स्वरूपविशेषादेव कस्य चिच्चिरस्थायित्वं, शुक्तिरजतादेश्च स्वप्रतिभासकाल एव विद्यमानत्वमिति परिहरति-न, तवेति । ननु सत्यत्वमते स्वविनाशहेतुसमवधानावधिकसत्त्वं सर्वस्यानित्यस्य तुल्यं सुखादेरपि द्वितीयक्षण एव विनाशहेतोः स्वविषयज्ञानादेः सन्निधानान्नियमेन तृतीयक्षणे विनाश इत्याशङ्क्य सदन्यत्वमतेऽपीदं तुल्यं शुक्तिरजतादेरपि विनाशहेतुसमवधानपर्यन्तं विद्यमानत्वाङ्गीकारादित्यभिप्रेत्य तद्विनाशहेतुमाह-शुक्तिरजतमिति । अनिर्वचनीयरङ्गाकाराद्युत्पत्तिरादिपदार्थः । सुषुप्तिपूर्वक्षणे कस्य चिद्रजतभ्रमसंभवात्तस्य चोत्तरज्ञानादेरभावात्कथं विनाश इत्याशङ्क्याह-स्वजनकेति । वियदादिकं तु नोक्तकारणविनाश्यं, तद्विनाशे तस्यान्वयाद्यननुभवादित्याह-विय-

दादीति । ननु मिथ्यापदार्थानामन्वयव्यतिरेकावेवानुपपन्नौ । न हि खपुष्पादेः कुत्र चिदन्वयाद्यस्तीत्याशङ्क्य प्रपञ्चस्यासद्विलक्षण्याभ्युपगमात्तत्समानस्वभावान्वयव्यतिरेकावुपपद्येते, इतरथा सत्यस्याप्यन्वयव्यतिरेकौ कुत्रापि ममासंप्रतिपन्नाविति तव मतेऽपि तदनुपपत्तिस्तुल्या, इत्यभिप्रेत्याह-अन्वयेति । अन्यसत्तयैव 'भेदः सन्' इति प्रतीयते न स्वसत्तयेति सदृष्टान्तमुपसंहरति-तस्मादिति । किं च भेदस्य सद्बुद्धिविषयत्वेऽपि न पारमार्थिकत्वम् । अबाधितस्यैव परमार्थत्वात् । भेदस्य च "नान्योऽतोऽस्ति द्रष्टा" "नेह नानास्ति किं च न" "नात्र भिदास्ति" इत्यादिश्रुतिशतबाधितत्वादित्याह-नान्योऽतोऽस्तीति । वैपरीत्यमेव किन्न स्यादिति शङ्कते-श्रुतिरेवेति ।

श्रुतिरेव प्रत्यक्षेण बाध्यतामिति चेत् । न, अनवकाशश्रुतेः प्रत्यक्षेण बाधेऽप्रामाण्यप्रसङ्गात् । प्रत्यक्षाप्रामाण्यमप्यनुपपन्नमिति चेत् । किमनुपपन्नम्? । न हि श्रुत्येकदेशाप्रामाण्येऽध्ययनविधेरिव भेदसत्ताग्राहिप्रत्यक्षस्य सत्तावैशिष्ट्यांशेऽप्रामाण्ये किं चिद् बाधकमस्ति । भेदांशमात्रे तु विद्यमानार्थग्राहित्वाद्यथार्थानुभवत्वलक्षणप्रामाण्यं न हीयते । विद्यमानार्थज्ञानस्यैव यथार्थज्ञानत्वात् । भेदस्य सत्तानिषेध एव तन्मिथ्यात्वमिति न मिथ्येति नाममात्रम् । एतेनेदं परास्तं 'यथा भे-

दसत्ताऽधिष्ठानात्मसत्तैव, एवमभेदसत्तयैव किं न स्यात्' इति ।भेदप्रत्यक्षविरोधेनाऽऽरोपिताभेदाभावात्। अनारोपिताभेदस्य सद्रूपात्ममात्रत्वात्।

अभेदश्रुतेरन्यपरत्वासम्भवात्, स्वार्थस्यापि बाधेऽत्यन्ताप्रामाण्यं स्यात्। तथा चाध्ययनविधिव्याकोप इत्यभिप्रेत्य दूषयति। न, अनवकाशेति। तर्हि प्रत्यक्षस्याप्यनवकाशत्वादप्रामाण्यमयुक्तमिति शङ्कते-प्रत्यक्षेति। शुक्तिरजतप्रत्यक्षस्य बाधितार्थत्वेनाप्रामाण्यदर्शनाद् भेदप्रत्यक्षस्यापि सत्तावैशिष्ट्यांशेऽप्रामाण्येऽपि न किंचिद्बाधकमस्ति, श्रुतावंशमात्राप्रामाण्येऽपि अध्ययनविधिविरोधात्सा सर्वत्र प्रमाणमेवेति वैषम्यमाह-किमनुपपन्नमिति। प्रत्यक्षस्यापि धर्म्यंशे न कुत्राप्यप्रामाण्यं दृष्टमित्याशङ्क्य भेदप्रत्यक्षस्यापि भेदांशे यथार्थानुभवत्वलक्षणं प्रामाण्यं न निवार्यते, सद्विलक्षणस्यापि भेदस्य प्रतिभासदशायां विद्यमानत्वादित्याह-भेदांशेति। भेदस्य तन्मिथ्यात्वं पारिभाषिकमित्याशङ्क्याबाध्यत्वलक्षणसत्यत्वनिषेधाद्विद्यमानस्यापि बाध्यत्वलक्षणं मिथ्यात्वं त्वदनभिमतं सिद्धमित्यभिप्रेत्याह-भेदस्येति। जीवेश्वरभेदस्यान्यसत्तया सद्भाने तदभेदस्यापि तथात्वापत्त्या मिथ्यात्वं स्यादिति चोद्यं वक्ष्यमाणविधया निरस्तमित्याह-एतेनेति। किमारोपिताभेदसत्ताया अधिष्ठानात्मत्वमुच्यते, अनारोपिताभेदसत्ताया वा?। नाद्य इत्याह-भेदेति। द्वितीयं दूषयति-अनारोपितेति। शास्त्रप्रतिपाद्याभेदस्य सर्वाधिष्ठानात्ममात्रतया तदधिष्ठानस्यैवाभावादिति भावः। ननु भेदप्रत्यक्षविरोधात् 'तत्त्वम-

REPRINT FROM THE PANDIT.

जैनतर्कवार्तिकम् ।

श्रीमच्छान्त्याचार्यविरचितवृत्तिसहितम् ।

काशीस्थराजकीयसंस्कृतपाठशालायां
कतिपयव्याकरणाचार्यखण्डो-
त्तीर्णेन निगल्ये इत्युपनामकेन विठ्ठलशास्त्रिणा संशोधितम् ।

तच्च

बि० ए० पदवीधरेण बाबू भगवती प्रसादश्रेष्ठिवरेण स्वकीये
मेडिकल्-हाल नाम्नि मुद्रायन्त्रालये मुद्रितम् ।

JAIN TARK VÁRTIKAM

WITH COMMENTARY OF
SHRI MACHCHHANTYACHÁRYA

EDITED BY
SRI PANDIT VITTHAL SHÁSTRI

SCHOLAR, GOVERNMENT SANSKRIT COLLEGE, BENARES.

PRINTED AND PUBLISHED BY
BHAGAVATI PRASAD, B. A. FOR PROPRIETORS,
E. J. LAZARUS & Co,

AT THE

MEDICAL HALL PRESS, BENARES CANTT.

1917.

 [*1st Edition, 1000 Copies.*

Price Rs. 1–12.] [मूल्यम् १॥।)

श्रीगुरुः शरणम् ।

यदानन्दलवेनैव जगदानन्दमश्नुते ।
तं वन्दे प्रत्यगात्मानमसङ्गं नन्दनन्दनम् ॥

ईश्वरकृपया समाप्तकिल मुद्रणमेतस्य जैनवार्तिकवृत्तिनामकग्रन्थस्य। अयं किल सामान्यलक्षण प्रत्यक्ष अनुमान शब्दनामकपरिच्छेद चतुष्टययुतः श्रीमज्जैनमतपोषकजैनधर्मावलम्बिशान्त्याचार्य्यविद्वद्वरेण विरचितः श्रीसिद्धसेनाचार्य्यकृतसूत्राणां व्याख्यानरूपः। तत्राद्ये परिच्छेदे सामान्यलक्षणाभिधे सार्धैकादशश्लोकरूपसूत्रैः नैयायिकसंमतसन्निकर्षादिप्रमाणानां प्रामाण्यं खण्डयित्वा; ज्ञानस्यैव प्रामाण्यमुपवर्ण्य; वेदस्य प्रामाण्यं निरस्य ईश्वरखण्डनादिकं च निरूपितम् । द्वितीयपरिच्छेदे च प्रमेयस्य वास्तविकभेदं निरस्य ज्ञानस्य भेदं प्रदर्श्योपमानार्थापत्त्यनुपलब्धिप्रमाणानि निरस्य सिद्धान्तो निरूपितः सार्द्धचतुर्विंशतिसूत्रैः—। तृतीये परिच्छेदे च अनुमानस्वरूपं निरूप्य परार्थानुमानस्य वैयर्थ्यं प्रतिपाद्यान्वयपक्षधर्मतादि यथायथं निरस्य हेत्वाभासाः सप्तदशसूत्रैर्निरूपिताः। चतुर्थे परिच्छेदे चागमलक्षणान्यभिधाय अन्यशास्त्रस्यानृतत्वं प्रतिपादितम्—

यद्यपि जैनसिद्धान्तपरिदर्शका भूयांसो निबन्धा विराजन्ते तथापि जैनवार्तिकवृत्तिस्सर्वानपि ग्रन्थानतिशेते इत्यत्र न केषांचिदपि विप्रतिपत्तिः। हंत यतः अस्मिन्नन्यशास्त्रीयतात्पर्यप्रदर्शनपूर्वकतन्निरसनेन सर्वेषामपि शास्त्राणामल्पैरवाक्षरैर्बालोऽपि तात्पर्यमभिज्ञातुमर्हेत्तस्य पठनेन। अस्मिन्ज्ञाते विचारिते च सति न केवलं जैननामपि त्वास्तिकानामपि चित्तं समुल्लासमाप्नोति—

एतादृशीमुपयोगितामवलोक्य वयं संस्कृतकालेजाध्यापकव्याकरणाचार्य पं० श्रीमन्मदनमोहनपाठकैरिदं पुस्तकं वितीर्य प्रोत्साहिताः, संशोधनकार्ये प्रवृत्ताः, संशोधनकार्ये चास्मद्गुरुवर्यैर्व्याकरणोपाध्यायैश्शेंडे इत्युपाह्वसीतारामशास्त्रिभिर्बहूपकृतोस्मि——

संशोधितेप्यस्मिन्ग्रन्थे बुद्धिदोषात्सीसकाक्षरयोजकदोषाद्वाशुद्धीः क्षाम्यन्तु गुणैकपक्षपातिनो विद्वांस इति प्रार्थयते ।

विद्वदनुचरो

निगल्ये इत्युपाह्व विठ्ठलशास्त्री ।

रणम् । धर्मस्य हि यत्साधनमतोऽन्यदधिकरणमाहार्हन् । अपि च संसारस्य किं कारणं वस्त्रादिः किं वा रागादिरिति ? । वस्त्रादिस्तदास्त ईहितानां मोक्षः स्यात् । अथ रागादिस्तदा तद्विपक्षसेवया रागादिक्षयो न वस्त्रादित्यागेन । अथ वस्त्रादिधावनादौ हिंसा भवति सा च संसारकारणमिति । तन्नाप्रमत्तस्य हिंसायामपि बंधाभावात् । तदुक्तम् ।

जिअनुअमरनु अजीवो अजयाचारिस्सनिच्छनुबन्धो ।
सदयस्त्यनच्छिबन्धोहिंसानित्तेण दोसेण ॥
नुच्चालिअमिपाप इरियासमियस्सवच्चमाणस्स ।
वावज्जिज्जकुलिंगिमरिज्ज तंयोगमासज्ज ।
न कुतस्सन्निमित्तो कन्धो सुहुमोविदेसिनुंसमए ।

तस्मात्प्रमादादिरेव हिंसा । न वस्त्रादिधर्मो प्रकरणग्रहणमिति । अबंद्याः स्त्रियस्तेन निर्वान्तीति चेत् । कस्याबद्याः ? । किं सर्वस्य किं चैकस्य कस्यचिदिति ? । न तावत् प्रथमः पक्षः । चक्रवर्त्यादिभिर्वंद्यत्वात् । द्वितीयपक्षे तु गणधरादीनामप्यनिर्मोक्षत्वप्रसङ्गः । तेऽपि हि न हिंला वंद्यन्ते । अथ महत्वेऽपि सत्यवन्द्यत्वादित्युच्यते । तथाहि—महतीभिदिनदीक्षितोपि वंद्यन्ते । न पुनस्तानेति । नैतदस्ति । महत्वामहत्वव्यवस्थितेरागमनिबन्धनत्वात्, धर्मस्य पुरुषप्रधानत्वात्तेन पुरुषस्य महत्वं न स्त्रीणामित्यागमः । अतिसंश्लिष्टकर्मत्वादिति चेत् । न, कर्मणाध्यवस्य सम्यक्त्वादिप्राप्तौ तुल्यत्वात् मायाप्रधानत्वात्सत्यरहितत्वादिपि न वक्तव्यम् । यतः शीलानुरोधवलगुणरत्नसमुद्वलाऽस्वस्थाः । राद्यमपमाध्व्यः संजाताः सत्यभामाद्याः । गार्हस्थ्येपि सुसत्वाः विख्याताः शीलवत्तया जगति सीतादयः । कथं तास्तपसि विसत्वाविश्व अपि च यदि न स्त्रीणां मोक्षोस्ति तदा यमागमः कथम् ।

अट्ठसयमेगसमए पुरिसाणं निवुइ समरकायाः।
श्रीलिंगेण यवीसं सेसादसगंतुवोधव्वः॥

अपचारिकत्वादस्येति चेत्। पुरुषस्यापि हि स्त्रीवेदोदये सति स्त्रीवद्व्यवहृतिर्यथालोकेषु पुरुषकार्यंकरणात्पुरुषोपि स्त्रीति व्यवह्रीयते तदसत्। मुख्ये बाधकाभावात्। अन्यथा सर्वशब्दानां व्यवस्था विलुप्येत किंचाप्ता अव्योपचारिकशब्दैर्यदि वस्तु प्रतिपादयेयुस्तदाप्तता हीयेत प्रयोजनं चोपचारस्य न। किंचिदस्ति वेदोदये तत्संभवप्रतिपादनं प्रयोजनमिति चेत्। न, अक्षीणवेदस्यैव निर्वाणप्राप्तेः। न च स्त्रीवेदोदये सति क्षपकश्रेण्यारंभकत्वं येन तथा व्यपदेशः स्यात्। नहि दोषवन्तो गुणश्रेणिमारभन्ते। अथ कदाचित्तस्य स्त्रीवेदोदय आसीत्तेन तथा व्यवदेशस्तर्हि क्रोधाद्युदयोपि कदाचिदासीत्तेन किं न व्यपदिश्यंते क्रोध इयं तसीद्ध्यंतीति तस्मादौपचारिकत्वमागमस्य-प्रतिपाद्यमाने विधिवाक्यस्यैव प्रामाण्यमिष्यते मीमांसकस्यानुहरति अपि च चतुर्दशगुणस्थानानि स्त्रीणामर्हतोक्तानि निर्मोक्षत्वे विरुध्यन्ते एवं जिनवरकथितस्त्रीष्वपि मोक्षं न साधु मन्यन्ते विध्यादिवादिनोऽपि हि तथापि मिथ्यःदृशोऽद्वीकानावंसप्रलद्धाद्याागमायेऽनवस्थित्युत्पादविनाशकः स्यात्। सत्यतायाः क्रियनूयवोद्धोधविवुद्धितीर्थिकमतप्रादुर्भवद्धिग्रमल्लमिवान्यथाद जग्रच्छ्रीमल्लवादी विभुः

प्रामाण्य। स्कंणमबाध्यमनन्यनेयंसूत्रभिदा निगदितं विशदंयदर्थं। मोक्षार्थसाधनदाथीविधौपटीयः। प्रोक्तं प्रमाणमिह शब्दगरीय॥ १॥

सूरिश्चंद्रकुलामलैकतिलकश्चारित्ररत्नांबुधिः वसादवाति

चगिरीयोवर्द्धमानभिधः । तच्छिष्यावयवः ससूरिरभवत् श्रीशां-
तिनामाकृता येनेयं विवृत्तिर्विचारकलिकानात्मना ॥ २ ॥

अवज्ञानं हीने समधिकगुणे द्वेषमधिकं ॥ समाने सस्पर्द्धो गुणवति गुणी यत्र कुरुते ।

तदस्मिन् संसारे विरलसुजने पात्तवयाप्रतिष्ठा शास्त्रे तदपि च भवेच्छृत्यकरणम् ॥ ३ ॥

इति श्री शांत्याचार्यविरचितायां वार्त्तिकवृत्तावागमप-
रिच्छेदः चतुर्थः संपूर्णः ॥ संवत् १९६५ शाके १८३० पौष कृष्णा द्वितीया २ तिथौ सौम्यवासरे समाप्तम् ॥

त्सर्गानन्दाख्यानि च । तथा प्राणानां प्राणापानव्यानोदानसमानाख्यानां कर्माणि बहिर्नयनमधोनयनमाकुञ्चनप्रसारणाद्यशितपीतसमनयनमूर्ध्वनयनमित्यादीनि नागकूर्मकृकलदेवदत्तधनंजयाख्यानां च उद्गारोन्मीलनक्षुत्करणविजृम्भणमृतात्यागसर्वव्यापित्वाख्यानि च कर्माणि आत्मनि संप्रविलापनं स एव योगाग्निस्तस्मिन्संयमयोगाग्नौ ज्ञानेन विवेकेन दीपिते सर्वोपाधिनिरासेनोज्वालिते जुह्वति प्रविलापयन्तीत्यर्थः ।

अपरे तु किञ्च उक्तेभ्यो परं केचन यतयो ध्याननिष्ठा इन्द्रियकर्माणि ज्ञानकर्मेन्द्रियाणां कर्माणि दर्शनश्रवणादीनि वचनादानादीनि च सर्वाणि प्राणकर्माणि च प्राणस्यापानव्यानादिभेदाभिन्नस्य कर्माण्युच्छ्वासनिश्वासनिमेषोन्मेषजृंभणोद्गारादीनि सर्वाण्यपि कर्माणि ज्ञानदीपिते ज्ञानेनात्मविषयकेन दीपिते सम्यगवगमिते आत्मसंयमयोगाग्नौ स्वस्वरूप आत्मनि संयमयोगः मनोनिरोधः समाधिः स एवाग्निस्तस्मिन् जुह्वति प्राणेन्द्रियव्यापारं निरुध्य सदात्मानमेवानुभवन्तीत्यर्थ इत्याहुः ।

अन्येतु तदेवं पतञ्जलिमतानुसारेण लयपूर्वकसमाधिं ततो व्युत्थानं च यज्ञद्वयमुक्त्वा ब्रह्मत्रादिमतानुसारेण बाधपूर्वकं समाधिं कारणोच्छेदेन व्युत्थानशून्यं सर्वयज्ञफलभूतं यज्ञान्तरमाह सर्वाणीति । द्विविधो हि समाधिर्भवति लयपूर्वको बाधपूर्वकश्च ।तत्र कार्यस्य कारणव्यतिरेकेणासत्त्वात्पंचीकृतपंचभूतकार्यव्यष्टिरूपं समष्टिरूपविराट्कार्यत्वात्तद्व्यतिरेकेण नास्ति । तथा समष्टिरूपमपि पंचीकृतपञ्चभूतात्मकं कार्यमपञ्चीभूतभूतकार्यत्वात्तद्भेदेन नास्ति ।तत्रापि पृथिवी अप्कार्यत्वात्तद्भेदेन नास्ति। ता अपि तेजष्कार्यत्वात् त्तद्भेदन न सन्ति। तदपि वायुकार्यत्वात्तद्भेदेन नास्ति सोप्याकाशकार्यत्वात्तद्भेदेन नास्ति। "स वाकाशो बहुस्यामिति" परमेश्वरसङ्कल्पात्मकाहङ्कारकार्यत्वात्तद्भेदेन नास्ति । सोप्यहंकारो मायेक्षणरूपमहत्तत्त्वकार्यत्वात्तद्भेदेन नास्ति ।तदपि महत्तत्त्वं मायाकार्यत्वात्तद्भेदेन नास्ति ।तदपि मायाख्यं कारणं जडत्वेन चैतन्येध्यस्तत्वात्तद्भेदेन नास्तीत्यनुसंधानेन विद्यमानपि प्रपञ्चे चैतन्यमात्रगोचरो यः स लयपूर्वक उच्यते । एवं चिन्तनेपि तत्त्वमस्यादिमहावाक्यार्थज्ञानाभावेनाविद्यातत्कार्यस्याक्षीणत्वात् कारणसत्त्वेन पुनष्कृत्स्नप्रपंचोत्थानादयं सुषुप्तिवत्सबीजसमाधिर्न मुख्यः । मुख्यस्तु तत्त्वमस्यादिवाक्यार्थसाक्षात्कारेणाविद्यानिवृत्तौ सर्गक्रमेण तत्कार्यनिवृत्तेरनाद्यविद्यायाश्च पुनरुत्थानाभावेन तत्कार्यस्यापि पुनरुत्थानाभावान्निर्बीजो बाधपूर्वकः समाधिः स एवानेन श्लोकेन प्रद-

र्यते । तथाहि सर्वाणि स्थूलरूपाणि च इन्द्रियाणां ज्ञानेन्द्रियाणां कर्मेन्द्रियाणां च बाह्यानां मनोबुद्ध्योश्च कर्माणि शब्दग्रहणादीनि वचनादीनि च संकल्पाध्यवसायौ च प्राणानां प्राणापानादीनां कर्माणि बहिर्नयनादीनि च अनेन पञ्च ज्ञानेन्द्रियाणि पञ्च कर्मेन्द्रियाणि पञ्च प्राणा मनो बुद्धिश्चेति सप्तदशात्मकं लिंगमुक्तम् । तच्च सूक्ष्मभूतसमष्टिरूपं हिरण्यगर्भाख्यमिह विवक्षितम् सर्वाणीतिविशेषणदानात् । आत्मविषयः संयमो धारणाध्यानसम्प्रज्ञातसमाधिरूपस्तत्परिपाके सति योगो निरोधसमाधिरसंप्रज्ञाताख्यः स एवाग्निस्तस्मिन् ज्ञानदीपिते ज्ञानेन तत्त्वमस्यादिवाक्यजन्यब्रह्मात्मैक्यसाक्षात्कारेणाविद्यातत्कार्यनाशद्वारा दीपितेऽत्यन्तोज्ज्वलिते बाधपूर्वके समाधौ समष्टिलिङ्गशरीरमपरे जुह्वति प्रविलापयन्तीत्यर्थ इत्याहुस्तद्भाष्योक्तार्थव्याख्यानमेव भाष्यस्य समानाकारत्वादेवमन्यत्रापि बोध्यम् । यत्र तु भाष्यस्य विशेषाकारत्वं तत्र तु तद्वैलक्षण्यं स्पष्टमेवेत्यपि ध्येयम् ॥ २७ ॥

एवं त्रिभिः श्लोकैः पञ्चयज्ञानुक्त्वैकेन पंचयज्ञानाह—

द्रव्ययज्ञास्तपोयज्ञा योगयज्ञास्तथा परे ।
स्वाध्यायज्ञानयज्ञाश्च यतयः संशितव्रताः ॥२८॥

द्रव्ययज्ञा इति । द्रव्यत्याग एव यज्ञो येषां ते द्रव्ययज्ञाः ।

वापीकूपतडागादिदेवतायतनानि च ।
अन्नप्रदानमारामः पूर्तमित्यभिधीयते ॥
शरणागतसंत्राणं भूतानां चाप्यहिंसनम् ।
बहिर्वेदि च यद्दानं दत्तमित्यभिधीयते ॥

इतिस्मृत्युक्तपूर्तदत्ताख्यस्मार्तकर्मपराः । द्रष्टाख्यं श्रौतं कर्म तु दैवमेवापर इत्यत्रोक्तम् । अन्तर्वेदिदानमपि तदन्तर्भूतमेव तथा पंचाग्निसेवनादि तप एव यज्ञा येषां ते तपोयज्ञास्तपस्विनः कृच्छ्रचान्द्रायणादि तपो येषामिति वा । तथा योगश्चित्तवृत्तिनिरोधोष्टांगो यज्ञो येषां ते योगयज्ञाः । यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसम्प्रज्ञातसमाधिरूपाष्टांगानुष्ठानद्वाराऽसंप्रज्ञातसमाधिपरा इत्यर्थः । तत्राहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः पञ्च । शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः पञ्च । पद्मकस्वस्तिकाद्यनेकविधमासनं । तत्राशास्त्रीयप्राणिवधो हिंसा । अयथार्थभाषणमवध्यहिंसानुकूलयथार्थभाषणं

चानृतमसत्यम् । अशास्त्रीयमार्गेण परद्रव्यस्वीकरणं स्तेयम् । अशास्त्रीयस्त्रीपुंमेलनं मैथुनं । शास्त्रानिषिद्धमार्गेण देहयात्रानिर्वाहकाधिकभोगसाः धनाङ्गीकारः परिग्रहः । एतेषां निवृत्तिलक्षणाः यमाः । शौचं मृज्जलादिभिः कायादिक्षालनं हितमितमेध्याशनादि च बाह्यं मैत्रीमुदितादिभिर्मदमानरागद्वेषादिचित्तमलक्षालनमान्तरं च । विद्यमानभोगोपकरणादधिकोपकरणस्यानुपादित्सारूपा चित्तवृत्तिः सन्तोषः । क्षुत्पिपासाशीतोष्णादिद्वन्द्वसहनं तपः काष्ठमौनाकारमौनादिव्रतानि च । तत्रेङ्गितेनापि स्वाभिप्रायाप्रकाशनं काष्ठमौनमवचनमात्रमाकारमौनमिति भेदः । मोक्षशास्त्राध्ययनं स्वाध्यायः । सर्वकर्मणामीश्वरे फलनिरपेक्षतयार्पणं ईश्वरप्रणिधानम् । एते नियमाः । स्वाध्यायज्ञानयज्ञाश्च । स्वाध्यायो यथाविधिवेदाभ्यासो यज्ञो येषान्ते स्वाध्याययज्ञा वेदाभ्यासपराः । ज्ञानं पूर्वोत्तरमीमांसाविचारेण वेदार्थपरिज्ञानं यज्ञो येषान्ते ज्ञानयज्ञाः वेदार्थनिश्चयपराः यतयो यत्नशीलाः सम्यक् शितानि तीक्ष्णीकृतान्यतिदृढानि व्रतानि येषां ते संशितव्रताः । एतद्द्वयं सर्वेषां विशेषणमन्त्यानां वेति बोध्यम् ।

एतान्यपि मुमुक्षुभिः कर्तव्यानीति सूचयितुं पुनरपि यज्ञान्तराण्याह द्रव्येति । उक्तेभ्योऽपरे केचन मुमुक्षवः द्रव्ययज्ञाः सत्पात्रेषु नियमेन श्रद्धया द्रव्यनिक्षेपणमेवास्माकं यज्ञ इति ये कुर्वन्ति ते द्रव्ययज्ञाः । केचन तपोयज्ञाः तपश्चान्द्रायणप्राजापत्याद्युपवासादिरूपं वा इदमेवास्माकं यज्ञ इति ये कुर्वन्ति ते तपोयज्ञाः । केचन योगयज्ञाः योगः आसनप्राणायामादिभिः स्वाङ्गैर्युक्तो लक्ष्ये चित्तस्थैर्यलक्षण एव यज्ञो येषां ते योगयज्ञास्तथा केचन स्वाध्यायज्ञानयज्ञाः स्वाध्याययज्ञाः ज्ञानयज्ञा इति रूपद्वयं द्वन्द्वान्ते श्रूयमाणयज्ञशब्दस्य प्रत्येकं सम्बद्धत्वात् । "तस्य वा एतस्य यज्ञस्य द्वावनध्यायौ यदात्माऽशुचिर्यद्देश" इतिश्रुत्युक्तानध्यायद्वयं त्यक्त्वा सर्वदा वेदपारायणमेवास्माकं यज्ञ इत्यध्ययनविधिनियमेन ये कुर्वन्ति ते स्वाध्याययज्ञास्तथा केचन ज्ञानयज्ञाः ज्ञानं ज्ञानशास्त्रपरिशीलनमिदं नो यज्ञ इति सदा ये कुर्वन्ति ते ज्ञानयज्ञाः । एवं मोक्षार्थं यतयो यत्नशीलाः संशितव्रतास्तत्र तत्र स्वनिष्ठायां संशितमातितीक्ष्णं व्रतं नियमो येषां ते संशितव्रताः बहवः सन्तीति द्रव्यत्यागस्य तपसो योगस्य स्वाध्यायावृत्तेः शास्त्रपरिशीलनस्य च यज्ञत्वं सूचितं भवतीत्यन्ये ।

परे तु यज्ञान्तरमाह । यतयो यत्नशीलाः सम्यक् शितान्यतिदृढानि

व्रतानि पूर्वोक्तान्यहिंसादीनि पंच येषां ते संशितव्रता व्रतयज्ञा इत्यर्थः। तथाच योगसूत्रं "ते जातिदेशकालसमयानवच्छिन्नाः सार्वभौमा महाव्रतमिति" तत्राहिंसा जात्यवच्छिन्ना मृगातिरिक्तान्न हनिष्यामीति देशावच्छिन्ना न तीर्थे हनिष्यामीति कालावच्छिन्ना न चतुर्दश्यां न पुण्येऽहनि चेति। प्रयोजनविशेषरूपसमयावच्छिन्ना च देवब्राह्मणप्रयोजनव्यतिरेकेण न हनिष्यामीति युद्धं विना न हनिष्यामीति वा। एवं विवाहादिप्रयोजनव्यतिरेकेणानृतं न वदिष्यामीति एवमापत्काले क्षुदपायार्थाद्व्यतिरिक्तं स्तेयं न करिष्यामीति। एवमृतुकालाद्यतिरिक्तकाले पत्नीं न गमिष्यामीति गुर्वादिप्रयोजनं विना न परिग्रहीष्यामीति यथायोगमवच्छेदो बोध्यः। एतादृगवच्छेदपरिहारेण यदा सर्वजातिसर्वदेशसर्वकालसर्वप्रयोजनेषु भवाः सार्वभौमाः अहिंसादयो भवन्ति महता प्रयत्नेन परिपाल्यमानत्वात् तदा ते महाव्रतशब्देनोच्यन्ते। एतादृशव्रतदार्ढ्ये च कामक्रोधलोभमोहानां नरकद्वारभूतानां चतुर्णामपि निवृत्तिर्भवति। तत्राहिंसया क्षमया क्रोधस्य ब्रह्मचर्येण वस्तुविचारेण च कामस्य अस्तेयापरिग्रहरूपेण सन्तोषेण लोभस्य सत्येन यथार्थज्ञानरूपेण विवेकेन मोहस्य तन्मूलानां च सर्वेषां निवृत्तिरिति तत्फलं बोध्यमित्याहुस्तन्मतेऽत्र यज्ञषट्कं ज्ञेयं मूलभाष्ययोस्तूभयत्र समानत्वमेव ॥ २८ ॥

एकादशं यज्ञमाह—

अपाने जुह्वति प्राणं प्राणेऽपानं तथापरे ।
प्राणापानगती रुद्ध्वा प्राणायामपरायणाः ॥२९॥

अपाने इति। अपरे पूर्वविलक्षणा अपानेऽपानवृत्तौ शरीराभ्यन्तरप्रवेशरूपायां प्राणवृत्तिं बहिर्निर्गमनरूपां जुह्वति प्रक्षिपन्ति बाह्यवायोर्देहान्तःप्रवेशेन पूरकाख्यं प्राणायामं कुर्वन्तीत्यर्थः। तथा प्राणेऽपानं जुह्वति अभ्यन्तरवायोर्बहिर्निर्गमनेन रेचकाख्यं प्राणायामं कुर्वन्तीत्यर्थः। प्राणापानयोर्गती मुखनासिकाद्वारा बहिर्निर्गमनाधोगमनरूपे रुद्ध्वा निगृह्य प्राणायामपरायणाः प्राणायाम एव परमयनं गतिर्येषां ते तथा सन्तः कुम्भकाख्यं प्राणायामं कुर्वन्तीत्यर्थः। अत्र श्रुतिरपि।

आत्मा देवानां भुवनस्य गर्भो।
यथा वशं चरति एष देवः॥

घोषा इदं यस्य शृण्वीत रूपं ।
तस्मै वाताय हविषा विधेमेति ।

भाष्यं । तस्मै वाताय प्राणमुख्याय वायुर्वै गौतम सूत्रमित्यादिश्रुतेर्वाताय हिरण्यगर्भाय हविषा हविर्द्रव्येण यथोचिताहाररूपेण कृत्वा विधेम परिचरेम । तस्मै कस्मै यस्येदमनुभूयमानं रूपं घोषाः अनहतध्वनयस्तथा शृण्वीत श्रवणविषयीकुर्वीत यथा एष प्राणलक्षणो देवः वशे चरति वशवर्ती भवति किंभूतो देवः देवानामात्मान्तर्यामी न केवलं देवानामपि तु भुवनस्य गर्भो बीजरूपः इति ।

यथा यथा सदाभ्यासान्मनसः स्थिरता भवेत् ।
वायुवाक्कायदृष्टीनां स्थिरता च तथा तथा ॥ इत्युक्तेश्च ॥ २९ ॥
द्वादशं यज्ञमाह ।

अपरे नियताहाराः प्राणान्प्राणेषु जुह्वति ।
सर्वेऽप्येते यज्ञविदो यज्ञक्षपितकल्मषाः ॥ ३० ॥

अपरे इति । नियतः परिमित आहारो येषां ते नियताहाराः सन्तः प्राणान् वायुभेदान्प्राणेषु जितेषु वायुविशेषेषु जुह्वति यस्य यस्य जयः क्रियते तस्मिन्नितरानजितान्वायुविशेषान् जुह्वति ते तत्र प्रविष्टा इव भवन्तीत्यर्थः ।

अपरे तु पापक्षयार्थिनो मुमुक्षोः प्राणायामोऽपि यज्ञः कर्तव्य इति सूचयितुमाह अपान इति । केचन मुमुक्षवः प्राणे प्राणवृत्तौ वायुनिर्गमनाड्यामपानमपानवृत्तिं जुह्वति पूरकं कुर्वंति । ततः प्राणापानगती रुद्ध्वा मुखनासिकाभ्यां वायोर्बहिर्गमनं प्राणस्य गतिस्ताभ्यां वायोरन्तःप्रवेशोऽपानगतिरेते प्राणपानगती रुद्ध्वा कुम्भकं कृत्वा तथाऽपानेपानवृत्तौ वायुप्रवेशनाड्यां प्राणं प्राणवृत्तिं जुह्वति रेचकाख्यं प्राणायामं कुर्वन्तीति योजना । यद्वा केचनापरे प्राणायामपरायणाः मुमुक्षवः प्राणापानयोर्गती मुखनासिकाभ्यां वायोर्निर्गमप्रवेशौ त्रिकूटे निरुद्ध्य ततो हृदये प्राणेऽपानं तथापाने प्राणं च जुह्वति प्राणेनापानमपानेन प्राणं च जयंत्येकीकुर्वन्ति । तेन सर्वनाडीषु स्थितं पापं सर्वं भस्मीभवतीत्यर्थः । किंचापरे केचन मुमुक्षवः नियताहाराः स्वल्पाहाराः क्षीराद्यत्याहारेणान्तर्वायूनां वशत्वसम्पादनाय प्राणानन्तर्वायून्प्राणेषु तेषु वायुभेदेषु जुह्वति वस्तिधौत्यादिक्रिययान्तःशोधनं कुर्वन्तीत्यर्थ इत्याहुः ।

अन्येतु प्राणायामयज्ञमाह सार्द्धेन। अपानेऽपानवृत्तौ प्राणं प्राणवृत्तिं जुह्वति प्रक्षिपन्ति। बाह्यवायोः देहाभ्यन्तरप्रवेशेन पूरकाख्यं प्राणायामं कुर्वन्तीत्यर्थः। तथा प्राणे प्राणवृत्तावपानमपानवृत्तिं जुह्वति शरीरवायोर्बाहिर्निर्गमनेन रेचकाख्यं प्राणायामं कुर्वन्तीत्यर्थः। पूरकरेचककथनेन च तत्सहचारी कुम्भकोपि द्विविधः कथित एव। यथाशक्ति वायुमापूर्य्यानन्तरं श्वासनिरोधः क्रियमाणोन्तःकुम्भकः यथाशक्ति वायुं विरिच्यानन्तरं क्रियमाणः प्रश्वासनिरोधो बहिष्कुम्भकः। एतत्प्राणायामत्रयानुवादपूर्वकं चतुर्थकुम्भकमाह प्राणापानगती आन्तरस्य वायोर्मुखनासिकाभ्यां बहिर्निर्गमः श्वासः प्राणस्य गतिः। बहिर्निर्गतस्यान्तःप्रवेशः प्रश्वासोऽपानस्य गतिः। तत्र पूरके प्राणगतिनिरोधः रेचकेऽपानगतिनिरोधः कुम्भके तूभयगतिरोध इति क्रमेण युगपच्च श्वासप्रश्वासाख्ये प्राणापानगती रुद्ध्वा प्राणायामपरायणाः सन्तः अपरे पूर्वविलक्षणाः नियताहारा आहारनियमादियोगसाधनविशिष्टाः प्राणेषु बाह्याभ्यन्तरकुम्भकाभ्यासान्निगृहीतेषु प्राणान् ज्ञानेन्द्रियकर्मेन्द्रियरूपान् जुह्वति चतुर्थकुम्भकाभ्यासेन विलापयन्तीत्यर्थः। तदेतत्सर्वं भगवता पतंजलिना विस्तरेण सूत्रितं। "बाह्याभ्यन्तरस्तम्भवृत्तिर्देशकालसंख्याभिष्परिदृष्टो दीर्घसूक्ष्म इति"। बाह्यगतिनिरोधरूपत्वाद्बाह्यवृत्तिः पूरकः। आन्तरगतिनिरोधरूपत्वादान्तरवृत्ती रेचकः। यद्वा बाह्यो रचकः आन्तरः पूरकः। युगपदुभयगतिनिरोधः स्तम्भस्तद्वृत्तिः कुम्भकः। त्रिविधोऽयं प्राणायामो देशेन कालेन संख्यया च परीक्षितो दीर्घसूक्ष्मसंज्ञो भवति। यथा घनीभूतस्तूलपिण्डः प्रसार्य्यमाणो विरलतया दीर्घः सूक्ष्मश्च भवति तथा प्राणोपि देशकालसंख्याधिक्येनाभ्यस्यमानो दीर्घो दुर्लक्षतया सूक्ष्मोपि सम्पद्यते। तथाहि हृदयान्निर्गत्य नासाग्रसंमुखं द्वादशांगुलपर्यन्ते देशे श्वासः समाप्यते। तत एव च परावृत्य हृदयपर्यन्तं प्रविशतीति स्वाभाविकी प्राणापानयोर्गतिः। अभ्यासेन तु क्रमेण नाभेराधाराद्वा निर्गच्छति नासान्तश्च चतुर्विंशत्यङ्गुलपर्यंते षट्त्रिंशदङ्गुलपर्य्यंते वा दशे समाप्यते। एवं प्रवेशोपि तावानेव गन्तव्यः। तत्र बाह्यदेशव्याप्तिर्निवाते देशे ईषीकादिसूक्ष्मतूलक्रिययाऽनुमातव्या। अन्तरपि पिपीलिकास्पर्शसदृशेन स्पर्शेनानुमातव्या। सेयं देशपरीक्षा। तथा निमेषक्रियावच्छिन्नस्य कालस्य चतुर्थो भागः क्षणस्तेषामियत्तावधारणी या स्वजानुमण्डलं पाणिना त्रिष्परामृश्य छोटिकावच्छिन्नः कालो मात्रा। ताभिः षड्त्रिंशं

न्मात्राभिः प्रथम उद्घातो मन्दः । स एव द्विगुणीकृतो द्वितीयो मध्यः स एव त्रिगुणीकृतस्तृतीयस्तीव्र इति । नाभिमूलात्प्रेरितस्य वायोर्विरिच्यमानस्य शिरस्यभिहननमुद्घात इत्युच्यते सेयं कालपरीक्षा । संख्यापरीक्षा च प्रणवजपावृत्तिभेदेन वाश्वासप्रश्वासप्रवेशगणनया वा कर्तव्या । कालसंख्ययोः कथंचिद्भेदविवक्षया पृथगुपन्यासः । यद्यपि कुम्भके देशव्याप्तिर्नावगम्यते तथापि कालसंख्याव्याप्तिरवगम्यत एव । स खल्वयं प्रत्यहमभ्यस्तो दिवसपक्षमासादिक्रमेण देशकालप्रचयव्याप्यतया दीर्घः परमनैपुण्यसमाधिगमनीयतया च सूक्ष्म इति त्रिविधः प्राणायामो निरूपितः । चतुर्थं फलभूतं सूत्रयति स्म "बाह्याभ्यन्तरविषयाक्षेपी चतुर्थ इति" । बाह्यविषयश्वासो रेचकोऽभ्यन्तरविषयः प्रश्वासः पूरको वैपरीत्यं वा । ता उभावपेक्ष्य सकृद्बलवद्विधारकप्रयत्नवशाद्भवति बाह्याभ्यन्तरभेदेन द्विविधः तृतीयः कुम्भकः । तावुभावनपेक्ष्यैव केवलकुम्भकाभ्यासपाटवेनासकृद्बलवद्विधारकप्रयत्नवशाद्भवति चतुर्थः कुम्भकः । तथाच बाह्याभ्यन्तरविषयाक्षेपी तदनपेक्ष इत्यर्थः । यद्वा बाह्यो विषयो द्वादशान्तादिराभ्यन्तरो हृदयनाभिचक्रादिः तौ द्वौ विषयावाक्षिप्य पर्यालोच्य यः स्तंभरूपो गतिविच्छेदः स चतुर्थः प्राणायाम इति । तृतीयस्तु बाह्याभ्यन्तरौ विषयावपर्य्यालोच्यैव सहसा भवतीति विशेषः । एतादृशश्चतुर्विधः प्राणायामोऽपाने इत्यादिसार्द्धश्लोकेन दर्शित इत्याहुः ।

एवं दैवादियज्ञान्नियमेन कुर्वतां तद्यज्ञानुष्ठानस्य फलमाह सर्वेपीति यज्ञान्विदंत्यनुतिष्ठन्तीति यज्ञविदो दैवादियज्ञानुष्ठायिन एते निरुक्ताः सर्वेपि यज्ञानुष्ठानानन्तरभावित्वादेतेषामन्नं यज्ञशेषं यज्ञशिष्टत्वादेवामृतं तत् भुंजत इति यज्ञशिष्टामृतभुजः । यद्वा यज्ञानुष्ठानेन शिष्टो यज्ञशिष्टो नित्यत्वादमृतः कालः भोजनसंबंधत्वादमृतशब्देन काल उच्यते यज्ञशिष्टो योऽमृतः कालस्तस्मिन्भुंजत इति यज्ञशिष्टामृतभुजः सन्तो यज्ञक्षपितकल्मषाः यज्ञैर्नियमेनानुष्ठितैः क्षपितो नाशितः कल्मषो येषां ते यज्ञक्षपितकल्मषाः यज्ञानुष्ठाननिःशेषविनष्टप्रतिबंधका भूत्वा सकृदुपदेशेनैव सद्गुरोरात्मज्ञानं प्राप्य सनातनं नित्यं ब्रह्म सच्चिदानन्दैकरसं यान्ति ज्ञानानुत्पत्तौ क्रमान्मुक्ता भवन्तीत्यभिप्रायः ।

अन्ये तु वदन्ति तदेवमुक्तानां द्वादशधा यज्ञविदां फलमाह सर्वेपीति । यज्ञान्विदन्ति जानान्ति विन्दन्ति लभन्ते वेति यज्ञविदो यज्ञानां ज्ञा-

तारोनुष्ठातारश्च यज्ञैरुक्तलक्षणैः क्षपितं नाशितं कल्मषं येषां ते यज्ञक्षपितकल्मषाः ॥ ३० ॥

यज्ञशिष्टामृतभुजो यान्ति ब्रह्म सनातनम् ।
नायं लोकोस्त्ययज्ञस्य कुतोन्यः कुरुसत्तम ॥३१॥

यज्ञान् कृत्वावाशिष्टकालेऽमृतममृतसदृशमन्नं भुंजन्ते इति यज्ञशिष्टामृतभुजस्ते सर्वेपि सत्त्वशुद्धिज्ञानप्राप्तिद्वारेण सनातनं नित्यं ब्रह्म यान्ति प्राप्नुवन्ति संसारान्मुच्यन्त इत्यर्थः । यथोक्तयज्ञानुष्ठाने फलमुक्त्वा तद्विहीनस्य पुरुषस्य दोषमाह नायमिति । हे कुरुसत्तम उक्तानां यज्ञानां मध्ये एकोपि यज्ञो यस्य नास्ति सोयज्ञस्तस्यायं सर्वप्राणिसाधारणोल्पसुखोपि लोको नास्ति कुतोन्यः श्रवणादिविशिष्टसाधनलभ्यः सर्वलोकातीत आत्मस्वरूपो लोकः स्यादित्यर्थः । सकामत्वे त्वन्यो लोकः स्वर्गादिर्नास्तीत्यर्थः । कुरवोपि यज्ञविद आसन् त्वं तेषु सत्तमः श्रेष्ठोतस्त्वया यज्ञवित्त्वमवश्यं सम्पादनीयमिति संबोधनाशयः ॥ ३१ ॥

उक्तानां यज्ञानां वेदमूलत्वेनाप्रामाण्यशङ्कां वारयति—

एवं बहुविधा यज्ञा वितता ब्रह्मणो मुखे ।
कर्मजान्विद्धि तान्सर्वानेवं ज्ञात्वा विमोक्ष्यसे ॥३२॥

एवमिति । एवं यथोक्ता बहुविधाः बहुप्रकारा यज्ञाः ब्रह्मणा वेदस्य मुखे द्वारे वितता विस्तीर्णा वेदद्वारेणैवैतेवगता न तु स्वोत्प्रेक्षामात्रनिर्मिता इत्यर्थः तान्सर्वान्कर्मजान्कायिकवाचिकमानसिकव्यापारोद्भवान्विद्धि जानीहि नात्मजान्निर्व्यापारो ह्यात्मा न मद्व्यापारा एतेहन्तु निर्व्यापार उदासीन इत्येवं ज्ञात्वा विमोक्ष्यसे संसारबंधनान्मुक्तो भविष्यसीत्यर्थः ।

अन्येतु उक्तेषु यज्ञेषु कोपि मोक्षसाधनो यस्य न विद्यते सोयमयज्ञस्तस्यायज्ञस्य मोक्षधर्मशून्यस्य दुर्बुद्धेरयं लोकः लोक्यत इति लोको मुक्तिसम्पादनयोग्यो मानुषो देह एव नास्ति इतोन्यो दैवो वा ब्राह्मो वा शैवो वाऽसाधारणकारणसाध्यः कुतः कस्माद्धेतोः सिध्यति न कुतोपीत्यर्थः । अधमयोनिषु पततीति भावः । त्वत्कल्पिता एवैते यज्ञा न शास्त्रीया इति चेन्न तेषां वेदैकमूलत्वादित्याह एवमिति । दैवमेवापरे यज्ञमित्येवमाद्या बहुविधा बहुप्रकारा निरुक्ता यज्ञाः सर्वे ब्रह्मणो वेदस्य मुखे द्वारेणैव वितता विस्तारेण प्रतिपादिता इत्यर्थः । ननु यज्ञविदो यांति ब्रह्म

सनातनमिति यज्ञानामपि साक्षान्मोक्षहेतुत्वं प्रतीयते किं ज्ञानप्रयासेनेत्याशंकायां न तेषामपि कर्मत्वेन न कर्मणा न प्रजयेत्यादिश्रुतिविरोधान्न नित्यफलहेतुत्वं किं त्वानित्यफलदत्वमिति सूचयितुमाह कर्मजानिति। क्रियां कुर्वद्धि कारकमिति स्मरणात्कर्मभ्यः कर्मकारकेभ्यो जाताः कर्मजा वागीन्द्रियव्यापारसम्भवास्तान्कर्मजान्कर्माण्येव तान्सर्वान्यज्ञान्विद्धि। नन्वपूर्वाः खलु यज्ञा वागादीन्द्रियव्यापारजा एवेति चेदपूर्वत्वे पूर्वत्वे वा तेषां कर्मत्वं न व्यभिचरत्यत एवानित्यफलदत्वमेवं ज्ञात्वा नित्यफलदं ज्ञानं प्राप्य संसारान्मोक्ष्यसे न त्वनित्यफलदान्यज्ञानित्यर्थ इत्याहुः ॥३२॥

ब्रह्मार्पणमित्यादिश्लोकेन सम्यग्दर्शनस्य यज्ञत्वं सम्पादितं तदनन्तरं यज्ञाश्चानेके उपदिष्टास्तन्मध्ये ज्ञानयज्ञोऽप्युपदिष्टोतस्तुल्यवन्निर्देशादितरयज्ञसाम्यप्राप्तिनिरासाय ज्ञानयज्ञं स्तौति—

श्रेयान्द्रव्यमयाद्यज्ञाज्ज्ञानयज्ञः परन्तप।

सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते ॥ ३३ ॥

श्रेयानित्यादिना। हे परन्तप द्रव्यमयाद्द्रव्यसाध्याद्यज्ञात्सर्वस्मादपि यज्ञात्संसारफलात् ज्ञानयज्ञः श्रेयान् श्रेष्ठतमः साक्षान्मोक्षफलत्वादित्यर्थः। चित्तशुद्ध्या ज्ञानं लब्ध्वाऽज्ञानात्मकं शत्रुं तापयितुं मारयितुं समर्थो भविष्यसि न कर्ममात्रेणेति सूचनाय सम्बोधनम्। तत्र हेत्वन्तरमाह सर्वमिति। यस्मात्सर्वं कर्म इष्टिपशुसोमचयनरूपश्रौतं अखिलं निरवशेषं स्मार्तं उपासनादिरूपं च ज्ञाने ब्रह्मात्मैक्यसाक्षात्कारे समाप्यते प्रतिबन्धक्षयद्वारेण पर्यवस्यति तमेतं वेदानुवचनेनेत्यादिश्रुतेः। सर्वापेक्षा च यज्ञादिश्रुतेरश्ववदिति न्यायाच्चेत्यर्थः। यद्वा हे पार्थ सर्वमग्निहोत्रादिकं कर्म सर्वमुक्तद्वादशयज्ञात्मकं प्रकृतत्वादिति सङ्कोचमाशंक्याहाखिलमविद्यमानं खिलं शेषो यस्य तदखिलमुक्तानुक्तं श्रौतं स्मार्तं चोपासनादिरूपं ज्ञाने तत्त्वसाक्षात्कारे मोक्षसाधने परिसमाप्यतेऽन्तर्भवति यावानर्थ उदपाने इत्याद्युक्तत्वात्। यथा युधिष्ठिरभीमसेनयोरपि पार्थेति शब्दार्थेऽन्तर्भावस्तथा एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्तीति श्रुत्या ज्ञानकाण्डे फले तत्त्वसाक्षात्कारे इतरकाण्डद्वयफलस्यान्तर्भाव इति सूचनाय पार्थेति सम्बोधनम् ॥ ३३ ॥

तदेतत्सर्वोत्तमं ज्ञानं केन साधनेन लभ्यते इत्याकांक्षायामाह—

तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया ।
उपदेक्ष्यंति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः ॥ ३४ ॥

तदिति । यत्र सर्वकर्मफलमन्तर्भवति पर्यवस्यति वा तज्ज्ञानं विद्धि जानीहि लभस्वेति वा आचार्यानुपगम्य प्रकर्षेण नीचैः पतनं प्रणिपातो दीर्घनमस्कारस्तेन कथं बंधः कथं मोक्षः कस्य केनोपायेन मुच्यते विद्याविद्ये कथम्भूते कोहमिदं च दृश्यं किमिति बहुविधेन परिप्रश्नेन सेवया गुरुशुश्रूषया मायाविनिर्मुक्तयेत्येवं भक्तिश्रद्धातिशयपूर्वकेणावनतिविशेषेणाभिमुखाः सन्तः गुरवो ज्ञानिनः न्यायविचारपूर्वकपदवाक्यार्थज्ञास्तत्त्वदर्शिनः तत्त्वसाक्षात्कारवन्तस्ते तुभ्यं ज्ञानं परमात्मविषयं साक्षान्मोक्षफलकं उपदेक्ष्यन्ति उपदेशेन संपादयिष्यन्ति । पदवाक्यप्रमाणज्ञैस्तत्त्वसाक्षात्कारवद्भिरेवोपदिष्टं ज्ञानं फलपर्यवसायि न तु तद्रहितैरिति भगवतो मतम् । तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठमिति श्रुतिमूलकं बहुवचनं तु बहुभ्यः श्रोतव्यं बहुधा चेति सामान्यतयाभ्यनुज्ञार्थं न त्वात्मज्ञानार्थं बहुत्वं विवक्षितमकस्मादेव तदुत्पत्तिसंभवात् । बहुवचनं त्वादरातिशयार्थं न तु बहुत्वविवक्षया एकस्मादेवाचार्यात्तत्त्वज्ञानोदये सत्याचार्यान्तरोपगमनस्यानुचितत्वादित्यन्ये ॥ ३४ ॥

तज्ज्ञानफलमाह—

यज्ज्ञात्वा न पुनर्मोहमेवं यास्यसि पाण्डव ।
येन भूतान्यशेषेण द्रक्ष्यस्यात्मन्यथो मयि ॥ ३५ ॥

यज्ज्ञात्वेति । हे पाण्डव यत्पूर्वोक्तं ज्ञानमाचार्यैरुपदिष्टं ज्ञात्वा प्राप्य एवं मोहं बंधुवधादिनिमित्तभ्रमं यथेदानीं गतोसि न तथा पुनर्यास्यसि प्राप्स्यसि । ज्ञाननिष्ठाप्रतिष्ठार्थं पुनर्ज्ञानं विशिनष्टि येनेति । येन ज्ञानेन भूतानि पितृपुत्रादीन्यशेषेण ब्रह्मादिस्तम्बपर्यन्तानि आत्मनि स्वस्मिन्प्रत्यगात्मनि त्वंपदार्थेऽथो मयि भगवति वासुदेवे तत्पदार्थे परमार्थतो भेदरहितेऽधिष्ठानभूतेऽभेदेनैव द्रक्ष्यसि अधिष्ठानातिरेकेण कल्पितस्याभावात् प्रत्यगात्माभिन्नं वासुदेवं मामात्मत्वेन साक्षात्कृत्य सर्वाज्ञाननिवृत्तौ तत्कार्याणि भूतानि न स्थास्यन्तीति भावः । यथाऽधुनाहं पाण्डुपुत्र एते मदीया इत्यहंकारममकाराभ्यां मोहं गतोसि तथा तन्मूलोच्छेदकं ज्ञानं लब्ध्वा न तं गमिष्यसीति द्योतनाय पार्थेति सम्बोधनम् ॥

अन्ये तु इदं त्रयमित्थं योजयन्ति । तत एव ज्ञानयज्ञं ब्रम्हार्पणमित्येनन मंत्रेण वर्णितं दैवादियज्ञेभ्योऽव्यवाहितसाधनेभ्यः साक्षान्मोक्षसाधनत्वादुत्कर्षयति श्रेयानिति । द्रव्यमयात् द्रव्यमंत्रतंत्रक्रियाश्रयसाध्यादनित्याल्पस्वर्गादिफलहेतोर्यज्ञादुक्तात्सर्वयज्ञजातान्नित्यनिरन्तररूपमोक्षैकफलदो ज्ञानयज्ञः श्रेयान् परमसुखप्रापक इत्यर्थः । यत्र ज्ञाने पुंसः कर्तव्यं श्रौतं स्मार्तं लौकिकं यच्च यावच्च तत्सर्वं कर्माखिलं खिलः शेषः स न विद्यते यत्र तदखिलं निःशेषं परिसमाप्यते समापितं भवति । यथा वेलां प्राप्तस्य गन्तव्यं नास्ति तथा ज्ञानं प्राप्तवतः कर्तव्यं किंचिन्नास्तीत्यर्थः । यद्वा यत्र ज्ञाने संप्राप्ते कर्म ब्रह्मकल्पशतार्जितसंचितमागामि च प्रवृत्तमप्रवृत्तं च सर्वमखिलं निरवशेषं परिसमाप्यते ज्ञानशक्त्या सूर्यप्रभया तम इव सर्वं कर्म निर्मूल्यत इत्यर्थः । यद्वा "यथा कृतायविजितायाधरे याः संयन्तीत्येतच्छ्रुत्युक्तरीत्या" लोके सर्वत्र पुण्यशरीरिभिर्यज्ञदानतपोव्रतादिरूपं यद्यत्पुण्यं क्रियते तत्सर्वं यस्मिन् ज्ञाने सम्प्राप्ते विदुषा परिसमाप्यते संप्राप्तं भवति यत्प्राप्त्या सर्वकर्मणामनुष्ठाता विद्वान्भवतीत्यर्थः ॥

केचित्तु कर्म द्वेधा खिलमखिलं चेति तत्र खिलं दुष्टफलजनकं अखिलं ज्ञानजनकं एवं सर्वमखिलं कर्म ज्ञाने परिसमाप्यते ज्ञाने पर्यवसितं भवति खिलन्तु तद्विपरीतमज्ञानपर्यवसायीत्यर्थ इत्याहुः ॥

एवं विशेषणविशिष्टं ज्ञानं कथं मे सिध्येदित्याकांक्षायां तत्साधनमाह तदिति । यत्तु द्रव्ययज्ञादिभ्यो विशिष्टतरं साक्षान्मोक्षैकफलप्रदं तज्ज्ञानं गुरुभ्यो विद्धि गुरून् प्रसाद्य तेभ्यो विजानीहीत्यर्थः । केन प्रसन्ना भूत्वा गुरवोत्यंतरहस्यमिदं ज्ञानं मह्यमुपदेक्ष्यन्तीत्याकांक्षायामाह प्रणिपातेन प्रणिपातसाष्टांगनमस्कारस्तेन सेवया काले काले श्रद्धाभक्तिभ्यां क्रियमाणशुश्रूषया च समये विनयेनोपसंगम्य क्रियमाणपरिप्रश्नेन,

> कथं बंधः कथं मोक्षो विद्या विद्ये उभे च के ।
> क आत्मा कः परात्मा च तयोरैक्यं कथं वद ॥

इत्यादि विवेकप्रश्नेन चैवं प्रणिपातशुश्रूषाविवेकप्रश्नैस्त्वयि श्रद्धां भक्तिं पांडित्यमुपदेशयोग्यतां च दृष्ट्वा प्रसन्ना भूत्वा ज्ञानिनः [illegible]संपत्तिमन्तस्तत्त्वदर्शिनः साक्षात्कारजन्यवस्तुयाथात्म्यवेदनवन्तश्चोक्तविशेषणद्वयविशिष्टैरुपदिष्टं ज्ञानं संसारनिवर्तकं भवत्यतो विशेषणद्वयेन गुरोर्भवि-

तथ्यमेवंलक्षणसंपन्ना गुरवस्ते तुभ्यं शमदमादिसाधनवते ज्ञानं ब्रह्मात्मैकत्वावगमकं निःशेषसंसारभ्रमापनोदकमुपदेक्ष्यंति दययानुग्रहिष्यंतीत्यर्थः । श्रोत्रियं ब्रह्मनिष्ठमिति श्रवणाज्ज्ञानिन इति तत्त्वबोधने गुरूणां सर्वशास्त्रार्थपरिज्ञानसंपत्तिं तत्त्वदर्शिन इति वस्तुविषयकाप्रतिबद्धानुभवसंपत्तिमपेक्ष्य विशेषणद्वयोपन्यासः । बहुवचनं तु बहुभ्यः श्रोतव्यं बहुविधेति न्यायमनुसृत्य च सत्सु बहुषु गुरुष्वत्र कश्चिदेको ब्रह्मवित्तमो लभ्यते ततः संसारभ्रमापनोदकं सम्यग्ज्ञानं सलक्षणं सेत्स्यतीत्यभिप्रायेण चोक्तं न तु बहुभ्यो ज्ञानं संपादनीयमिति । श्रोत्रियं ब्रह्मनिष्ठमित्येकवचनश्रवणात् उपसीददेकमेव सद्गुरुं ब्रह्मवित्तममिति वचनाच्च । तस्माच्छास्त्रज्ञं तत्त्वज्ञं च गुरुमाश्रयेदिति सिद्धम् ॥

सद्गुरूपदेशेन लब्धज्ञानस्य फलमाह यदिति । प्रसन्नैर्ब्रह्मविद्भिरुपदिष्टं यज्ज्ञानं ज्ञात्वा तदेकनिश्चयाप्राप्यत्वेमेवमिदानीं यथा तथा पुनर्मोहमहमेते मदीया इत्यात्मन्यद्वितीये त्वनेकत्वभ्रमं न यास्यसि त्वमहमिदमद इत्यादि मिथ्याज्ञानं त्यक्ष्यसीत्यर्थः । ननु सति द्वैतज्ञानहेतौ भूतजाते कथमात्मनोऽद्वितीयत्वमित्यत आह येनेति । आत्मैवेदं सर्वमिति सर्वस्य भूतजातस्यात्ममात्रत्वग्राहकेण येन सूक्ष्मबुद्ध्या समाधिगतेन ज्ञानेन भूतानि ब्रह्मादिस्तंबपर्यंतान्यशेषेणाशेषाणि साक्षादहमेवेदं सर्वमिति स्वाभिन्नानि द्रक्ष्यसि यथा घटशरावादि सर्वं बुद्धिसौक्ष्म्येण मृन्मात्रं चित्रं भित्तिमात्रं तरंगफेनबुद्बुदादि जलमात्रं तथा भूतजातं सर्वं स्वमात्रमेव द्रष्टासीत्यर्थः । ननु तथापि ब्रह्मात्मा चेति भेदोऽस्त्येव कथमद्वैतसिद्धिरित्यत आह अथो मयीति । तानि मयि निर्विशेषे परे ब्रह्मण्यप्यथो समनन्तरमेव द्रक्ष्यसि चैवं तव मम च सर्वात्मकत्वं दृष्ट्वा द्वयोरप्यैकत्वं त्यक्ष्यसीत्यर्थः तत्त्वमसीति श्रुतेः। यद्वा सर्वभूतात्मकमात्मानं दृष्ट्वा तमात्मानम् निर्विशेषं मयि सर्वाधिष्ठाने परे ब्रह्मणि द्रक्ष्यसि ब्रह्माभिन्नमात्मानं द्रक्ष्यसीत्यर्थः ॥ ३५ ॥

एवंविधं ज्ञानं प्राप्यापि भीष्मद्रोणगुरुस्वजनवधजनितात्पापान्मुक्तो न स्यामेवेत्याशङ्कावन्तमर्जुनमालक्ष्याह—

अपि चेदसि पापेभ्यः सर्वेभ्यः पापकृत्तमः ।
सर्वं ज्ञानप्लवेनैव वृजिनं संतरिष्यसि ॥ ३६ ॥

अपि चेदिति । महापातकोपपातकतत्समपापसंकरणमलिनीकरणा-

दीनि पापान्युक्तानि च सर्वाणि समस्तानि व्यस्तानि च ये कुर्वन्ति ते पापाः पापकारिणस्त्रिलोकस्था भूतभविष्यद्वर्तमानकालीना एतेभ्यः सर्वेभ्यः पापकारिभ्योऽपि त्वं यदि पापकृत्तमस्तैः सर्वं कृतं पापं त्वयैकेनैव यदा कृतं भवति तदा त्वं पापकृत्तमो भवितासि । एवं पापकृत्तमोऽप्यसि चेत्तत्सर्वं वृजिनार्णवं ज्ञानप्लवेन स्वस्यकूटस्थासंगचिद्रूपत्वेन विक्रियासंभवान्नाहं कर्मणां कर्त्ता सदा निष्क्रिय एवास्मीति यदविक्रियत्वज्ञानं तदेव प्लवस्तरणिस्तेनैव संतरिष्यसि किमु वक्तव्यम् भीष्मादिवधजं पापं तरिष्यसीति महामेरुं लंघयतो वालुकाकणलंघनवदपारपापार्णवन्तरतस्तव भीष्मादिवधजपापपल्वलतरणमविचार्यमेवातो धर्माधर्मतत्कार्यमहार्णवं तर्तुमिच्छतो ज्ञानमेव संपादनीयं तेनैव विद्वाञ्छतकोटिकल्पार्जितं सर्वं पापं तरति तथा च श्रुतिः नैनं पाप्मा तरति सर्वं पाप्मानं तरतीति ॥ ३६ ॥

समुद्रतरणे नौकावज्ज्ञानं पापनिवर्तने बहुकालं नापेक्ष्यते किंतु क्षणेनैव सर्वं पापं विध्वंसयतीति सदृष्टांतमुपपादयति—

यथैधांसि समिद्धोऽग्निर्भस्मसात्कुरुतेऽर्जुन ।

ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा ॥ ३७ ॥

यथेति । समिद्धः क्षुद्रकाष्ठैः प्रज्वलनेन प्रवृद्धोऽग्निरेधांसि काष्ठानि क्षणेन भस्मसात्कुरुते यथा तथा समिद्धो निरन्तरध्यानसमाधिभिः प्रवर्तितो ज्ञानाग्निर्ज्ञानमुक्तलक्षणं तदेवाग्निर्ज्ञानाग्निः सर्वकर्माणि सर्वाणि पुण्यपापमिश्ररूपाणि कर्माणि । यद्वा प्रारब्धकर्मणो भोगैकनाश्यत्वात्तद्भिन्ना ज्ञानोत्पत्तेः पूर्वभावीनि पश्चाद्भावीनि च बहुजन्मसंचितानि चेत्येवंरूपाणि सर्वाणि कर्माणि भस्मसात्करोति क्षणाद्भस्मीकरोति । यथा स्थाणुज्ञानं तत्स्वरूपावरकाज्ञाननिवर्त्तनेन सह चोरभूतादिभ्रमं विध्वंस्य भ्रमकार्यं च भयादिकं विध्वंसयति तथा निष्क्रियब्रह्मात्मत्वज्ञानमपि तदावरकाज्ञाननिवर्तनेन सहैव विदुषस्तदुद्भावितकर्तृत्वभ्रमं विध्वंस्य तत्संभावितानि सर्वाणि कर्माणि च सद्यो निर्मूलयति सर्वदा निष्क्रिय एवास्मीत्येवं विज्ञानवन्तं विद्वांसं करोति निष्क्रियब्रह्मात्मत्वविज्ञानमित्यर्थः । ननु ज्ञानमज्ञानस्यैव निवर्तकमित्यभिज्ञोक्तेर्ज्ञानस्याज्ञाननिवृत्तिरेव कार्यं न तु कर्तृत्वभ्रमतत्कार्यकर्मनिवृत्तिरिति चेन्न भ्रमादिनिवृत्तेरपि तत्कार्यत्वपर्यवसानात् । एकस्याः क्रियाया अनेककार्यकारित्वदर्शनाद्यथा ब्रह्मास्त्रपातस्य रावणवक्षश्छेदः

प्राणनिर्गमो देहपातश्च कार्यं भवति तद्वत् । उक्तवचनं तु साक्षात्तन्निवृत्तिपरं न त्वज्ञाननिवृत्त्या तत्कार्यनिवृत्तिवारकमिति बोध्यम् । ननु कर्ममात्रस्याप्यज्ञानकार्यत्वे सिद्धे कारणनाशात्प्रारब्धस्यापि संचितादिवन्निवृत्तिः स्यादेवेति चेन्न प्रवृत्तफलत्वात्तस्य निवृत्त्यनुपपत्तेः । यथा भुक्तः पूर्वभाविनः पश्चाद्भाविनोऽप्यन्नस्य त्याग उपपद्यते न तथा भुक्तान्नस्य प्रवृत्तफलत्वात्तथैवारब्धकर्मणोऽपि भोगं विना निवृत्तिर्नोपपद्यते । ननु कार्यस्य सद्भावे कारणस्यापि सद्भावोऽङ्गीकर्तव्य इति चेन्न कारणाभावेऽपि कार्याभासदर्शनात्तन्नियमाव्यवस्थितेः । जलबुद्धौ नष्टायामपि मरौ पुनर्जलाभासदर्शनात्सत्यत्वबुद्ध्यभावेऽपि प्रतिच्छायादौ व्यवहारदर्शनात्तथा देहात्मत्वसत्यत्वभ्रमत्वबुद्ध्यभावेऽपि विदुषः कर्मतत्फलाभासोपपत्तेरिति युक्तं निष्क्रियब्रह्मात्मविज्ञानस्य समाधिनाऽप्रतिबद्धतां प्रापितस्याविद्यानिःशेषनिर्मूलकत्वम् अन्यथा त्वयं घट इत्युक्तिमात्रे ब्रह्मावरकाज्ञानसद्भावप्रसंगात्तस्मात्सर्वमिदमहं च ब्रह्मैवेति विज्ञानं सकार्यं सर्वमज्ञानं निर्मूलयत्येवेति सिद्धम् ॥

अन्ये तु इदं द्वयमित्थं योजयंति । तथाहि ज्ञानस्य प्रकारान्तरेण माहात्म्यं दर्शयति अपि चेदिति । यद्यपि सर्वेभ्यः पापकारिभ्यः सकाशादतिशयेन पापकारित्वमेकस्मिन्नसंभाव्यं तथापि ज्ञानमाहात्म्यसिद्ध्यर्थमभ्युपेत्यांच्यते भगवतापि चेदिति । निपातावसंभावितार्थाभ्युपगमार्थौ चेद्यद्यपि त्वं सर्वेभ्यः पापकारिभ्योऽतिशयेन पापकार्यसि तथापि ज्ञानमेव प्लवं पोतं तेन ज्ञानप्लवेनैव सर्वं वृजिनं पापं धर्माधर्मरूपं संसारफलं कर्म समुद्रसदृशं संतरिष्यसि सम्यगनायासेन पुनरावृत्तिवर्जितत्वेन चातिक्रमिष्यसि पापवत्पुण्यस्यापि मुमुक्षवनिष्टस्वर्गादिफलत्वाद्वृजिनशब्देनोपलक्षणमतोधर्मे निवृत्तेपि धर्मप्रतिबंधान्न ज्ञानिनोऽपि मोक्षः संभवतीति शंकोत्थानमिति बोध्यम् ॥ ३६ ॥

ननु कर्मणां तरणे सत्यपि नाशो न स्यात्समुद्रवादित्याशंक्य दृष्टान्तान्तरमाह यथेति । हेर्जुन यथा समिद्धः प्रज्वलितोऽग्निरेधांसि काष्ठानि भस्मसात्कुरुते भस्मीभावं नयति तथा ज्ञानाग्निः सर्वकर्माणि पापानि पुण्यानि च प्रारब्धफलभिन्नानि भस्मसात्कुरुते तत्कारणाज्ञाननाशेन नाशयतीत्यर्थः ।

भिद्यते हृदयग्रंथिः छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे ॥

इत्यादिश्रुतेः । ननु ज्ञानं साक्षादेव कुतो न कर्मनाशकमिति चेज्ज्ञानं साक्षादज्ञानस्यैव निवर्तकमिति व्याप्तेर्लोके दृष्टत्वाद्ब्रह्मज्ञानमपि तदज्ञानं

निवर्त्तयत्तज्जन्यं कर्मबीजभूतमात्मनि कर्तृत्वभ्रमं निवर्तयति तन्निवृत्तौ च कर्मणां निवृत्तिरित्यर्थंवहि । ननु श्रुतिस्मृत्योर्ज्ञानं प्रारब्धफलात्कर्षणान्यकर्मनिवर्त्तकमिति संकोचः किमर्थमिति चेज्ज्ञानस्य सर्वकर्मनिवर्तकत्वे ज्ञानोदयसमयमेव देहपाते सत्याचार्यालाभादाचार्यवान्पुरुषो वेद उपदेक्ष्यति ते ज्ञानमित्यादिश्रुतिस्मृतिविरोधप्रसंगेन तत्संकोचोवश्यमङ्गीकार्य एवेत्यर्थवहि । यद्वा संतरिष्यसीत्यत्र तरणं नाश एव विवक्षितः तरति शोकमात्मविदित्यत्र यथेति । अस्मिन्पक्षे ज्ञानं कथं पापं नाशयतीत्याकांक्षायां सदृष्टान्तं तदेवोपपादयति यथेतीत्येवोत्थापनं द्रष्टव्यं । शुद्धाचित्तनैवेदृशं ज्ञानं लभ्यते नान्येनेति बोधनायार्जुनेति । एवंभूतेन ज्ञानेन सर्वकर्माणि दग्धवान्वर्थसंज्ञो भवेति वा द्योतनाय संबोधनम् ॥ ३७ ॥

नन्वन्येनैव परमशुद्धिकरेण केनचिदश्वमेधादिना परमपुरुषार्थसिद्धेरलमात्मज्ञानेनेत्याशङ्क्याह—

न हि ज्ञानेन सदृशं पवित्रमिह विद्यते ।

तत्स्वयं योगसंसिद्धः कालेनात्मनि विन्दति ॥ ३८ ॥

नहीति । हि यस्मात्पूर्वोक्तेन प्रकारेण ज्ञानमाहात्म्यं सिद्धमतो ज्ञानेन सदृशं तुल्यं पवित्रं परिशुद्धिकरं परमपुरुषार्थोपायभूतमन्यदिह व्यवहारभूमौ न विद्यते नास्तीत्यर्थः । तदात्मविषयं ज्ञानं किमिति सर्वेषां नोत्पद्यते तत्राह तत् ज्ञानं महता कालेन योगेन पूर्वोक्तकर्मयोगेन संसिद्धः संस्कृतः योग्यतामापन्नः सन्मुमुक्षुः स्वयमात्मन्यन्तःकरणे विन्दति लभते न तु योग्यतामनापन्नोन्यदत्तं स्वनिष्ठतया न वा परनिष्ठं स्वीयतया विंदतीत्यर्थः । यद्वा तज्ज्ञानं स्वयमेव स्वप्रयत्नेनैव योगेन निष्कामकर्मयोगेन समाधियोगेन च सिद्धः आत्मनि शुद्धात्मविषयं विंदति स्वयमेव विंदतीति वा आत्मविषयकसाक्षात्कारस्य स्वेनैव लभ्यत्वात् गुर्वादेरुपदेशमात्र एवोपयोगात् । यस्मादन्यैरपि योगसंसिद्धैरेव ज्ञानं लभ्यते तस्मात्त्वमपि तथाभूतः सन् तल्लभस्वेत्याशयः ॥ ३८ ॥

येनैकान्तेनोपायेन प्राप्यते तमुपायं पूर्वोक्तप्रणिपाताद्यपेक्षयाप्यन्तरंगमाह—

श्रद्धावांल्लभते ज्ञानं तत्परः संयतेन्द्रियः ।

ज्ञानं लब्ध्वा परां शांतिमचिरेणाधिगच्छति ॥ ३९ ॥

श्रद्धावानिति । गुरुवेदांतवाक्येष्विदमित्थमेवेति प्रमारूपास्तिक्यबुद्धिः श्रद्धा तद्वान् न केवलं श्रद्धालुत्वमेवासहायं ज्ञानप्राप्तौ हेतुरपि तु तत्परत्वमपीत्याह तत्परः गुरूपासनाश्रवणमननादिपरः जितेन्द्रियत्वाभावे श्रद्धातात्पर्ययोरकिंचित्करत्वात्तदप्यवश्यं संपाद्यमित्यभिप्रेत्याह संयतेन्द्रियः संयतानि विषयेभ्यो निवर्तितानींद्रियाणि येन सः । एवं विशेषणत्रयविशिष्टोवश्यं ज्ञानं लभते दीर्घनमस्कारादिस्तु मायावित्वादिसंभवादनैकांतिकोपि श्रद्धावत्वादिस्त्वैकांतिक उपायस्तत्र मायावित्वादसंभवादित्यर्थः। किं पुनर्ज्ञानलाभे स्यादित्यत्राह ज्ञानमिति । पूर्वोक्तेनोपायेन ज्ञानं लब्ध्वा परां मोक्षाख्यां शांतिमविद्यातत्कार्यनिवृत्तिरूपामचिरेणाव्यवधानेनैवाधिगच्छति प्राप्नोति । यथा दीपः स्वोत्पत्तिमात्रेणैवांधकारं निवर्त्तयति न तु कंचित्सहकारिणमपेक्षते तथा ज्ञानमपि स्वोत्पत्तिमात्रेणैवाज्ञानं निवर्तयति न तु कंचिदुपासनादिकमपेक्षते इति भावः ॥

अन्ये तु ननु राजसूयाश्वमेधादिक्रतुभिः कन्यादिदानैः कृच्छ्रचान्द्रायणादितपोभिश्च सर्वपापनिवृत्तिसंभवात्किं सर्वपरिग्रहत्यागमूलकशमदमादिसाधनकसंन्यासाश्रमपूर्वकात्मज्ञानेनेत्याशंकायां न औषधवद्यदुद्देशेन राजसूयादयः क्रियन्ते तस्यैवोद्दिष्टस्य पापस्य निवर्तका भवंति न तु सर्वेषां संचितागामिवर्तमानानामनेकेषामनेकरूपाणां पापानां तत्रापि पापस्यैव निवर्तका न तु बहुजन्मसंपादकपुण्यकर्मणामिदं त्वात्मज्ञानं पापानां पुण्यानां मिश्राणां च संचितादिनां सर्वेषां च कर्मणां विध्वंसने परमकारणं पवित्रतमं नैवैतादृशमन्यदस्ति मुमुक्षोः प्रयत्नेन संपादनीयमिति सूचयितुमाह नहीति । यस्मात्कारणाज्ज्ञानाग्निर्योनिषु नानाविधजन्ममरणादिमहादुःखपरम्पराप्रापकानि पुण्यपापमिश्रात्मकान्यनेककल्पशतसमार्जितान्यशेषाणि कर्माणि समूलमुन्मूलयत्यविक्रियात्मज्ञानं तस्माज्ज्ञानेन सदृशमुक्तधर्मैस्तुल्यमत्यन्तशुद्धिकरं परमपुरुषार्थसाधनतममिह लोके शास्त्रे च न विद्यते नास्ति एतादृशशुद्धिकारणं मुक्तिकारणमस्मिन् लोके लोकान्तरे च न संभवतीत्यर्थः। एतादृशं ज्ञानमनाद्यविद्यातत्कार्यविध्वंसकमधिकारी कृतश्रवणादिर्यतिः कालेन महता दीर्घेण योगसंसिद्धः योगेन ज्ञानयोगेन नित्यनिरन्तरसमाधिनिष्ठया तात्पर्येण कृतया संसिद्धः निःशेषविनष्टसर्वबाह्यवासनावत्ता संसिद्धिस्तां प्राप्तः संसिद्धः सम्यङ्निर्मूलितसर्वप्रतिबंधः सन् स्वयमात्मनि स्वान्तःकरण एव विंदति सर्वमिदमहं च ब्रह्मैवेत्यप्रतिबद्धब्रह्माकारा वृत्तिर्बुद्धा-

न्तरेण चान्द्रमासोक्तौ मण्डलकेन्द्रयोरेव पूर्वापरान्तराभावेन योगस्य विवक्षितत्वाददधिकमासार्थमपि दर्शान्तमास एवास्तु लाघवात् । 'सवितृमण्डलम्'—इत्यादिवचनेऽपि मण्डलपदस्य केन्द्रपरत्वाद्यथाभूतोऽर्थः । वचनानां काल्पनिकत्वेन र्षिभिर्मण्डलान्तमासस्यानुक्तत्वाच्च । अन्यथा सूर्यस्य मण्डलपश्चिमनेमिराश्यादिसंयोगस्य संक्रमणाङ्गीकारेऽप्यतिप्रसङ्गापत्तेः । किञ्च मण्डलान्ताभिप्रायिकाधिमासस्य निषेधार्थमुपयोगाद्व्यवहारस्य मण्डलकेन्द्रमधिकृत्य सर्वाभ्युपगमाद्व्यवहारगणितार्थे दर्शान्ताभिप्रायिकाधिमासकथनस्योचितत्वेन गणितविशेषकथनावसरे त्विनोपयुक्ताधिमासं मण्डलान्ताभिप्रायिकाधिमासकथनं ज्ञानराजगणकानामुपहासपदमित्यलं परोक्तदोषगवेषणपल्लवितेन ॥ ६ ॥

इदानीं गणकानां प्रतीत्यर्थं क्षयमासकालात् गतागतान् कतिचिद्दर्शयतिस्म ।

गतोऽब्ध्यद्रिनन्दै-९७४ र्मिते शाककाले
तिथीशै-१११५ र्भविष्यत्यथाङ्गाक्षसूर्यैः १२५६ ।
गजाद्यग्निभू-१३७८ भिस्तथा प्रायशोऽयं
कुवेदेन्दु-१४१ वर्षैः क्वचिद्गोकु-१९ भिश्च ॥ ७ ॥

वा. भा.—स्पष्टम् ।

अत्रोपपत्तिः । यदा किलैकविंशतिः शुद्धिस्तदा भाद्रपदोऽधिमासः । तस्मिन् जाते कार्त्तिकादित्रये क्षयमासः संभाव्यते । सा च तथाविधा शुद्धिः कुवेदेन्दु-१४१ वर्षान्तरे काले पुनर्भवति । किन्तु सविभागाभिः षड्भिर्घटिकाभिरधिका भवति । कदाचिदेकोनविंशत्या वर्षैस्तादृशी भवति । तत्र त्रिभागोनाभिश्चतुर्दशघटिकाभिरधिका भवति । कुवेदेन्दुवर्षेभ्यस्तथैकोनविंशतिवर्षेभ्यो 'द्विघाब्दा द्विरामैः खरामैश्च भक्ताः'-इत्यादिना लब्धेष्वधिमासेषु शेषतिथिषु शून्यं प्रथमस्थाने सव्यंशाः षड्-

घटिकाः स्युः ६ । २० । द्वितीये त्र्यंशाश्चतुर्दश १३ । ४० । अत्र उक्तं प्राग्-शोऽयं कुवेदेन्दुवर्षैः क्वचिद्गोकुभिश्चेति । प्रागयतश्चेत्यर्थादुक्तं * स्यात् ॥७॥

* विशेषशरणः—"गतोऽब्ध्यद्रिनन्दैर्मिते" इत्यादिश्लोके क्षयमासपतितवर्षान्तरज्ञानं वस्तुतस्तदाऽऽसन्नमानस्याज्ञानान्मुनीश्वरस्य नासीदिव । यादृग्वर्षान्तकालिकाधिशेषे क्षयमासपातः पुनस्तादृगेव वर्षान्तकालिकाधिशेषो यस्मिन् वर्षे तत्र क्षयमासः संभाव्यते । तदधिशेषज्ञानार्थमनुपातः । कल्पसौरवर्षैः कल्पाधिमासास्तदैकेन क इति, तद्रूपम् $= \frac{१५६३३००००००}{४३२००००००००} = \frac{१५६३३}{४३२००} = \frac{५३११}{१४४००}$, अत्र "परस्परं भाजितयोः"—इत्यादिवाक्युक्तगणिताद्—

$$रूपम् = \frac{५३११}{१४४००} = \cfrac{१}{\cfrac{१४४००}{५३११}} = \cfrac{१}{२ + \cfrac{३७७८}{५३११}} = \cfrac{१}{२ + \cfrac{१}{\cfrac{५३११}{३७७८}}} = \cfrac{१}{२ + \cfrac{१}{१ + \cfrac{१५३३}{३७७८}}}$$

$$= \cfrac{१}{२ + \cfrac{१}{१ + \cfrac{१}{\cfrac{३७७८}{१५३३}}}} = \cfrac{१}{२ + \cfrac{१}{१ + \cfrac{१}{२ + \cfrac{७१२}{१५३३}}}} = \cfrac{१}{२ + \cfrac{१}{१ + \cfrac{१}{२ + \cfrac{१}{\cfrac{१५३३}{७१२}}}}}$$

$$= \cfrac{१}{२ + \cfrac{१}{१ + \cfrac{१}{२ + \cfrac{१}{२ + \cfrac{१०६}{७१२}}}}} = \cfrac{१}{२ + \cfrac{१}{१ + \cfrac{१}{२ + \cfrac{१}{२ + \cfrac{१}{\cfrac{७१२}{१०६}}}}}}$$

$$= \cfrac{१}{२ + \cfrac{१}{१ + \cfrac{१}{२ + \cfrac{१}{२ + \cfrac{१}{६ + \cfrac{५८}{१०६}}}}}} = \cfrac{१}{२ + \cfrac{१}{१ + \cfrac{१}{२ + \cfrac{१}{२ + \cfrac{१}{६ + \cfrac{१}{\cfrac{१०६}{५८}}}}}}}$$

$$=\cfrac{१}{२+\cfrac{१}{१+\cfrac{१}{२+\cfrac{१}{२+\cfrac{१}{६+\cfrac{१}{१+\cfrac{५१}{५८}}}}}}}$$

$$=\cfrac{१}{२+\cfrac{१}{१+\cfrac{१}{२+\cfrac{१}{२+\cfrac{१}{६+\cfrac{१}{१+\cfrac{१}{\cfrac{५८}{५१}}}}}}}}$$

$$=\cfrac{१}{२+\cfrac{१}{१+\cfrac{१}{२+\cfrac{१}{२+\cfrac{१}{६+\cfrac{१}{१+\cfrac{१}{१+\cfrac{७}{५१}}}}}}}}$$

$$=\cfrac{१}{२+\cfrac{१}{१+\cfrac{१}{२+\cfrac{१}{२+\cfrac{१}{६+\cfrac{१}{१+\cfrac{१}{१+\cfrac{१}{\cfrac{५१}{७}}}}}}}}}$$

$$=\cfrac{१}{२+\cfrac{१}{१+\cfrac{१}{२+\cfrac{१}{२+\cfrac{१}{६+\cfrac{१}{१+\cfrac{१}{१+\cfrac{१}{७+\cfrac{२}{७}}}}}}}}}$$

$$=\cfrac{१}{२+\cfrac{१}{१+\cfrac{१}{२+\cfrac{१}{२+\cfrac{१}{६+\cfrac{१}{१+\cfrac{१}{१+\cfrac{१}{७+\cfrac{१}{\cfrac{७}{२}}}}}}}}}}$$

$$=\cfrac{१}{२+\cfrac{१}{१+\cfrac{१}{२+\cfrac{१}{२+\cfrac{१}{६+\cfrac{१}{१+\cfrac{१}{१+\cfrac{१}{७+\cfrac{१}{३+\cfrac{१}{२}}}}}}}}}}$$

अत्र भिन्नरूपे प्रथमद्वितीयादिलब्धिग्रहणात "छेदघ्नरूपेषु लवा"-इत्यादिनाऽऽसन्नमानानि सुखेनैव ज्ञायन्ते यथा— $\frac{१}{२}, \frac{१}{३}, \frac{३}{८}, \frac{७}{१९}, \frac{४५}{१२२}, \frac{५२}{१४१}, \frac{९७}{२६३}, \frac{७३३}{१९८२}$ । इह भास्कराचार्यगणादितस्तृतीयमानपर्यन्तमतिस्थूलत्वेनाग्राह्यत्वाच्चतुर्थपञ्चमषष्ठमानानि स्वीकृतानि सप्तमं न स्वीकृतमित्यत्र न किमपि कारणमिति पूज्यचरणो विशेषः—

"कुवेदेन्दुवर्षैः क्वचिद्गोकुवर्षैर्नवेन्द्वाद्यहीनैः कुवेदेन्दुवर्षैः ।
क्षयाख्यस्तिथिर्भास्कराद्यैर्निरुक्ता न रामारिनेत्रैः किमर्थं न वेद्मि ॥"

एतस्मिन् विशेषप्रचारे प्रचरिते सिद्धान्तशिरोमणेर्द्विधा मुद्रणे पण्डित-'म. देवेन व्यर्थं साडम्बरमसुखबोधं टिप्पणमक्षेपीति विज्ञेयम् ।' अथ विशेषोक्तपद्ये चतुर्थचरणे "न रामारिनेत्रैः किमर्थं न वेद्मि'-एतस्मिन् निषेधार्थक-न-द्वयस्य व्यर्थत्वात् 'रामारिनेत्रैः किमर्थं, वेद्मि" इत्यर्थं स्वीकृत्य पञ्चमषष्ठासन्नमानहरयोर्योग एव रामारिनेत्रमितवर्षाणि, तानि तु भास्करेण "तिथीशैर्गजाद्र्यग्निभूभिः" एतयोः शकयोः कथनेनैव तच्छकान्तरस्य तुल्यान्येव "रामारिनेत्रमितवर्षाणि ज्ञातानीति गुरुचरणे पुष्पाञ्जलिः ।

मरीचिः—क्षयायं क्षयमास उपपत्तिसिद्धोऽपि वर्त्तमानकाले कुत्रापि न दृष्ट इत्ययुक्तमेतन्निरूपणमाचार्याणामप्रसिद्धत्वात् सांशयिकत्वादिति मन्दाशङ्कां परिहरन् भुजङ्गप्रयातेनाह गत इति । षड्विंशत्यूनसहस्र-९७४ मितशकवर्षे गतेऽयं क्षयमासो गतो भूत्वा गत इत्यर्थः । ग्रन्थस्य तच्छकोत्तरं प्रवृत्तिः । ग्रन्थसमाप्त्यवसरे—

"रसगुणपूर्णमही—१०३६समशकनृपसमयेऽभवन्ममोत्पत्तिः" ।

इत्युक्तत्वात् । तथा चास्य प्रसिद्धत्वेन निश्चयत्वेन तचिह्नकथनं युक्तमिति भावः । ननु तत्रास्माद्दृशामभावात् पतित इत्यत्र किं मानम् । युक्तेरप्रयोजकत्वात् । "आरोपे सति निमित्तानुसरणम् । न तु निमित्तमस्तीत्यारोपः"—इति न्यायाच्चेति मन्दाशङ्कां परिहरति । तिथीशैरिति । पञ्चदशाधिकैकादश-१११५ शके भविष्यति क्षयमासः । तथा चोक्तकालस्यासन्ने भविष्यत्वादस्मादृशां सत्त्वेन तत्र निर्णयः सुखेन भविष्यतीति न क्षतिः । अथ प्रसङ्गात् तदग्रिमतत्पतितकालमाह अथेति । षट्पञ्चाशदधिकद्वादशशत-१२५६मितशालिवाहनशके तथा क्षयमासो भविष्यतीत्यर्थः । विशेषज्ञानार्थं तदग्रिमकालमप्याह । गजाद्रयग्निभूभिरिति । द्वाविंशत्यूनचतुर्दशशत-१३७८ मितशके भविष्यति । ननु तथाऽङ्गाक्षसूर्यमितः शकः पतितकालः कथं ज्ञात इत्यतोऽनेकभविष्यशककथने ग्रन्थविस्तरभयेनोपसंहारं वदँस्तदुत्तरमाह प्रायश इति । अयं क्षयमास उक्तलक्षणः कुवेदेन्दुवर्षैरेकचत्वारिंशदधिकशत—१४१मितवर्षैः क्षयमासपतितकालात् पुनः क्षयमासः प्रायशो बाहुल्येन किञ्चिदूनपूर्णनिश्चयेन भवति । कदा चिच्च भवत्यपि सांशयिकत्वात् । अतो ग्रन्थोक्तपूर्वतत्पतितशककालयोरेतन्मितोक्तयो-९७४, १११५ रन्तरमेकचत्वारिंशदधिकशतम् । ततो भविष्यशकज्ञानं सुलभमिति तथाऽङ्गाक्षसूर्यमितशको गतशकः कथमुक्तः पूर्वशकेनोक्तान्तराभावादत आह क्वचिद्गोकुभिश्चेति । पूर्वोक्तसम्भववर्षेष्वनियमात् क्वचित् कस्मिंश्चपि काले कदाचिदिति यावत् । एकोनविंशतिवर्षैस्तत्सम्भवसम्भावना । तथा च संभववर्षयो-१४१, १९ र्विकल्पाद्गजाद्रयग्निभूमितः शकः साधूक्तः । तथा हि अङ्गाक्षार्क-१२५६मितशकानन्तरमुक्तदिशाऽयं शकस्त्र्यूनचतुर्दशशतमितः । एकोनविंशतिवर्षाणामपि क्षयमाससम्भवकालान्तरत्वात् तच्छकात् पूर्वमप्येकोनविंशतितमे वर्षे क्षयमाससम्भवः । अतः क्षयमासान्तरवर्षाणि

द्वाविंशत्यधिकशतमपि सम्भवति । एवं तद्योगमित-१६०वर्षान्तराणामपि सम्भवः । एवमनेकधा सम्भववर्षाणीति विशेषज्ञानं तच्छकथनेन सूचितम् ।

अत्रोपपत्तिः । यदा द्वाविंशत्यादिशुद्धिस्तदा क्षयमाससम्भव इत्युक्तं प्राक् । अतोऽब्ध्यद्रिनन्दमिते शके तादृशगतशुद्धेः सत्त्वाद्भवत्येव क्षयमासः । तथा हि तथोक्तप्रकारेण शुद्धिश्चान्द्री २१ । १२ । ५२ । ३० । न चास्यास्तन्मितत्वाभावात् कथं क्षयमास इति वाच्यम् । सौरवर्षादौ मध्यमसूर्यस्य शून्यत्वेन तस्य वक्ष्यमाणबीजफलेन संस्कारात् । काले मध्यममानेन मेषादौ न यात्यतो बीजफलस्यर्णत्वादवगतमध्यमसौरवर्षादिकालादग्रे बीजफलोत्पन्नकालेन मध्यमसौरवर्षादिसम्भवात् तत्संस्कारेण द्वाविंशत्यादिशुद्धेः सत्त्वात् । यथा तत्र सूर्यबीजं 'खाभ्रखार्कैः''—इत्याद्युक्तप्रकारेणानीतं कलाद्यम् ६२ । १७ । ४२ । अस्मान्मन्दफलवत्साधितचान्द्रकालेन दिनादिना १ । ४ । १४ युता शुद्धिः २२ । १७ । ७ । न च तथाऽपि निर्णयाभावः शुद्धेः सम्भवद्योतकत्वप्रतिपादनादिति वाच्यम् । तत्र शके क्षयमासपतनस्य निश्चयात् । तथा हि मन्दफलचान्द्रदिनो- २ । १२ । २७ ना स्पष्टसौरवर्षादौ शुद्धिः १९ । ० । २५ । एवमुक्तरीत्या स्पष्टोऽब्दपः ० । ७ । ३३ । आभ्यां मेषादिसंक्रान्तयस्तत्र तिथ्यन्तद्वारैतत्सूर्योदयगतघटीषु साधितास्ता लिख्यन्ते । अत्रोक्तरीत्याऽमास्यतुलासंक्रान्तितो वृश्चिकसंक्रान्तिः प्रतिपद्यतः कार्त्तिकोऽधिमासः । एवं प्रतिपत्सङ्गजातमकरसङ्क्रान्तितः कुम्भसङ्क्रान्तिरमायामत उक्तरीत्या माघो द्विसंक्रान्तिमासोऽतः पौषस्य क्षयः । ततो मीनसंक्रान्तिः प्रतिपद्यतः फाल्गुनोऽधिमासः । एवं धूलीकर्मणा भविष्यच्छकेऽपि निश्चयोऽवगन्तव्यः । एवं यदा शुद्धिस्तदा क्षयमास इत्येकवर्षशुद्धिर्यद्गुणा खरामतष्टा शून्यं तद्वर्षान्तरेण क्षयमासात् पुनस्तत्सम्भव इति सुलभम् । शुद्धिः ११ । ३ । ५२ । ४० । एकचत्वारिंशदधिकशतगुणा खाग्नितष्टा-६ । २२ । ३० । एकोनविंशतिभिश्च-० । १४ । ३७ । ३० । अत्र निरग्रा नेत्यतः प्रायश इत्युक्तम् । एवं

तद्योगान्तरवर्षाभ्यामपि संभवसंभावना युक्ता। यद्यपि खार्कवर्ग-१४४००० वर्षैरेकवर्षीयशुद्धि-११ । ३ । ५२ । ३० गुणिता-१५९३३० त्रिंशत्तष्टा शुद्ध्यतीति तद्वर्षैः क्षयमाससंभावनं सूक्ष्मं वक्तुमुचितं तथाऽपि निर्णयाभावाद्बहुकालान्तरत्वाच्चाचार्यैरुपेक्षितम् । अथेऽप्येतच्छकयोः १६०३, १७४४ क्षयमासो गणितेन मार्गशीर्षेऽवश्यं पततीति नाप्रसिद्धिस्तथा च मत्पद्यम् ।

'गुणपूर्णनृपै १६०३ र्युगाब्धिमेघैः १७४४
समयोः शाकजयोः समैः क्षयौ स्तः ।
अधिकाविषमासि चैत्रमासे
क्षयतः प्रागपरौ भविष्यतोऽतः''–इति ॥

न च क्षयमासस्य ग्रहगणिते प्रयोजनाभावात् प्रसङ्गतो निरूपणमपि नोचितमिति वाच्यम् । अहर्गणानयने मासग्रहे तदावश्यकत्वात् । तथा हि बृहदहर्गणार्थं क्षयमासस्य द्विसंक्रान्तिकस्य द्वितीयसंक्रान्तिप्रयुक्तसंज्ञस्य सत्त्वात् तत्र निरेका गतमासा एकमासस्याभावात् । यावदधिमासान्तस्तवधे तदधिमासस्याहर्गणानयनागताधिमासाभावादेकोऽधिकमासो ग्राह्यः । क्षयमासो न्यूनश्चेति यथागतकेवलगताधिमासा ग्राह्याः । लघ्वहर्गणार्थमपि क्षयमासोनगतमासाः । अथ 'तथाऽधिमासस्य तिथीर्गृहीत्वा'-इत्याद्युक्तत्वादसंदिग्धमिदमाचार्यैरिति सुगमत्वेन स्वतो ज्ञेयत्वादुपेक्षितं क्षयमासकथनेनैव वा द्योतितमिति सर्वमवदातम् ॥ ७ ॥

इदानीमस्य प्रश्नमाह ।

यत् प्रोक्तं फलकीर्त्तनाय मुनिभिर्वर्षेऽधिमासद्वयं
तत् प्रब्रूहि कथं कदा कतिषु वा वर्षेषु तत्संभवः ।
एवं प्रश्नविदां वरेण गणकः पृष्टो विजानाति य-
स्तं मन्ये गणकाब्जकुड्मलवनप्रोद्बोधने भास्करम् ॥ ८ ॥

वा. भा.–स्पष्टम् ॥ ८ ॥

मरीचिः—ननु क्षयमासनिरूपणं त्वदुक्तमिदं पूर्वग्रन्थोक्तत्वाभावादप्रमाणमित्यतोऽस्य प्रश्नकथनव्याजेन स्वप्रागल्भ्यं सूचयंस्तदुत्तरं शार्दूलविक्रीडितेनाह यदिति । मुनिभिर्वसिष्ठादिभिर्यल्लक्षणाक्रान्तमधिमासद्वयमेकवर्षे तद्द्वयमित्यर्थः । फलकीर्त्तनाय—

"प्रायशो न शुभः प्रोक्तो ज्येष्ठश्चाषाढ एव च ।
मध्यमौ चैत्रवैशाखावधिकोऽन्यः सुभिक्षकृत् ॥
प्रायः कार्त्तिकमासस्य वृद्धिर्नेष्टेह तादृशी ।
आत्यन्तिकी यदा सा स्याज्जगदौत्पातिकं तदा ॥"
"देव कार्त्तिकमासोऽयं वर्धते नापि हीयते ।
मासानामितरेषां वै वर्धनं प्राह नारदः" ॥

"सर्वेषु मासेष्वधिमासकः स्यात् तुलादिषट्केऽपि च शून्यमासः ।
संसर्पकः सर्वभवो हि मासः सर्वेऽपि चैते खलु निन्द्यमासाः" ॥

"एतच्च मासत्रितयं सर्वकर्मसु निन्दितम् ।"
"यां तिथिं समनुप्राप्य तुलां गच्छति भास्करः ।
तयेव सर्वसङ्क्रान्तिर्यावन्मेषं न गच्छति ॥"
"यदा वक्रातिचाराभ्यां तदतिक्रमणं भवेत् ।
क्षत्रियाणामसृग्धारास्तदा पिबति मेदिनी" ॥

इत्यादिफलादेशाय ।

"एकस्मिन्नपि वर्षे यत्रेदं दृश्यते उभयोः ।
तत्रोत्तरोऽधिमासः ... ..."

इत्यादिवचनैरधिमासद्वयम् । एतदुपलक्षितक्षयमासरूपं च प्रोक्तं निःसंशयेनोक्तम् । तत् कथं कया युक्त्या संभवति । अधिमासान्तरकालस्य द्वादशमासाधिकत्वेनासंभवात् । संभवेऽपि कदा केषु मासेषु भवति । एकदा जातेऽपि पुनस्तस्मात् कतिषु कियत्संख्यापरिमितेषु वर्षेषु तत्सम्भवेऽधिमासद्वयोपलक्षितक्षयमासस्य संभावना वा भवति इति प्रब्रूहि

ग्रस्योत्तरं देहीत्यर्थः। एवमनया रीत्या। प्रश्नविदां सामानाधिकरण्येन पूर्वपक्षकर्तॄणां सुबुद्धीनां मध्ये वरेणोत्कृष्टेन महापण्डितेन । अन्यथा स्वल्पबुद्धिभिः पृष्टे यथाकथंचिदुत्तरेणोपेतया वा चरितार्थत्वात् । यो गणको ग्रहगणितगोलज्ञः पृष्टः सन् स चेद्विजानाति ज्ञात्वा सामानाधिकरण्येनोत्तरं ददाति तदाऽहं तं गणकं गणकाब्जकुड्मलवनप्रोद्बोधने गणकरूपकमलानां मुकुलभावस्तत्समूहस्य विकासने भास्करं प्रसिद्धसूर्यं मन्ये तथा चाद्यावधि केनापि तदुत्तरं नोक्तं पूर्वग्रन्थेऽनुक्तत्वात् तत् स्वस्य भास्करसमं व्यवस्थापयितुं मयैव स्वबुद्धिचोदेन प्रोक्तमित्यत्र सुबुद्धिरेव प्रमाणमिति भावः ॥ ८ ॥

वा. भा.—इत्यधिमासादिनिर्णयः ।

मरीचिः—अधिमग्रन्थस्यासंगतत्वं परिहरति फक्किकया इत्यधिमासादिनिर्णय इति । आदिपदादभीष्टत्यादिविशेषक्षयमासयोः संग्रहः स्वबुद्ध्या यथार्थतत्त्वस्योक्तत्वान्निर्णय इति । तथा च प्रकरणसमाप्तेरधिमग्रन्थस्य भिन्नविषयत्वेन सङ्गतत्वमिति भावः ।

इदानीं भूपरिधिमाह ।

प्रोक्तो योजनसंख्यया कुपरिधिः सप्ताङ्गनन्दाब्धय-४९६७
स्तद्व्यासः कुभुजङ्गसायकभुवो-१५८१ ऽथ प्रोच्यते योजनम् ।
याम्योदक्पुरयोः पलान्तरहतं भूवेष्टनं भांश ३६० हृत्
तद्भक्तस्य पुरान्तराध्वन इह ज्ञेयं समं योजनम् ॥ १ ॥

वा.भा.—भूपरिधेरुपपत्तिर्गोले कथ्यते *। योजनलक्षणं गणिते कथितमस्ति तथाऽप्यत्र यदुच्यते तत्रेदं कारणम् । भूरेकैव किन्तु यत् त्वार्यभटादिभिराचार्यैः सत्यपि नियामके पलांशदर्शनेऽन्यथाऽन्यथा तत्प्रमाणमभिहितं तच्च षट्सप्ताष्टयवमङ्गुलं कनिष्ठिकादिभेदेन शास्त्रेषूच्यते। तेनाभिप्रा-

* विशेषप्रकरणः—कथिता इत्यत्र कथ्यत इति पाठः कथं संगच्छत इति विचारणीयं धीरैः ।

येनान्येन वा यत् तैरुक्तं तदनेन स्पष्टीक्रियते । याम्योत्तरयोः पुरयोः पलांशान् वक्ष्यमाणप्रकारैर्ज्ञात्वा तेषामन्तरेणानुपातः । यदि भांशपरिधौ दक्षिणोत्तरमण्डल एतावत् पलान्तरं तदा भूपरिधौ पुरान्तरे किमिति । यल्लब्धं तावन्तो विभागाः पुरान्तरस्य क्रियन्ते । यावानेको विभागस्तावद्योजनं ज्ञेयम् । तादृशैर्योजनैर्देशान्तरं कर्त्तव्यमित्यर्थः ॥ १ ॥

वा. भा.—अभीष्टवारार्थमहर्गणश्चेत् सैको निरेक इति । अत्राहर्गणानयने यो वारः समायाति स तु मध्यमवर्त्तमानतिथावुदये । अपेक्षितस्तु स्पष्टतिथिसूर्योदये । यतोऽयं लोकव्यवहारः स्पष्टेनैव प्रवर्त्तते स्पष्टस्यैव मुख्यत्वात् । यत्रोदयात् पञ्चचत्वारिंशद्घटिका वर्त्तमानतिथिः पञ्चमी मध्यममानेन तस्यां मन्दफलघटिकास्त्रिंशन्मिता धनं क्रियन्ते तदा द्वितीयसूर्योदयाद्वर्त्तमाना स्पष्टा पञ्चमी तिथिः पञ्चदशघटिका भवति तत्र मध्यस्पष्टतिथ्योः सूर्योदयभिन्नत्वादहर्गणः सैको विधेय इत्यादि शोभनमुक्तम् । एवं स्पष्टाधिमासवशेनाहर्गणोऽपेक्षितो जातस्तु मध्यममानेनातो युक्तं सैकनिरेकत्वमधिमासानामपि तथैव शुद्धावपि शेषं भाष्ये स्पष्टमुक्तम् ।

अथाधिमासक्षयमासलक्षणमाह असंक्रान्तिमासोऽधिमास इति । अत्र गणितशास्त्रे दर्शावधिं मासं चान्द्रमुशन्ति तत्र यस्मिन् दर्शावधिके मासि मेषार्कसंक्रमणं स चैत्रो यस्मिन् वृषसंक्रमणं स वैशाख इति । एवमन्यत्रापि । यस्मिन् मासि क्रमप्राप्तं संक्रमणं न भवति स एवाधिकमास इति ।

उक्तं च

"मेषादिस्थे सवितरि यो यो मासः प्रपूर्यते चान्द्रः ।
चैत्राद्यः स ज्ञेयः पूर्त्तिर्द्वित्वेऽधिमासोऽन्त्यः"—इति ॥

अयमधिमासः स्फुटः स्पष्टमानेनैव स्यान्न मध्यममानेन । अनेन वासनानभिज्ञतया स्वच्छन्दप्रवर्त्तमानस्य स्वपक्षस्थापनाय च संप्रति वाक्यानि कल्पयतश्चोलभट्टस्य मध्यममानेनाधिक इति मतं निरस्तम् ।

"द्वात्रिंशद्भिर्गतैर्मासैर्दिनैः षोडशभिस्तथा ।
घटिकानां चतुष्केण पततीत्यधिमासकः" ॥

इति नियमोऽनर्थकः स्यादिति मध्यमः स्वीक्रियतामिति यदि ब्रूयात् प्रतिब्रूयादेनम् । किं भवता कृष्णद्वितीयायां घटिकाचतुष्टये गतेऽधिकमासारम्भः स्वीकृतः । तथा सति शिष्टसमाचारभङ्गो दूषणम् ।

किं च—

"यस्मिन् मासे न संक्रान्तिः संक्रान्तिद्वयमेव वा ।
मलमासः स विज्ञेयो मासे त्रिंशत्तमे भवेत्" ॥

इति काठकवचनं भवन्मते विरुध्येत ।

"पञ्चमे पञ्चमे वर्षे द्वौ मासावधिमासकौ ।
तेषां कालातिचारेण ग्रहाणामतिचारतः ॥
इन्द्राग्नी यत्र हूयेते मासादिः परिकीर्त्तितः ।
अग्नीषोमौ स्थितौ मध्ये समाप्तौ पितृसोमकौ ॥
तमतिक्रम्य तु यदा रविर्गच्छेत् कदाचन ।
आद्यो मलिम्लुचो ज्ञेयो द्वितीयः प्राकृतो बुधैः ॥
असंक्रान्तिर्द्विसंक्रान्तिः संसर्पांहस्पती उभौ ।
समौ च बहवश्चाब्दे त्वधिमासः परः स्मृतः" ॥

इति महाभारतलघुहारीतज्योतिर्नारदादिवाक्यानि च विरुध्येरन् । इह गणितशास्त्रे श्रौतस्मार्त्तकर्मानुष्ठानार्थे फलादेशोपयोगाय वा शृङ्गोन्नतिग्रहयुतिग्रहणादिग्रहगणितजातमुच्यते । तत्र फलादेशशास्त्रेषु नारदोक्तसंहितादिषु स्मृतिषु च स्पष्टत्वेनैव व्यवहारः । यत् तु गणिते मध्यमानयनं कृतं तत्स्पष्टत्वसाधनार्थमेव । अहर्गणोऽपि स्पष्टाधिमासवशेनैव सैको निरेकः प्राक् साधितः । किं च "यज्ञादिकालार्थसिद्धये गणितशास्त्रं वदामः" इति वदतामृषीणां यादृशो ग्रहगणितोपबन्धस्तादृश एव कर्मानुष्ठानोपयुक्तो भवति । यस्मिन् मुनिकृतशास्त्रे ग्रहयुतिमहापातादिगणितकर्म स्वल्पं दृश्यते तत् सकर्ममिति ज्ञेयम् ।

तस्याकाङ्क्षापूरणमन्यमुनिशास्त्राद्विशेषगणितप्रतिपादकात् कार्यम् । "सर्वशाखाप्रत्ययमेकं कर्म"-इतिवत् । यथा च सूर्यसिद्धान्ते महापात-साधने* गत्यन्तरं हर उक्तः स च साकाङ्क्ष एव शाकल्ये क्रान्तिगत्यन्तर-स्यैव हरत्वाभिधानादिति । तस्मात् स्पष्टत्वेनासङ्क्रान्तिमास एवाधि-कमासः । "द्वात्रिंशद्भिर्गतैर्मासैः"—इति वाक्यं मध्यममानाभिप्रायेणोक्तम् । "मासे त्रिंशत्तमे भवेत्"-इति वाक्यमुपलक्षणत्वेनाङ्गीकार्यमिति न कोऽपि दोषः । द्विसङ्क्रान्तिमासः क्षयाख्य उक्तः । द्विसंक्रान्तित्वं तदा भवति यदा चान्द्रमासमानात् सौरमासमानं न्यूनं भवति । सौरमासमानं च तदा न्यूनं भवति यदा सूर्यगतेराधिक्यं भवति । रविगतेराधिक्यं च संप्रतीदृशे रविमन्दोच्चे २ । १८ । ० । ० वृश्चिकादिस्थिते भवतीति ज्ञेयम् । कार्त्तिकादित्रय एव संप्रति स्यादिति भाष्यं व्याख्येयम् । वृश्चिकादित्रयस्येऽपि तदा स्याद्यद्याधिशेषं तात्कालिकमतिस्वल्पं स्यात् । तत् स्वल्पत्वमधिकमासे पूर्वनिकटपतिते भवेदिति क्षयमासात् पूर्वमधि-मासो नियतः । क्षयमासादूर्ध्वं यदैव सौरमासस्योपचयस्तदैवाधिकमास इति वर्षेऽधिमासद्वयमुत्पन्नम् । मासत्रयाभ्यन्तरेऽधिकमासो भवतीति भाष्यकृदभिप्रायः । न च पूर्वोऽधिमासः क्षयमासान्मासत्रयमित एवान्तरे भवतीति युक्तं क्षयमाससंलग्नोऽप्यधिमासः श्रूयते ।

"तत्प्राक्संऽर्धमासको यदि भवेत् तत्रत्यसांवत्सरं

तस्मिन् शुद्धतया क्षयेऽपि वचनात् कुर्याद्द्वयोः कोविदः" ।

इति निर्णयश्रवणात् । मासत्रयोक्तिरुपलक्षणम् । भाद्रपदोऽधिमास उदा-हरणार्थत्वेनेति । इदमधिमासद्वयं क्षयश्च स्पष्टमानेनैव । मध्यममानेन क्षयमासो नोत्पद्यते । मध्यमसौरमासमानस्य मध्यमचान्द्रमासमानाद-धिकत्वात् ।

क्षयमासोदाहरणं सकलागमाचार्यगणेशदैवज्ञैः कृतं तत् प्रदर्श्यते । शकातीतकाले १४६२ सौरपक्षे दर्शान्तसंक्रान्तयश्च । अत्र मासाः शुक्लादिका

* सूर्यसिद्धान्ते पाताधिकारे १४ श्लोको द्रष्टव्यः ।

वेद्याः । भाद्रकृष्णापक्षेऽमातिथिर्भौमे घटिकाः ४७ रव्युदयात् । तच्चोद-यात् कन्यार्को जात एतासु घटीषु । एवं सर्वत्र वेद्यम् । आश्विने ३० गुरौ घ-१४ । तत्र तुलार्कः घ-२४ अधिमासोऽयम् । कार्त्तिके ३० शनौ घ ४८ वृश्चिकेऽर्कः घ-४९ । मार्गशीर्षवदि ३० रवौ घ-३० धनुष्यर्कः घ-४७ । पौषकृष्ण-३० भौमे घ-१६ मकरेऽर्कः घ ६ क्षयमासोऽयम् । माघ-वदि-३० गुरौ घ-३ चतुर्दश्यां घ-१४ बुधे कुम्भेऽर्कः घ-३३ ।

शाके १४६३ वैशाखोऽधिमासः ।

एवं च शके १६०३ सौरपक्षे भाद्रवदि-१४गुरौ घ-३ तत्र कन्यार्कः । भाद्रवदि-३० शुक्रे घ-३ । तत्र आश्विनवदि-३० शनौ घ-३५ तुलार्कः घ-५३ । अधिमासोऽयं । कार्त्तिकवदि-३० घ-१५ चन्द्रे वृश्चि-केऽर्कः घ-४७ । मार्गशीर्षवदि ३० बुधे घ-० धनुष्यर्कः घ-१६ । पौष-वदि ३० गुरौ घ-४८ मकरेऽर्कः घ-३५ । क्षयमासोऽयम् ।

ततः शके-१७४४ भाद्रवदि १४ शनौ घ-२४ कन्यार्कः घ• ५६ । भाद्र-वदि ३० रवौ घ-२४ । आश्विनवदि ३० भौमे घ-१ तुलार्कः घ-२२, अधि-मासः । कार्त्तिके ३० बुधे घ-४४ । मार्गशीर्षशुक्ल १ गुरौ वृश्चिकेऽर्कः घ-१६ । मार्गशीर्षवदि ३० शुक्रे घ-३२ धनुष्यर्कः घ-४५ । पौषवदि ३० रवौ घ-२० मकरेऽर्कः घ-४ क्षयमासोऽयम् ।

एवं सौरपक्षे शके १८८५ आश्विनोऽधिमासः पौषः क्षयमासः ।

ततः शके २०२६ भाद्रपदोऽधिमासः पौषः क्षयः ।

ततः शके २०४५ भाद्रपदोऽधिमासः । माघः क्षयमासः । अत्रैक-वार्षिकी शुद्धिर्यावद्गोकुभिः कुवेदेन्दुवर्षैर्वा गुण्यते तदा तिथिस्थाने शून्यं भवतीति तैर्वर्षैः क्षयमाससंभव उक्तः ।

केचित्तु—

"सवितृमण्डलमेति यदा शशी तदनुसंक्रमणं कुरुते रविः ।
मखमहोत्सवनाशकरस्तदा मुनिवरैः कथितोऽधिकमासकः ॥"

इत्यादिवाक्यैर्योऽयमीदृशोऽधिकमासः स एव मखमहोत्सव
निषिद्ध इत्याहुः । अयमर्थः । योऽयं गणिते दर्शान्तः समायाति
किल रविचन्द्रविम्बकेन्द्रयोगकालः । तस्मात् कालाद्रविचन्द्रविम्बप्रा
योगो मानैक्यखण्डकलाकालेन पूर्वमासीद् भवष्यति च तदयत इति
कालः साध्योऽनुपातेन । यदि गत्यन्तरकलाभिः षष्टिघटिकास्तदा म
क्यखण्डकलाभिः किमिति स कालो भवति । अनेन कालेन दर्श
ऊनितो युक्तश्च कार्यः स तु विम्बस्पर्शमुक्तिकालयोरन्तरमिव रविचन्द्र
म्बकालो भवति । अमुमेव मण्डलान्तमासमित्याहुः । मण्डलान्तमा
नन्तरं चेद्रविसंक्रमणं तदाऽधिमासः सर्वकर्मसु निषिद्धो नान्यथाऽ
निषिद्ध इति कर्मानुष्ठानोपयोगिकालप्रतिपादकग्रहगणितशास्त्रप्रव
र्मुनिभिरयं मण्डलान्तमासोऽधिकमासनिर्णयायादृतश्चेत् तदा को
न स्वीकुर्यात् । वेद एव धर्मे प्रमाणं नान्यदिति वादिनामृषीणां श्रु
स्मृतिकर्मानुष्ठानोपयुक्तं यदेव स्मरणं तदपि वेदमूलकमेव । तस्मा
ण्डलान्तमास आर्षमूलकश्चेत् तदा प्रामाणिक एव किं बहुनोक्ते
किं च ग्रहयुतौ ध्रुवाद्दीयमानसूत्रस्ययोरेव ग्रहयोर्योगो विवक्षित
भेदयोगे च भूपृष्ठस्थदृक्सूत्रस्थयोरेव ग्रहयोर्योगो विवक्षितः ।
एव शाकल्ये भेदयोगे न दृक्कर्मदानं किं तु ग्रहयुतिकाले लम्बनद
मन्ययोगे च न लम्बनदानं किन्तु दृक्कर्मसंस्कारणमुक्तम् ।

"दृक्कर्मणैव तत्सिद्धिर्भेग्रहग्रहसंयुतौ ।
लम्बनावनती स्यातामपि सत्यन्तरद्वये ॥
दृष्टं लम्बनमन्यत्र यदिष्टाऽवनतिर्भवेत्"—इति ।

अमा सार्धं वसतः सूर्याचन्द्रमसौ यस्यां साऽमावास्
शब्देन दर्शान्त उच्यते । अत्र दर्शान्तकाले भूगर्भाद्दीयमानमर्काप
यत् सूत्रं तत्सूत्रस्थयोरेव रविचन्द्रयोर्योगः स्वीकृतः । तनोति विस
रयति वर्धमानां क्षीयमाणां वा चन्द्रकलां यः कालविशेषः स तिथि

च्छेनोच्यत इत्यत्रापि भूगर्भान्नीयमानमर्कं प्रति यत् सूत्रं यच्च भूगर्भाच्च-न्द्रं प्रति नीयमानं तत्सूत्रयोरन्तरं यदा द्वादशभागमितं तदैकैका तिथि-रिति मुनिभिः स्वीकृतम् । यत्र तेषां मुनीनां यादृशी गणितरचना तत्र स्थले तादृशोऽर्थस्तेषां संमतो विवक्षित इति गम्यते । यद्यन्यमुनिग्रन्थे विशेषो दृश्यते तदेदं मुनिकृतं सामान्यशास्त्रमिति गम्यत इति प्रागुक्त-मेव । "पदे जुहोति"—इत्यनेनाहवनीये जुहोतीतिवत् । यथा च भेदयोगे दृक्कर्मसंस्कारो न कर्त्तव्य इत्यर्थप्रतिपादके न ग्रहणादन्ययोग इति शाक-ल्यवाक्येन नक्षत्रग्रहयोगेष्विति सर्वत्र प्राप्यमाणं सूर्यसिद्धान्तवाक्यमिव । एतेनाधिकमासनिर्णयाय दर्शान्ते लम्बनसंस्कृतिं स्वकपोलकल्पितां वदन्त-श्चन्द्रग्रहणे च तिथौ दृक्कर्मसंस्कारं च वदन्तो निरस्ताः । अथ वा मुनि-मतविरुद्धं वदन्तु नाम किं ममानेन तथाऽपि ।

"शाकल्यसंज्ञमुनिना निखिलं निबद्धं
पद्यैस्तदेव विवृणोमि सवासनं स्वैः" ।

इति तेषां प्रतिज्ञाभङ्गो मम चित्तं क्षोभयति ।

"यद्यपि न भवति हानिः परकीयां चरति रासभे द्राक्षाम् ।
असमञ्जसमिति मत्वा तथाऽपि खलु खिद्यते चेतः ॥"

इति न्यायेन । किञ्च शीघ्रोच्चमन्दोच्चपाताख्यदेवताविशेषाः सौरादिशास्त्रेषूक्तास्त्वया च नीचदेवताऽप्यधिका स्वीकृता ।

"ग्रहात् प्राग्भगणार्धस्थः प्राग्मुखं कर्षति ग्रहम् ।
उच्चसंज्ञोऽपरार्धस्थस्तद्वत् पश्चान्मुखं ग्रहम् * ॥"

इत्यनेन किं न विरुध्यते ।

"दूरस्थितः स्वशीघ्रोच्चाद्ग्रहः शिथिलरश्मिभिः ॥
सव्येतराकृष्टतनुर्भवेद्वक्रगतिर्ग्रहः † ॥"

इत्यनेनापि नीचदेवतास्वीकरणं विरुध्यते । यथोच्चदेवतया ग्रह

* सूर्यसिद्धान्ते स्पष्टाधिकारे ४ श्लो. ।

† सूर्यसिद्धान्ते स्पष्टाधिकारे ५२ श्लो. ।

आकर्ष्यते तथा नीचेनाप्याकर्ष्यत इति त्वयोच्यते । तथा सति नी
निध्ये न वक्रा गतिर्धनर्णवासनाप्रतिपादनं यन्मुनिभिरुच्यते तत्सर्वं
क्तनीचदेवतास्वीकारेण विरुध्यते । उच्चनीचदेवतयोस्तुल्यगतित्वेन
वृद्धिगुणजनितसमाकर्षणाद्ग्रहबिम्बस्वरूपमुन्मथ्येत निष्क्रियं वा प्रसज्
किञ्चोच्चदेवतावशेनैवोपपद्यमानं ग्रहोर्ध्वाधरगमनं न स्वार्थं देव
कल्पयति याम्योत्तरगतौ विक्षेपात्मिकायामेकस्य [illegible] कार
कल्पितत्वात् । तस्मादिदमप्यसत् । किञ्च शनिकक्षोर्ध्वस्थस्य भ

"सममुडुभिरदृश्यैरङ्कितं दस्रभाद्यैः—"

इत्यनेनाभानप्रतिपादनं दृश्यमानानामश्विन्यादिनक्षत्राणां
चन्द्रकक्षास्थितत्वापादनं मुनिमतविरुद्धत्वादयुक्तत्वाच्चासत् ।
भूमेराधाराकल्पनास्वीकरणं गणितशास्त्रप्रणेतृविरुद्धत्वादयुक्तम् ।
गतेर्मन्दफलसाधने टीकाकारेण धनर्णव्यत्यास उक्तस्तत्र च मन्द
वृद्धिह्रासयोः कारणत्वाभिधानं कृतं तदप्यसत् । किञ्च यष्टि
शङ्कोचतो च यद्दूषणं दत्तं तद्युक्तिशून्यत्वादसत् । उच्छास्त्रं स्व
प्रवर्त्तमानानामेवमादीनि दूषणान्येव भूषणानि भवन्तीति गुण
तेषां वक्तव्यास्त एव दूषणाय प्रभविष्यन्ति । यथा सौरचान्द्रान्तरे
कमासाः पूर्वैः स्वीकृतास्तथा त्वया सौरसावनान्तरे चान्द्रसाव
वा न स्वीकृता इति तवायं गुणः । उक्तयुक्तेस्तुल्यत्वादिति । न
नयनं स्थूलसूक्ष्मभेदेन धर्मशास्त्रफलादेशशास्त्रोपयुक्तत्वाद्द्विविध
तम् । तत् तु तथैव त्वयाऽप्याहृतमिति महान् गुणो वैषम्यस्
रात् । रविचन्द्रयोगाद्योगः साधितस्तदाऽन्यग्रहयोगाद्योगाः कु
भवन्तीति नोक्तमिति गुणः । ग्रहाणां स्पष्टीकरणे वैषम्याङ्गीकर
भवतो गुणगणनार्थं प्रभवति । अथ यथा मुनिशास्त्रं तथैव
स्वीक्रियत इति यदि ब्रूयात् प्रतिब्रूयादेनम् । किमर्थं तर्हि लम्बनकृ
द्युक्तमिति । ननु मुनिभिरनुक्तं बीजमपि भवद्भिः स्वीक्रियते तद्वन
लम्बनसंस्कारणमधिमासार्थं स्वीक्रियतामिति चेत् । उच्यते ।

KARIKAVALI WITH SIDDHANT MUKTAVALI, Text with explanatory notes a full English Translation of the Text with an original English commentary by Pt. Rasik Lal Bhuttacharya, M. A. 1-8

NYAYA SIDDHANT DIP by Pt. Shasadhar with commentary Prabha by Pt. Sheshanant, edited by Mahamahopadhyaya Pandit Vindhyeshwari Prasad Divivedin, Librarian Government Sanskrit College, Benares. 5[illegible]-88 (CONTINUED FROM Vol. XXVI).

JAINENDRA VYAKARAN of Devanandi Muni with the exhaustive commentary of Abbyanandi Muni, edited by Mahamahopadhyaya Pt. Vindhyeshwari Prasad Divivedin, Librarian Sanskrit College, Benares. 31[illegible]-326. (CONTINUED FROM Vol. XXXVII)

VALMIKIYA RAMAYANA, edited by Pandit Rasik Lal Bhuttacharya, M. A. Head Professor, Benares College, Benares. ... ... 39[illegible]-402

SHAKATAYANA VYAKARAN, with Laghu Vritti, edited by Pt. Munna Lal Jaina, Kavyatirth, Benares. Sutra path 115-1[illegible]0

ADVAITADIPIKA. by Shri Nrisinhasharma with a commentary called Advaitadipika Vivarana by Shri Narayana Sharma, edited by Pt. Gopal Shastri.
Vol. I Errata 1-18
Vol. II 63[illegible]-70

JAINVARTIK, edited by Pandit Vitthal Shastri.
Bhumika and Title page 137-164

BHAGAVADGITA. with the Commentary Githarthadipika, edited by Pandit Dhundraja Shastri, Nayaopadhyaya Benares. 247-262

SIDDHANTSHIROMANI, with Vasanabashya, Vasnavartika and Marichi, edited with foot-notes by Pandit Muralidhar Jha, Professor, Sanskrit College Benares. 289-301

काशीविद्यासुधानिधिः

श्रीगणेशाय नमः ।

श्रीमद्विजयिनीदेवीपाठशालादयोदितः ।
प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्करश्मिः स्फुटयतु काशीविद्यासुधानिधिः
प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

THE PANDIT.

A MONTHLY PUBLICATION
OF THE
BENARES COLLEGE
DEVOTED TO
SANSKRIT LITERATURE
NEW SERIES.

Nos. 4-6] April-June [1917.
Vol. XXXIX.

BENARES:
Printed and published by Bhagavati Prasad B. A.
for E. J. Lazarus & Co., at the Medical Hall Press,
Benares Cant.

Price, Rs 9 per annum.

शिष्यशिक्षायै-शिष्याणां शिक्षा तस्यै—for teaching or setting an example to the disciples—शिष्या अप्येवं कुर्युरित्यभिप्रायेणेत्यर्थः—*i. e.* with the object that the disciples also will do so (when they begin any undertaking).

निबध्नाति—he (the author) writes (the मंगल in the form of the S'loka नूतन &c.).

The author puts here the Mangala already done mentally, in the form of the S'loka नूतन *&c., to set an example to his disciples.*

ननु मंगलं न विघ्नध्वंसं प्रति न वा समाप्तिं प्रति कारणम् ।

ननु-इति शंकायां—It is very difficult to translate this word here. This use of the word to head an objection or a contrary proposition is very frequent in a book like the Siddhānta Muktāvalī, full of argumentative discussions.

मंगलं न कारणम्—Mangala is no cause.

विघ्नध्वंसं प्रति—विघ्नध्वंसस्य, of the destruction or removal of obstacles. With कारणं, कारणत्वं &c. we more frequently meet with the accusative form of the effect together with the particle प्रति, than the genetive form.

समाप्तिं प्रति *i. e.* समाप्तेः, of attaining completion.

Mangala can neither remove obstacles, nor yet bring about completion.

The drift of the objector is to establish that मंगल is fruitless, and his line of argument put in definite words, would be, मंगलं निष्फलं—Mangala is fruitless, फलविशेषशून्यत्वात्—because it is devoid of any particular fruit. So he proceeds to prove the absence of all possible

particular fruits by मंगलं न विघ्नध्वंसं प्रति न वा समाप्तिं प्रति &c. For the rule is, विशेषाभावकूटेन सामान्याभावसिद्धिः i. e. from the absence of all possible particulars as the हेतु or reason, the absence of the class as a whole is inferred as a logical conclusion, the class being equivalent to the sum total of the individuals constituting it. Thus, to prove the absence of all fruits in general, in the present case, he proceeds to prove the absence of the only possible fruits aimed at by मंगल viz: विघ्नध्वंस and समाप्ति।

विनापि मंगलं नास्तिकादीनां ग्रन्थे निर्विघ्नपारिसमाप्तिदर्शनात् ॥

विनापि मंगलं –अपि here has the force of "in spite of," thus the phrase means, "in spite of (its being) without मंगल."

नास्तिकादीनां ग्रन्थे—in the books of heretics *&c.* निर्विघ्नपरिसमाप्तिदर्शनात्—निर्नास्ति विघ्नो यस्यां सा निर्विघ्ना, that in which there is no obstacle, or निष्क्रान्ता विघ्नेभ्य इति निर्विघ्ना—free from all obstacles, निर्विघ्ना परिसमाप्तिः—safe completion, तस्या दर्शनं तस्मात् (हेतौ इति पञ्चमी)·

For safe completion is seen in the books of heretics &c, though there is no Mangala done in them.

This is the हेतु, by which the inference मंगलं न विघ्नध्वंसं प्रति न वा समाप्तिं प्रति कारणं is made.

Putting the argument into its logical form we should have :—

A. * प्रतिज्ञा—मंगलं न विघ्नध्वंसकारणम्—मंगल is no cause of removal of obstacles.

---

*The five members of a syllogism are : (1) the प्रतिज्ञा or the Enunciation of the proposition to be proved; (2) the हेतु or the reason for the inference (roughly, the middle term), (3) the उदाहरण or the illustration, from experience in life,

हेतुः—स्वाभाववद्वृत्तिविघ्नध्वंसकत्वात्।—For removal of obstacles is found where there is no मंगल.

उदाहरणं—यत् स्वाभाववद्वृत्तिकार्यकं भवति तन्न तत्कारणम्—That, in the absence of which the effect is produced, is not the cause of the effect.

यथा घटः पटकारणं न भवति—as for instance, a jar is no cause of a piece of cloth.

उपनयः—तथा चेदं—And such is this (मंगल), *i. e.* it is one, in the absence of which the effect is produced.

निगमनं—तस्मात्तथा—Hence it is of that sort, *i. e.* it is no cause of the effect.

B. प्र—मंगलं न समाप्तिकारणम्
हे—स्वाभाववद्वृत्तिसमाप्तिकत्वात्
&c. &c. &c.

Observe that the test of the causality, that is attributed to any thing, is its freedom from व्यभिचार; and व्यभिचारत्वं is commonly defined as तदभाववद्वृत्तित्वं, or the fact of one of the two (the cause and the effect) being found where the other is absent.

व्यविचार is of two kinds: (1) अन्वय व्यभिचार, and (2) व्यतिरेक व्यभिचार।

1. यत्रकार्याभाववद्वृत्तित्वं कारणे तत्र अन्वयव्याभिचारः, *i. e.* when the cause is found where the effect is absent, it is अन्वय व्यभिचार। It may be explained away, where a number of causes combine to produce an effect, by pointing out

---

of the invariable accompaniment of the हेतु (middle term) by the साध्य (major term); (4) the उपनय or the application of the universal truth arrived at by Induction in the उदाहरण, to the particular case under consideration, it consists in shewing that the पक्ष or subject of the proposition to be proved, has in it the हेतु which is invariably accompanied by the साध्य; (5) the निगमन or conclusion.

the absence of some other cause as a good reason for the non-production of the effect.

2. यत्र कारणाभाववद्वृत्तित्वं कार्ये तत्र व्यतिरेकव्यभिचारः, *i. e.* when the effect is found to be produced, where there is the absence of the cause, it is व्यतिरेकव्यभिचार । This is * a sure test of causality; for we have no right to count anything as a cause of an effect, if the effect be found not to need the presence of the alleged cause for its production. Such a cause will be rejected as अन्यथासिद्ध or known as unnecessary for the production of the effect.

The objection presented here that मंगल is no cause of विघ्नध्वंस, nor yet of समाप्ति, is supported by this व्यतिरेकव्यभिचार as the हेतु ।

The व्यभिचार however, is not an established fact here. The objector builds his argument on the fact that मंगल is not present in the heretic's book as an object of perception. But things are not known by perception alone; one might infer the existence of जन्मान्तरीय मंगल (or मंगल done in a previous life) from समाप्ति as the हेतु, the cause from the effect. (नास्तिकोजन्मान्तरीयमंगलवान्—समाप्तिमत्त्वात् ।).

This argument will not, however, establish the existence of जन्मान्तरीयमंगल beyond a doubt, for मंगल may be the cause of समाप्ति only through विघ्नध्वंस, *i. e.* by causing the removal of विघ्न or दुरित *i. e.* sin as an obstacle in the way of success; and this is done, not by मंगल alone, but by प्रायश्चित्त (penance) and भोग (suffering the consequences

* This test also loses its force with those who believe in the doctrine of the Plurality of Causes. By them this व्यभिचार also may be explained away by pointing out the presence of an alternative cause as a good reason for the production of the effect in the absence of the alleged cause.

of sin) also. One might be free from all विघ्न. by having performed prescribed penances, or by having suffered the consequences of his sinful actions already. Thus प्रायश्चित्त and भोग have equal claims, to the causality in regard to समाप्ति through विघ्नध्वंस, with मङ्गल; and in cases where मगल is not present as an object of perception, and yet there is समाप्ति, it would be difficult to determine, whether the समाप्ति was caused by जन्मान्तरीयमंगल, or by प्रायश्चित्त &c.; so that, the suspicion, though not the certainty, as to the existence of the व्यभिचार is unavoidable; and this suspicion is enough to render the causality of मङ्गल doubtful.

But throwing a doubt on the causality of मङ्गल does not amount to establishing its non-causality. A doubt is a doubt, and leaves room for making a logical inference, either way, to arrive at certain knowledge. Nay, its presence is even necesssay at the time when we proceed to make an inference. For who would care to proceed to infer the being or not being of a thing, when he already possess certain knowledge about its being or not being? Thus, the doubt "मंगलं समाप्तिफलकं न वा (Is मङ्गल a cause of completion or not)", raised by the व्यभिचारसन्देह, is not out of place here, when the author is going to infer logically the causality of मङ्गल with respect to समाप्ति; so he refuses to admit the importance of the objection by इति चेत &c.

इति चेन्न ।

The sentence means—"If the above argument is set forth aganist the expediency of maṅgala, we answer, no, i. e. this argument will not hold.

He then proceeds to establish the expediency of मङ्गल by the following argument:—

अविगीतशिष्टाचाराविषयत्वेन
मंगलस्य सफलत्वे सिद्धे।

मंगलस्य सफलत्वे सिद्धे—(locative absolute construction). सफलत्वम् (fruitfulness) is here to be taken as बलवदनिष्टाननुबन्धीष्टसाधनत्वम्, *i.e* the virtue of producing the desired end without giving rise to any great evil (for, who would care to adopt a means which will give rise to as much evil as, or even to greater evil than, good?); सिद्धे—अनुमित, *i. e.* being inferred or established,--the fruitfulness or expediency of मङ्गल being established (by the following हेतु).

अविगीतशिष्टाचारविषयत्वेन—(हेतौ तृतीया)—अविगीतो यः शिष्टानामाचारस्तस्य विषयत्वं तेन । अविगीतः अनिन्दितः–irreproachable, *i.e.* बलवदनिष्टाननुबन्धी, not productive of any great evil like the श्येनयाग, which, though prescribed in the Vedas, is विगीत or censurable, on account of its being a means to the end of killing a man, which is sinful, and as such, productive of misery in the long run to the performer of the याग। आचारः, lit. क्रिया or physical action, has to be taken here in the sense of कृति *i. e.* the aspect of the soul which immediately precedes physical activity in doing anything, or roughly speaking setting about a thing mentally, since क्रिया has no विषय, with which आचार is connected here; for it is only ज्ञान (knowing), इच्छा (wishing), and कृति (mentally setting about a thing), which have a विषय।

विषयत्वं—the state of being an object.

This विषय or object, in the case of कृति is of three kinds :

(1) उपादानरूप—the object or material to be acted upon, as कपाल &c.

(3) विधेयरूप—the object to be produced as an effect by acting upon the उपादान, as घट &c.

(3) उद्देश्यरूप—the object aimed at as the end by the production of the effect as the means, as सुख &c.

In the case of मंगल here, विषयत्वं is to be taken in its second sense of विधेयत्वं.

शिष्ट (educated, disciplined), is not intended here to be taken in the orthodox sense of वेदप्रामाण्याभ्युपगन्ता *i e.* an educated person believing in the authority of the Vedas (for such a person might perform a दर्शयाग in a disorderly way, and thus gain no fruit for his pains), but in the sense of फलसाधनतांशे भ्रान्तिरहित, one so educated or disciplined as not to make a mistake in adopting the right means to the desired end, *i. e.* one who knows what he is about, when going to do anything, and knows how to do it.

The हेतु, अविगीत &c. then means "On account of its (Maṅgala's) being the object of the irreproachable कृति of those who are so disciplined as not to make a mistake in adopting the right means to the desired end"

The fruitfulnes of Maṅgala being established, on the ground that it is used as a means to an end by educated experts.

Putting the argument in its logical form, we have:—

प्र। मंगलं सफलम् *i. e* बलवदनिष्टाननुबन्धीष्टसाधनम् ।

मङ्गल is fruitful *i. e.* productive of a desired end without giving rise to any great evil.

हे। बलवदनिष्टाननुबन्धि (अविगीत)-शिष्टकृति (आचार)-विषयत्वात्।

On account of its being the object of the कृति of (in plain English, on account of its being used as a means to an end by) such educated people, as do not make a mistake in adopting the right means to the desired end.

उदा। दर्शवत्—like the दर्श sacrifice.

Observe here, that the logical form consisting of five members is often shortened into one consisting of the above three members only, for the sake of brevity.

तत्र फलजिज्ञासायां सम्भवति दृष्टफलकत्वे अदृष्टफलकल्पनाया अन्याय्यत्वादुपस्थितत्वाच्च समाप्तिरेव फलं कल्प्यते।

तत्र, मङ्गले—in regard to मङ्गल।

फलजिज्ञासायां—फलस्य जिज्ञासा तस्यां सत्यां, विशेषतः फलजिज्ञासायामित्यर्थः, the question arising as to the particular fruit which it is calculated to produce.

सम्भवति दृष्टफलकत्वे-(loc. absolute)—दृष्टं फलं यस्य तद् दृष्टफलकं तस्य भावः, तस्मिन् सम्भवति—when it is possible that a thing should have a perceptible fruit.

अदृष्टफलकल्पनायः—of ascribing to it an imperceptible fruit, as स्वर्ग &c.

अन्याय्यत्वात्—on account of the impropriety (of ascribing &c.)

उपस्थितत्वाच्च—आरब्धं कर्म निर्विघ्नं परिसमाप्यताम् इति ग्रन्थादौ प्रवृत्तपुरुषकामनाविषयत्वेन परिशेषानुमाने प्रवर्त्तमानस्योपस्थितत्वाच्च—and on account of its presenting itself to the

शेष एव कारणत्वमिति कल्पनीयम्। क्लृप्तप्रतियोगिकान्योन्याभावस्य तत्त्वायोगात्। अतिरिक्तान्योन्याभावस्य कल्पने(१) तत्प्रतियोगिनोप्यतिरिक्तस्य कल्पनापातात् शक्तेर्नामान्तरकरणप्रसङ्गाच्चेति(२) ॥

अत्रोच्यते । कार्यनियतपूर्ववृत्तिजातीय-

न चैतदनुरोधेनेति । पूर्वोद्भावितदोषानुरोधेनेत्यर्थः । सामान्यस्यातिप्रसक्तत्वादाह विशेष इति । अशक्तप्रतियोगिकेत्यर्थः । अशक्तपदेनाकारणमुच्यते मीमांसकसिद्धशक्तिरहितं वा नाद्य इत्याह । क्लृप्तप्रतियोगिकेति । अकारणान्योन्याभावस्य कारणत्वज्ञानाधीनज्ञानत्वेनात्माश्रयादित्यर्थः । न द्वितीय इत्याहातिरिक्तेति । न हि शक्त्यनङ्गीकारवादिमतेऽशक्तं नाम किंचिदस्ति यत्कारणत्वभूतान्योन्याभावप्रतियोगि स्यादिति भावः । यदि च प्रतियोगिप्रसिद्ध्यनुरोधेन शक्तिरङ्गीक्रियते कृतं वक्रकल्पनया स्पष्टं शक्तिः कारणतेत्येवोच्यतामित्याह । शक्तेर्नामान्तरेति । सा च दूष्यैवेति हृदयम् ॥

सिद्धान्ताभिधानं प्रतिजानीते । अत्रोच्यत इति । द्वितीयपक्षमुपादत्ते कार्येति । पूर्वत्वस्यावधिनिरूप्यतया

(१) अन्योन्याभावविषयकल्पन इति पा० १ पु० ।

(२) नामान्तरकल्पनापातादिति पा० १ पु० ।

त्वमेव कारणत्वं । न चाकाशादेरपि कारणत्वं ।

कार्यपदोपादानं न तु लक्षणानुप्रवेशेन । अकार्यपूर्वत्वस्य व्यावर्त्यस्याभावेन वैयर्थ्यात् । कारणपदान्नियतपूर्ववर्तित्वस्यैव प्रतीतेश्च । अवधिविशेषान्विततत्प्रतीतेश्च सम्बन्धिविशेषसमभिव्याहारफलत्वात् । अत एवानन्यथासिद्धनियतपूर्ववर्तिजातीयत्वं वा तत्त्वमिति गङ्गेशचरणाः । नन्विदं कारणलक्षणं कारणपदप्रवृत्तिनिमित्तं वा । नाद्यः अन्यथासिद्ध्याऽकारणे कुम्भकारपितर्यतिव्याप्तेः । नन्वयमाकाशकल्पस्तत्र च वक्ष्यत एव सामान्यत इष्टत्वादिति तत्किं कारणमात्रलक्षणमेतत् ? भवन्ति च कुम्भकारजनकाकाशादयः क्वचिदन्यथासिद्धा अपि क्वचित्कारणानीति न तत्रातिव्याप्तिरिति विवक्षितम् । ओमिति चेत् अलमलं विज्ञातमस्माभिः निःशङ्कमोङ्कारं प्रयुञ्जानः प्रायेण पारिमांडिल्येतिव्याप्तिशङ्कां कण्डकया कयाचित् अलौकिकस्यापि योगिज्ञानस्य विषयजन्यतां बोधयंस्त्या परिहरिष्यसीति । किं त्वेवं कारणतायाः केवलान्वयित्वप्रसङ्गे लक्षणस्य व्यवच्छेदकत्वानुपपत्तिः । नियतादिपदवैयर्थ्यं च । वस्तुत्वेनैव तन्निर्वचनसंभवात् । न द्वितीयः । सामान्यतो विशिष्य त्वित्यादिग्रन्थस्वरसविरोधात् । न हि कारणपदस्यैकस्य सामान्यविशेषोभयप्रवृत्तिनिमित्तकतासंभवः पारिमांडिल्यादावकारणेपि सतस्तत्पदप्रवृत्तिनिमित्ततानुपपत्तेश्च । कारणपदा-

सामान्यत इष्टत्वात् । न ह्याकाशादिकं न किं-
र्यं चानन्यथासिद्धघप्रवेशे घटकारणतायाः वाक्यार्थेपि तत्प्रवेशानुपपत्तेश्च । अत एव सामान्यतः कारणतानिर्वचनेप्यनन्यथासिद्धिप्रवेशस्तत्त्वचिन्तामणावपि इति चेत् । न योगिज्ञानस्य विषयजन्यतया कारणतायाः केवलान्वयितापक्षे व्यवच्छेदकत्वाभावेपि कारणपदजन्यज्ञाने प्रकारतयाऽस्य तत्पदप्रवृत्तिनिमित्तमात्रत्वात् । अत एवानन्यथासिद्धिप्रवेशेपि तत्तद्व्यवच्छेद्यानुसरणप्रयासः । पदात्तत्प्रकारकज्ञानानुपपत्तेरेव तत्प्रवृत्तिनिमित्ततायां बीजत्वात् । न चान्यथासिद्धे प्रवृत्त्यापत्तिः । न हि कारणत्वाभिमतस्यान्यथासिद्धिशून्यत्वमपेक्षितं किन्त्वनन्यथासिद्धपूर्वत्वम् अस्ति च क्वचिदन्यथासिद्धपूर्वत्वस्यापि क्वचिदनन्यथासिद्धत्वं(१) इति तदादायैव सामान्यतः कारणपदप्रवृत्त्युपपत्तेः । व्यतिरेकितापक्षे तु लक्षणत्वेप्यदोषात् । आकाशादेः कार्यमात्रे कारणत्वं पूर्वपक्षे प्रसंजितं । तत्र मात्रपदं यदि सामान्ये तदा विवक्षितविशेषे कार्यसामान्ये कारणत्वं प्रसञ्जितं स्यात् । यदि तु विशेषे तदा घटादिसर्वविशेषेषु तत्राद्यमिष्टापत्त्या परिहरति । सामान्यत इष्टत्वादिति । ननु जातीयतागर्भे कारणत्वे क्वाकाशादौ प्रसङ्गः क्वतरामिष्टापत्तिः यदवोचत् न ह्याकाशादीनां तज्जा-

(१) सिद्धपूर्वत्वमिति पा० २ पु० ।

चिदपि प्रति कारणं । विशिष्य तु (१) अनन्यथासिद्धेतरपूर्ववृत्तित्वानुपजीविघटपूर्वत्वनिरूपितनियतसमवधानप्रतियोगिजातीयत्वं तत् । अ-

तीयत्वेन कारणत्वमितीति चेत् न जन्यगुणत्वावच्छिन्नकार्यतानिरूपितपूर्ववर्त्तितावच्छेदकद्रव्यत्वपुरस्कारेण कार्यमात्रे कारणत्वशङ्कायामेतदभिधानात् । द्वितीयं निरस्यति विशिष्य त्विति । अनन्यथासिद्धेत्यादि । वक्ष्यमाणान्यथासिद्धिशून्यस् इतरापेक्षया पूर्वत्वस्यानुपजीवितज्ज्ञानानधीनज्ञानमिति यावत् । एवंभूतं यद्घटपूर्वत्वनिरूपितं घटप्रागभावावच्छिन्नसमयपरिचायितं नियतसमवधानं तत्प्रतियोगितावच्छेदकधर्मवत्त्वमित्यक्षरार्थः । अत्र घटपूर्वत्वेत्यादिमात्रोक्तौ दण्डरूपदण्डत्वादावतिव्याप्तिस्तदर्थमनन्यथासिद्धेति । न चेतरपूर्वत्वानुपजीविपदेनैव तन्निरासः । न हि दण्डत्वदण्डरूपयोरितरापेक्षया पूर्वत्वं ज्ञात्वैव घटपूर्वत्वं ज्ञायत इति । आकाशादिव्यावृत्त्यै इतरपूर्वत्वानुपजीवीति । तस्य च शब्दं प्रति पूर्ववर्त्तित्वं ज्ञात्वैव घटादीन्प्रति पूर्ववर्त्तित्वं ज्ञायते शब्दसमवायिकारणत्वस्यैवाकाशपदार्थत्वात् इति भवति ततस्तद्व्यावृत्तिः । न चानन्यथासिद्धिपदादेव तन्निरासः । न हि दण्डकुम्भकारादीनामिव शब्दस्य घटान्वयव्यतिरेकौ स्तः येन तदुपजीविघटान्वयव्यतिरेकप्रतियोगित्वेन अन्यथासिद्धया

(१) विशिष्टन्तु इति पा० १ पु० ।

निरासः स्यात् । नन्वेवं क्षित्यादिपूर्वत्वं गृहीत्वैव घटादिपूर्वतया गृह्यमाण ईश्वरो न घटादिहेतुः स्यात् शब्दबुद्ध्यादिसमवायिकारणतयैव सिद्धानामाकाशात्मकालादीनां संयोगादावप्यकारणतापत्तिश्चेति चेत् । न किमीश्वरत्वादिना अन्यथा(१) रूपान्तरेणापि । नाद्यः । ईश्वरत्वाकाशत्वादिना तत्र तत्र तेषां कारणत्वानङ्गीकारादिष्टापत्तेः । न द्वितीयः । कर्त्तृत्वेन कार्यमात्रे द्रव्यत्वेन च जन्यगुणत्वावच्छिन्ने कारणताया क्षित्यादिशब्दादिपूर्वत्वानुपजीवित्वात् । अत एवाधिकरणकारकतयैव कालदिशोर्जगद्धेतुत्वमिति सिद्धान्तः । घटान्यूनानतिरिक्तकालीनवस्तुव्यावृत्त्यै घटपूर्वत्वेति । घटजातीये नियतस्य रासभादेर्व्यावृत्त्यै नियतेति । शब्दादिकारणस्याकाशादेरवृत्तितया नियतत्वाभावात् तत्राव्याप्तिः तथानादौ संसारे रासभजातीयस्य घटजातीयनियतपूर्वकालवृत्तित्वेन तत्रातिव्याप्तिश्चेत्यतः समवधानप्रतियोगीति । वनस्थदण्डादिसंग्रहाय जातीयत्वमिति । यद्यत्तद्वृत्तिजातीयत्वमात्रं सत्तादिकमादायातिप्रसङ्गि प्रतिबन्धकाभावादावप्रसङ्गि च तथापि तत्प्रतियोगितावच्छेदकधर्मवत्त्वं तदर्थ इति नोक्तदोषौ । ननु दुःखप्रागभावसाधने प्रायश्चित्तादावव्यापकमिदं प्रागभावपूर्वत्वाप्रसिद्धेरिति चेत् न । साध्यतावच्छेदकरूपाक्रान्ताधिकरणकालोपाधित्वावच्छिन्नपूर्वत्वस्य विवक्षि-

(१) अथेति पा० २ पु० ।

तत्वात् । प्रागभावस्य प्रायश्चित्तोत्तरसमयसंबंधित्वेन साध्यत्वात्तदधिकरणोत्तरसमयोपाधिपूर्वत्वस्य प्रायश्चित्तादावपि सम्भवात् । ननु कथमत्र नियमो विवक्षितः किं यत्र घटपूर्वत्वं तत्र दण्डसमवधानमिति उत यत्र घटाव्यवहितपूर्वत्वं तत्र दण्डसमवधानमिति । नाद्यः । दण्डानुत्पत्तिदशायां घटपूर्वत्वेपि दण्डासमवधानेन व्यभिचारात् । न द्वितीयः । स्वर्गाव्यवहितपूर्वक्षणे यागसमवधानाभावेन स्वर्गे यागस्याकारणत्वप्रसङ्गात् । घटक्षणे दण्डसमवधानपूर्वकत्वनियमो विवक्षित इति चेत् । न तथा सति चिरातीतेनापि यागेन स्वर्गक्षणस्य यागसमवधानपूर्वकत्वनियमनिर्वाहेऽन्तरापूर्वकल्पनाभावप्रसङ्गात् । चिरध्वस्तस्य कारणत्वस्य फलपर्यन्तव्यापारव्याप्तेरपि कारणतानुपपत्तिमूलकतया तदन्यथोपपत्ता तदनाक्षेपकत्वादिति चेत् । उच्यते । घटपूर्वत्वेत्यादिना । कार्यजातीयाव्यवहितपूर्वक्षणत्वव्यापकसमवधानप्रतियोगितावच्छेदकधर्मवत्त्वस्य विवक्षितत्वादुक्तदोषानवकाशात् । स्वर्गाव्यवहितपूर्वक्षणे चापूर्वस्यैव यागसमवधानरूपत्वात् न यागस्य स्वर्गकारणतानुपपत्तिर्न वापूर्वासिद्धिः व्यापारस्य समवधानतयैव कल्पनात् । अत एवाहुः स्वांगमव्यवधायकमिति । ननु समवधानं यदि कार्यदेशे साक्षात्संबंधः तदा घटादिव्यधिकरणस्यादृष्टादेस्तदकारणतापत्तिः । अथ साक्षात्परम्परासाधारणसम्बन्धमात्रं तदा रासभादावपि तत्कारणतापत्तिः । यत्र कुत्रापि स्थितस्य तस्य घटदेश-

सम्बद्धात्माधिष्ठेयत्वेन घटदेशपरम्परासम्बन्धित्वादिति चेत् न साक्षात्परम्परासाधारणैकजातीयकार्यदेशसंबंधस्यैव समवधानपदार्थत्वात् । रासभे च साक्षात्संबंधस्यानियमात् पूर्वोक्तपरम्परासंबन्धस्य च नियमेऽपि तत्पुरस्कारेण व्यतिरेकाभावादन्वयव्यतिरेकित्वगर्भानन्यथासिद्ध्यभावात् । यत्पुरस्कारेणान्यथासिद्धिघटकान्वयव्यतिरेकौ तत्सम्बन्धघटकस्यैव पूर्वोक्तसमवधानस्य विवक्षणात् । न च प्रागभावे पूर्वोक्तदिशाव्याप्तिश्चोपलक्षितसमयविशेषे गवि गोत्वस्येव प्रागभावस्य वृत्तावविरोधात् । समयस्य तु विभोरुपाधावुपाधेश्च विभौ प्रमाणबलादेव समवधानस्वीकारात् न तत्राप्यव्याप्तिः । ननु स्वर्गं प्रति पूर्ववर्त्तित्वे गृहीत एवापूर्वं प्रति पूर्ववर्त्तित्वावगमात् आकाशवदपूर्वे यागस्याकारणतापत्तिरिति चेत् न इतरपूर्वत्वपदेनेतरसाक्षात्पूर्वत्वस्यैव विवक्षितत्वात् । तस्य चापूर्वपूर्वतायामनुपजीवनादेव अत्र घटविशेषे रासभविशेषस्य कारणतापत्तिः नियतत्वात् अन्यपूर्वत्वानुपजीवित्वात् अन्यथासिद्धिशून्यत्वाच्च । अन्यत्र क्लृप्तपूर्ववर्त्तिन एवेत्याद्यन्यथासिद्धिविरहस्य वक्ष्यमाणानन्यथासिद्धिनिर्वचनादलाभात् । एतेन पाकजस्थले गन्धादौ रूपादिप्रागभावानां कारणतापत्तिर्व्याख्याता । अपि च शब्दपूर्ववर्त्तित्वमनवगम्यापि शब्दाश्रयत्वादिना रूपेणाकाशस्य कार्यमात्रे पूर्वत्वावगमसंभवात्तस्यापि तत्र कारणतापत्तिः । श्रोत्रस्य शब्दसाक्षात्कारे कारणतापत्तिर्वा श्रोत्रत्वस्य नभोघटितत्वात्तत्सिद्धेश्च शब्दकार-

नन्यथासिद्धत्वं च यत्कार्यं प्रति यस्य नियतान्वयव्यतिरेकौ तदुपजीवनेन यस्यान्वयव्यतिरेकौ तदवच्छिन्ना(१)न्वयव्यतिरेकप्रतियोगित्वं। प्राग-

णताग्रहाधीनत्वात्। न ह्याकाशादेः कारणत्वं केनाप्यवच्छिद्यत इति चोपपादितं दूषणमनुवर्तत एव। किञ्च जन्यसाक्षात्कारत्वावच्छिन्ने कथमिन्द्रियाणां कारणत्वं संयोगादिप्रत्यासत्तीनामेकजातीयत्वाभावेन तद्गर्भपूर्वाक्षसमवधानानुपपत्तेरिति चिंत्यम्। कारणत्वं स्वरूपसंबंधविशेषः प्रतियोगित्वविषयित्ववत्। इदं च तदुपलक्षकमेव। अत एवानेकलक्षणककारणताज्ञानभेदेन प्रवृत्त्यननुगमोपि निरस्तः। एतदुपलक्षितस्य दण्डाद्घटो जायत इत्यादिप्रतीतिविशेषप्रवृत्त्यादिसाक्षिकस्य स्वरूपसम्बन्धविशेषस्यैव प्रवृत्तिहेतुज्ञाने विषयतयावच्छेदकत्वादित्यपि केचित्। नन्वनन्यथासिद्धेरशक्यनिर्वचनताया दर्शितत्वात्तद्गर्भलक्षणानुपपत्तिरित्याशंक्याह। अनन्यथासिद्धेति। यत्कार्यं घटादिकं प्रति यस्य दण्डादेरन्वयव्यतिरेकौ तदुपजीवनेन यस्य दण्डत्वादेरन्वयव्यतिरेकौ तदवच्छिन्नौ(२) यस्य दण्डादेरन्वयव्यतिरेकौ तदनन्यथासिद्धमित्यक्षरार्थः। दण्डत्वादिव्युदासाय तदुपजीवनेनेत्यादि दण्डान्वयव्यतिरेकौ च न दण्डत्वान्वयव्यतिरेकोपजीवनाविति न तदवच्छिन्नान्वयव्यतिरेकप्रतियोगिनि दण्डत्वेतिव्याप्तिः। ननु यत्कार्यं प्रति यस्य दण्डरूपस्या-

(२) तदनवच्छिन्नेति पा० २ पु०।

(१) तदनवच्छिन्नाविति पा० ५ पु०।

धानादि दोषः ।

भूतवच्चाशंस्यम् ॥ १०८ ॥

आशंसनमाशंसा भविष्यत्कालविषया तस्यां गम्यमानायां भूतवत्प्रत्ययविधिर्भवति भवद्वच्च वा । भूतग्रहणेन भूतसामान्ये विहितस्य त्यस्य परिग्रहः । उपाध्यायश्चेदागमिष्यति उपाध्यायश्चेदागमत् उपाध्यायश्चेदागतः तदा तर्कमधीमहे अध्येष्यामहे अध्यगीष्महि एवाधीतस्तर्कः । आशंसायामिति किम् । उपाध्याय आगमिष्यति ।

क्षिप्रवचने लृट् ॥ १०९ ॥

आशंसायामिति वर्तते । क्षिप्रार्थे शब्दे वाचि लृट् भवत्याशंसायां गम्यमानायाम् । भूतवच्चेत्यस्यापवादः । उपाध्यायश्चेदागमिष्यति क्षिप्रमध्येष्यामहे शीघ्रमध्येष्यामहे । नेति वक्तव्ये लृट्ग्रहणं लुट्विषयेपि यथा स्यात् इत्येवमर्थम् । श्वः क्षिप्रमध्येष्यामहे ।

लिङाशंसोक्तौ ॥ ११० ॥

आशंसा उच्यते येन शब्देन तस्मिन् वाचि लिङ् भवत्याशंसायां गम्यमानायाम् । अयमपि भूतवच्चेत्यस्यापवादः । उपाध्यायश्चेदागच्छेत् आशंसे युक्तो अधीयीय । अवकल्पये युक्तोऽधीयीय । परत्वाल्लृटो बाधकोऽयम् । आशंसे क्षिप्रमधीयीय ॥

न लङ्लुट् सामीप्याव्युच्छित्त्योः ॥ १११ ॥

सामीप्यं तुल्यजातीयेनाव्यवधानम् । अव्युच्छित्तिः क्रियाप्रबन्धः । लङ्लुटौ न भवतः सामीप्याव्युच्छित्त्योः गम्यमानयोः । अनद्यतनविहितयोर्लङ्लुटोरयं प्रतिषेधः । सामीप्ये । येयं पौर्णमास्यतिक्रान्ता एतस्यां देवानपूपुजामः । अतिथीनबू-

भुजामः । येयममावास्यागामिनी एतस्यां देवान् पूजयिष्यामः अतिथीन् भोजयिष्यामः । अव्युत्पत्तौ यावज्जीवीत् भृश-मन्नमदात् यावज्जीविष्यति भृशमन्नं दास्यति ॥

वत्स्यर्त्यत्यवरेऽवधेः ॥ ११२ ॥

यद्यपि लङ्लुङिति प्रकृतं तथापीह वत्स्यर्द्ग्रहणाल्लुट एव प्रतिषेधः वत्स्यर्तिकाले अवरस्मिन् भागे लुडान भवति। असामीप्याव्युच्छित्त्यर्थोऽयमारंभः। कालविभाग उत्तरत्र वक्ष्यते। देशविभागे अयं प्रतिषेधः। योयमध्वा गन्तव्य आ चित्रकूटात् तस्य यदवरं मथुरायाः तत्र द्विरोदनं भोक्ष्यामहे द्विःसक्तून्पास्यामः। वत्स्यर्तीति किम्। योऽयमध्वा गतः आ चित्रकूटात् तस्य यदवरं मथुरायां तत्र युक्ता द्विरध्यैमहि। अवर इति किम्। योऽयमध्वा गन्तव्य आ चित्रकूटात् तस्य यत्परं मथुरायास्तत्र युक्ता द्विरध्येतास्महे। अवधेरिति किम्। योऽयमध्वा गन्तव्यो निरवधिकः तस्य यदवरं मथुरायाः तत्र युक्ता द्विरध्येतास्महे।

कालविभागेऽनहोरात्राणाम् ॥ ११३ ॥

वत्स्यर्त्यवरेऽवधेरिति वर्तते। वत्स्यर्ति काले अवरस्मिन्कालविभागेऽहोरात्रसंबंधविवर्जिते लुडान भवति। पूर्वेण प्रतिषेधे सिद्धेप्यहोरात्रसंबंधिविभागप्रतिषेधार्थं वचनम्। कालविभागग्रहणमिहार्थमुत्तरार्थं च। योयं संवत्सर आगामी तस्य यदवरमाग्रहायण्यास्तत्रार्हत्पूजां करिष्यामहे अतिथिभ्यो दानं दास्यामहे। वत्स्यर्तीत्येव। योयं संवत्सरोतीतस्तस्य यदवरमाग्रहायण्याः तत्र युक्ता द्विरध्यैमहि। अवर इति किम्। व पर इति वक्ष्यति। अवधेरित्येव। योयं निरवधिकः काल आगामी तस्य यदवरमाग्रहायण्याः तत्र युक्ता द्विरध्येतास्महे।

अनहोरात्राणामिति किम् । योऽयं त्रिंशद्रात्र आगामी तस्य योवरः पञ्चदशरात्रस्तत्र युक्ता द्विरध्येतास्महे । योयं त्रिंशद्रात्र आगामी तस्य योऽवरः अर्द्धमासः तत्र द्विरध्येतास्महे । योयं मास आगामी तस्य योवरः पञ्चदशरात्रः तत्र द्विरध्येतास्महे । प्रसज्य इतिप्रतिषेधात् त्रिविधमुदाहरणम् ।

वा परे ॥ ११४ ॥

कालविभाग इति वर्त्तते । परस्मिन्नवधेः कालविभागे वर्त्स्यति वा लुटान भवति न चेदहोरात्राणां विभागः । योयं संवत्सरः आगामी तस्य यत्परमाग्रहायण्याः तत्र द्विरध्येष्यामहे अध्येतास्महे वा । सामीप्याव्युच्छित्तिविवक्षायामपि परत्वादयं विकल्पः । अनहोरात्राणामित्येव । योयं त्रिंशद्रात्र आगामी तस्य यः परः पंचदशरात्रः तत्र द्विरध्येतास्महे । सामीप्याव्युच्छित्योर्लुटः प्रतिषेध एव । वर्त्स्यतीत्येव । योऽयं संवत्सरोऽतीतः तस्य यत्परमाग्रहायण्याः तत्र द्विरध्यैमहि । अवधेरित्येव । योयं निरवधिः काल आगामी तस्य यत्परमाग्रहायण्याः तत्र द्विरध्येतास्महे । कालविभाग इत्येव । योऽयमध्वा गन्तव्यः आ चित्रकूटात् तस्य यत्परं मथुरायास्तत्र द्विरध्येतास्महे सर्वत्र लुड् भवति नचेदव्युच्छित्तिविवक्षा ।

लिङ्हेतौ लृङ् क्रियाऽवृत्तौ ॥११५॥

वर्त्स्यतीति वर्त्तते हेतुर्निमित्तं लिङ्हेतौ वर्त्स्यति काले लृङ् भवति क्रियाया अवृत्तौ सत्याम् । हेतुफलयोर्लिङित्येवमादि लिङ्निमित्तं वक्ष्यति । अतिथींश्चेदलप्स्यत भृशमन्नमदास्यत् अत्रान्नदानं फलं तद्धेतुभूतोऽतिथिलाभः तदनभिनिर्वृत्तिं प्रमाणादवगम्येदं वाक्यं प्रयुक्तम् । एवमुपाध्यायं चेदुपाश्रिष्यत शास्त्रान्तमगमिष्यत् । अभोक्ष्यत भवान् दृष्या यदि मत्स-

मीपे आशिष्यत । इह दक्षिणो न चेदयास्यत् न पर्य्याभवि-ष्यदिति यानमनिष्पन्नं पर्याभवनं तु निष्पन्नमिति कथमवृत्तिः क्रियायाः । एवं तर्हि प्रत्यासत्तेः हेतुभूतयोः क्रिययोः अवृत्ताविति द्रष्टव्यम् क्रियायाः अवृत्तावपि शक्तिरूपेण क्रियाम-ध्यारोप्य कर्तृत्वेनाभिसंबंधः क्रियते यथा भूतभविष्यत्कालवि-षयायाः कर्तृत्वेनाभिसंबंधः ।

भूते ॥ ११६ ॥

भूते च काले लिङ्हेतौ क्रियाया अवृत्तौ सत्यां लृङ् भवति । उताप्योः पूर्वोक्तौ लिङ्लित्यतः प्रभृति कालसामान्ये यल्लिङ्निमित्तं विधानं तत्रानेन भूते लृङ् ततः पूर्वं तु वाशेषा-दित्येनेनैव विकल्पः सिद्धः । दृष्टो मया भवतः पुत्रोऽन्नार्थी चङ्क्रमणमाणः इतरश्चातिथ्यर्थी यदि तेन भविष्यत् उताभोक्ष्य-त । अप्यभोक्ष्यत अन्येन पथा स गतः नापि भुक्तवान् इदं सर्वं प्रतिवचनम् ।

वाऽशेषात् ॥ ११७ ॥

वक्ष्यति शेषे यदो लृङिति भा एतस्मात्सूत्रावधेः यदित ऊर्ध्वमनुक्रमिष्यामः भूते काले लिङ्हेतौ क्रियाया अवृत्तौ लृङ्वा भवतीत्येतदधिकृतं वेदितव्यम् । परस्तु लृङो विधिर्नित्य इति तत्रैवोदाहरिष्यामः ।

लड् गर्हेऽपिजात्वोः ॥ ११८ ॥

अपि जातु इत्येतयोर्वाचोः लड् भवति गर्हे गम्यमाने । अयं कालसामान्ये विहितो लट् कालविशेषे विहितान् लकारान् परत्वाद्बाधते । अपि तत्र भवान् प्राणिनो हन्ति । जातु तत्र भवान् प्राणिनो हन्ति गर्हामहे । अन्याय्यमेतत् । लिङ्हेत्व-भावात् भूते क्रियावृत्तौ लृङ् न भवति ।

वा कथमि लिङ् च॥ ११९ ॥

गर्हे इति वर्तते । कथं शब्दे वाचि लिङ् भवति लट् च । कथं नाम तत्र भवान् मांसं भक्षयेत् । मांसं भक्षयति । गर्हामहे अन्याय्यमेतत् । वावचनाद्यथाप्राप्तम् । अभक्षत् । अभक्षयत् भक्षयाञ्चकार । भक्षयिष्यति । भक्षयिता । अत्र लिङ्हेतुरस्तीति भूते क्रियावृत्तौ वा लृङ् भवति अभक्षयिष्यत् । वर्त्स्यति नित्यं लृङ् ।

किंवृत्ते लिङ्लृटौ ॥ १२० ॥

गर्हे इति वर्तते वेति नाधिकृतं विभक्त्यन्तस्य डतरडतमान्तस्य च किमो वर्तनं किंवृत्तम् । किंवृत्ते वाचि गर्हे गम्यमाने लिङ्लृटौ भवतः । सर्वलकाराणामयमपवादः । किं तत्र भवान् अनृतं ब्रूयात् अनृतं वक्ष्यति । लिङ्हेतुरस्तीति भूते वा लृङ् भवति वर्त्स्यति तु नित्यः ।

अनवक्लृप्त्यमर्षे ॥ १२१ ॥

गर्हे इति निवृत्तम् । लिङ्लृटाविति वर्तते । अनवक्लृप्त्यर्थे अमर्षे च गम्यमाने लिङ्लृट् इत्येतौ स्यौ भवतः । अयमपि सर्वलकाराणामपवादः । अनवक्लृप्तौ नावकल्पयामि न संभावयामि न वा श्रद्दधे किं तत्र भवानदत्तं गृह्णीयात् अदत्तं ग्रहीष्यते्यमर्षे-धिङ् मिथ्यानैतदस्त्यमर्षो मे किं तत्र भवानदत्तं गृह्णीयात् अदत्तं ग्रहीष्यति । किंवृत्तेरकिंवृत्ते च वाचि सामान्येनायं विधिः । लिङ्हेतुरस्तीति भूते क्रियावृत्तौ वा लृङ् । वर्त्स्यति तु नित्यः ।

किंकिलास्त्यर्थे लृट् ॥ १२२ ॥

अनवक्लृप्त्यमर्षे इति वर्तते । किंकिलशब्दे अस्त्यर्थेषु च शब्देषु वाक्षु अनवक्लृप्त्यमर्षयोः लृट् भवति । लिङोऽपवादः । नावकल्पयामि किंकिल तत्र भवान् परदारान् प्रकरिष्यते । गंध-

नादिसूत्रेणान्यार्थे दः । अस्त्यर्थं अस्तिभवतिविद्यतयः । अस्ति नाम भवति नाम विद्यते नाम तत्र भवान् परदारान् प्रकरिष्यते ।

जातुयद्यदायदौ लिङ् ॥ १२३ ॥

अनवक्लृप्त्यमर्ष इति वर्तते । जातुयद्यदायदीत्येतेषु वाचु अनवक्लृप्त्यमर्षयोर्लिङ् भवति । लृटोऽपवादः । नावकल्पयामि जातु तत्र भवान् सुरां पिबेत् । यत्तत्र भवान् सुरां पिबेत् यदा तत्र भवान् सुरां पिबेत् यदि तत्र भवान् सुरां पिबेत् न मृष्यामि जातु तत्र भवान् सुरां पिबेत् इत्येवमादि योज्यम् । लिङ्हेतुरस्तीति भूते वा लृङ् वर्त्स्यति तु नित्यः ।

यच्चयत्रयोः ॥ १२४ ॥

अनवक्लृप्त्यमर्ष इति वर्तते । यच्च यत्र इत्येतयोर्वाचो-अनवक्लृप्त्यमर्षयोर्लिङ् भवति । लृटोऽपवादः । उत्तरार्थो योगः विभागः । न संभावयामि यच्च तत्र भवान् परिवादं कथयेत् । यत्र तत्र भवान् परिवादं कथयेत् । न मृष्यामि यच्च तत्र भवान् परिवादं कथयेत् । यत्र तत्र भवान् परिवादं कथयेत् । क्रियाप्रवृत्तौ भूते वा लृङ् । वर्त्स्यति तु नित्यः ।

गर्हे ॥ १२५ ॥

अनवक्लृप्त्यमर्ष इति निवृत्तम् । अर्थान्तरोपादानात् । यच्च यत्र इत्येतयोर्वाचोः गर्हे गम्यमाने लिङ् भवति । सर्वलकाराणामपवादः । यच्च तत्र भवान् मस्यानाक्रोशेत विद्वानवृद्धः सन्नुत्कृष्टः गर्हामहे । अन्याय्यमेतत् । लिङ्हेतुरस्तीति यथासंभवं लृङ् वेदितव्यः ।

चित्रार्थे ॥ १२६ ॥

चित्रशब्दस्यार्थे गम्यमाने यच्चयत्रयोर्वाचोर्लिङ् भवति । सर्वलकारापवादः । यच्च तत्र भवान् लोभं कुर्यात् यत्र तत्र भवान् लोभं कुर्यात् विद्वान् वृद्धः सन्नुत्कृष्टः चित्रमाश्चर्यमद्भुतं विस्मयमित्येषामन्यतमप्रयोगः । लिङ्हेतुरस्तीति भूते क्रियावृतौ वा वर्त्स्यति तु नित्यः ।

॰ शेषेऽयदौ लृट् ॥ १२७ ॥

यच्चयत्राभ्यामन्यश्चित्रार्थः शेषः । शेषे चित्रार्थे गम्यमाने लृड्भवति यदिशब्दश्चेद्वाड् भवति । अयमपि सर्वलकारापवादः । चित्रमाश्चर्यमद्भूतं विस्मयनित्यमन्धो नाम पुस्तकं वाचयिष्यति मूको नाम जैनेद्रमध्येष्यते । लिङ्हेत्वभावात् लृङ् वा न भवति । अयदाविति किम् । आश्चर्यं यदि स भुंजीत अत्रानवक्लृप्तिश्चित्रार्थश्च प्रतीयते जातुयद्यदायदौ लिङिति लिङ्भूते वाशेषादिति लृङधिकारो निवृत्तः ।

उताप्योः पृष्टोक्तौ लिङ् ॥ १२८ ॥

उत अपि इत्येतयोर्वाचोः पृष्टस्योक्तौ गम्यमानायां लिङ् भवति । सर्वलकारापवादः । किमकार्षीः कटं देवदत्त इति पृष्टः प्रत्याह उत कुर्यात् । अपि कुर्यात् कटं कृतवानित्यर्थः । इतः प्रभृति यत्र लिङ्हेतुरस्ति तत्र वर्त्स्यति भूते च नित्यो लृङ् उताकरिष्यत् । अप्याकरिष्यत् । पृष्टोक्ताविति किम् । उत दण्डः पतिष्यति । अपि धास्यति द्वारम् । अत्र प्रश्नोघट्टनं च प्रतीयते ।

इच्छोद्बोधेऽकच्चिति ॥ १२९ ॥

इच्छोद्बोधः स्वाभिप्रायनिवेदनम् । इच्छोद्बोधे गम्यमाने

लिङ् भवति कच्चिच्छब्दाप्रयोगे । सर्वलकारापवादः । कामो मे अधीयीत भवान् । अभिलाषो मे इच्छा मे भुंजीत भवान् । अकच्चितीति किम् । कच्चिज्जीवति मे माता । कच्चिज्जीवति मे पिता माहाविद् त्वां पृच्छामि कच्चिज्जीवति पार्वती ।

संभावनेऽलमि स्थानिनि ॥ १३० ॥

लिङिति वर्तते । संभावनं क्रियायां सामर्थ्यश्रद्धा । अलंशब्दश्चेह पर्याप्तिवचनः । यस्य यत्रार्थो गम्यते न चासौ प्रयुज्यते स तत्र स्थानीशब्दः । अलमर्थविशिष्टे संभावने लिङ् भवति अलंशब्दे स्थानिनि । सर्वलकारापवादः । शक्यसंभावने अपि हस्तिनं हन्यात् । अपि स्तुयाद्राजानम् । अशक्यसंभावने अपि पर्वतं शिरसा भिन्द्यात् । अपि स्थालीयकं भुञ्जीत । अपि समुद्रं दोर्भ्यां तरेत् । अलमिति किम् । निर्देशस्थायी मे देवदत्तो मन्ये गमिष्यति ग्राम अग्राहमिति । स्थानिनीति किम् । वसन्ति तेत् सुराष्ट्रेषु वन्दिष्यते अलमूर्जतम् । क्रियाप्रवृत्तौ वत्स्यर्यति भूते लृङ् भवति ।

तद्वाचि धौ वाऽयदि ॥ १३१ ॥

अलमीति वर्तते तच्छब्देन संभावनं परामृश्यते अलमर्थविशिष्टे सम्भावनवाचिनि धौ साधि वा लिङ् भवति । यच्छब्दाप्रयोगे पूर्वेण नित्यो लिङ् ।

हेतुफलयोर्लिङ् ॥ १३२ ॥

हेतुः कारणं फलं कार्यं हेतौ तत्काले च ध्वर्थे वर्तमानाद्धोः लिङ् भवति । अतिथींश्चेल्लभेत भृशमन्नं ददीत यदि गुरुपुंजां कुर्वीत स्वर्गमारोहेत् । वेत्यनुवर्तनात्पक्षे लृट् । अतिथींश्चेल्लप्स्यते भृशमन्नं दास्यते । लिङिति वर्तमाने पुनर्लिङ्ग्रहणं वत्स्यर्यति यथा स्यादिह मा भूत । वर्षतीति धावति । हन्तीति

पश्चायते । क्रियावृत्तौ वत्स्यंति भूते च नित्यो लृङ् ।

इच्छार्थे लिङ्लोटौ ॥ १३३ ॥

इच्छार्थे धौ वाचि लिङ्लोटौ त्यौ भवतः । सर्वलकारापवादौ । वेति व्यवस्थितविभाषानुवर्तते । तेन कामप्रकाशने इदं विधानम् । इच्छामि भुञ्जीत भवान् । भुङ्क्तां भवान् । प्रार्थये अधीयीत भवान् । अधीतां भवान् । कामप्रकाशन इति किम् । इह मा भूत् इच्छन् करोति । नात्र प्रयोक्तुः कामप्रवेदनम् । वताप्योः पृष्टोक्ताविन्यत आरभ्य यत्र केवलो लिङ्हेतुः शिष्यते तत्र क्रियावृत्तौ लृङ् नान्यत्रेति केचित् ।

तुमेककर्तृके ॥ १३५ ॥

इच्छार्थे एककर्तृके धौ वाचि तुम्भवति यस्मात्तुम् विधीयते प्रत्यासत्तेः तदपेक्षयैककर्तृकत्वम् । लिङ्लोटोरपवादोऽयम् । इच्छति भोक्तुम् । वाञ्छति कर्तुम् । कामयते कर्तुम् । एककर्तृक इति किम् । देवदत्तं भुञ्जानमिच्छति परः । इह कस्मान्न भवति । इच्छति कटं करोति चैनम् । नात्र करोतिं प्रतीच्छतेः सामर्थ्यं किन्तु कटं प्रति तेनान्वर्थं वाक्यसंज्ञाविरहात्तुम् न भवति ।

लिङ् ॥ १३६ ॥

इच्छार्थे एककर्तृके धौ वाचि तुम् भवति । पूर्वं तुमा लिङ्लोटौ बाधितौ पुनर्लिङ्प्रसवार्थमेतत् । योगविभाग उत्तरार्थः । अधीयीयेति इच्छति । भुञ्जीयेति वाञ्छति । इति शब्दः क्रियाशब्दसंबन्धद्योतनार्थः ।

तेभ्यो भवति वा ॥ १३७ ॥

तेभ्य इच्छार्थेभ्यो धुभ्यः भवति काले वा लिङ् भवति । इच्छेत् । इच्छति । कामयेत । कामयते । उश्यात् । वष्टि ।

विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थने लिङ् ॥१३८॥

विधिराज्ञापनम् । निमन्त्रणं नियमेन करणम् । यदकरणे प्रत्यवाय इत्यर्थः । आमन्त्रणं स्वेच्छया करणम् । अधीष्टः सत्कारपूर्विका व्यापारणा । संप्रश्नः संप्रधारणा । प्रार्थनं याञ्चा । विध्यादिष्वर्थेषु लिङ् भवति । सर्वत्यापवादः । विध्यादिविशिष्टेषु कर्त्रादिषु त्यार्थेषु लिङ् भवति इत्यर्थः । कटं भवान् कुर्यात् । प्राणिनो भवान्न हिंस्यात् । निमन्त्रणे संध्यासु भवान् आवश्यकं कुर्यात् । आचारं भवानधीयीत । आमन्त्रणे इह भवानासीत इह भवान् शयीत । अधीष्टे अधीच्छामो भवान् व्रतं रक्षेत् । तत्वं भवान् गृह्णीयात् । संप्रश्ने किन्नु खलु भोः जैनेन्द्रमधीयीय । प्रार्थने भवति मे प्रार्थना व्याकरणमधीयीय तर्कशास्त्रमधीयीय । यदि विध्यादिषु प्रकृत्युपाधिषु लिङ् विधीयेत । इह विदध्यात् निमन्त्रयेत आमन्त्रयेत अधीच्छेत् । प्रकृत्यैवं विध्यादयो विधीयन्ते इति लिङ् प्राप्नोति तस्माद्विध्यादयः कर्तृकर्मभावानां विशेषणानि तदभावादिह लिङ् न भवति विदधति निमन्त्रयते आमन्त्रयते अधीच्छति अत्र क्रियाया अवृत्तौ परत्वाल्लृटा लृङ् बाध्यते ।

लोट् ॥ १३९ ॥

लोट् भवति विध्यादिविशिष्टेषु कर्त्रादिषु च विधौ । ग्रामं भवानागच्छतु । प्राणिनो भवान्न हिनस्तु । निमन्त्रणे संध्यासु भवानावश्यकं करोतु । आचारमधीताम् । आमंत्रणे । इह भवानास्ताम् । इह शेताम् । अधीष्टे अधीच्छामो भवान् व्रतं रक्षतु । तत्वं भवान् गृह्णातु । संप्रश्ने किन्नु खलु भो काव्यमध्ययै । प्रार्थने भवति मे प्रार्थना धर्मशास्त्रमध्ययै । योगविभाग उत्तरार्थः ।

प्रैषातिसर्गप्राप्तकाले व्याश्च ॥ १४० ॥

प्रेषणं प्रैषः । अतिसर्गः कामचारानुज्ञा । प्राप्तकाल प्राप्तकालता विशिष्टस्य कालस्यावसर इत्यर्थः । प्रैषादिष्वर्थेषु कर्त्रादिविशेषणत्वेन गम्यमानेषु व्यसंज्ञकास्त्या भवन्ति लोट् च । भवता खलु दानं दातव्यं दानीयं देयम् । भवानिह प्रेषितः । भवानतिसृष्टः । भवतो हि प्राप्तः कालः । यद्यपि व्यसंज्ञा सामान्येन भावकर्मणोर्विहितास्तथापि सर्वापवादेषु लोटा बाध्येरन्निति पुनर्विधीयन्ते ।

लिङ् चोद्र्ध्वर्द्ध मौहूर्तिके ॥ १४१ ॥

प्रैषादयोऽनुवर्तन्ते । ऊर्द्ध्वं मुहूर्ताद्भवः ऊर्द्ध्वमौहूर्तिकः । निपातात्सविधिरुत्तरपदस्य वैप् । ऊर्द्ध्वमौहूर्तिकेर्थे वर्तमानाद्धोः प्रैषादौ गम्यमाने लिङ् भवति चकाराद्व्याश्च । उपरि मुहूर्तस्य भवान् खलु दानं दद्यात् । भवता खलु दानं दातव्यं दानीयं देयम् । केचिच्चकारेण यथाप्राप्तं समुच्चिन्वन्ति । तेषां लोडपि भवति । भवान् खलु दानं ददातु । भवान् हि प्रेषितः । भवानतिसृष्टः । भवतो हि प्राप्तः कालः ।

स्मे लोट् ॥ १४२ ॥

प्रैषादयो ऽनुवर्तन्ते । ऊर्द्ध्वमौहूर्तिक इति च स्मशब्दे वाचि प्रैषादिषु गम्यमानेषु ऊर्द्ध्वं मौहूर्तिकेर्थे लोड् भवति । व्यानां लिङश्चापवादः । ऊर्द्ध्वं मुहूर्ताद्भवान् दानं ददातु स्म । भवान् हि प्रेषितः । भवानतिसृष्टः । भवतो हि प्राप्तः कालः ।

अधीष्टे ॥ १४३ ॥

ऊर्द्ध्वमौहूर्तिक इति निवृत्तम् । अधीष्टे गम्यमाने

स्मशब्दे वाचि लोड्भवति लिङो बाधकः । अंग स्म राजन् दानं देहि व्रतं रक्ष ।

कालसमयवेलासु तुम् वा ॥ १४४ ॥

काल समय वेला इत्येतेषु वाक्षु धोः तुम् भवति वा । कालो भोक्तुम् । समयो भोक्तुम् । वेला भोक्तुम् वा । वावचनाद्यथाप्राप्तं च भवति । कालो भोक्तव्यस्य । प्रैषादिग्रहणमनुवर्तते । तेनेह न भवति । कालः पचति भूतानि कालः संहरति प्रजाः । कालः सुप्तेषु जागर्ति कालो हि दुरतिक्रमः ।

लिङ् यदि ॥ १४५ ॥

यच्छब्दप्रयोगे कालादिषु वाक्षु धोर्लिङ् भवति । तुमोऽपवादः । कालो यत्प्रजां कुर्वीत भवान् । समयो यद्भुञ्जीत भवान् । वेला यच्छयीत भवान् । केचिद्वेत्यनुवर्तयन्ति तेषां यथाप्राप्तमपि ।

तृव्याश्चार्हे ॥ १४६ ॥

अर्हतीत्यर्हः । अर्हे कर्तरि गम्यमाने तृव्याश्च भवन्ति लिङ् च । भवान् खलु कन्यायाः वोढा । भवता कन्या वोढव्या वहनीया वाह्या । भवान् खलु कन्यां वहेत् भवान् योग्य इत्यर्थः । अर्हेऽर्थे लिङा विधीयमानेन तृचो व्यानां च बाधा मा भूत् इति पुनर्विधानम् ।

आवश्यकाधमर्ण्ययोर्णिन् ॥ १४७ ॥

अवश्यं भाव आवश्यकम् । मनोज्ञादिपाठाद्वुञ् । अधमं ऋणमस्य अधमर्णः तद्भाव आधमर्ण्यम् । आवश्यकाधमर्ण्यविशिष्टे त्यार्थे कर्तरि णिन् भवति । अवश्यंहारी । मयूरव्यंसकादित्वात्सविधिः । शतंदायी । सहस्रंदायी । निष्कदायी आधमर्ण्येन इति कर्मणि तायाः प्रतिषेधः ।

व्याः ॥ १४८ ॥

आवश्यकाधमर्ण्ययोरिति वर्तते । आवश्यकाधमर्ण्ययोर्व्यासंज्ञा भवन्ति । सर्वत्यापवादेन णिना व्यसंज्ञा बाधिता इति पुनर्विधीयन्ते । भवता खलु अवश्यं धर्मः कर्तव्यः । करणीयः । कृत्यः । कार्यः । आधमर्ण्ये भवता खलु निष्को दातव्यः । देयः । योगविभाग उत्तरार्थः ।

शकि लिङ् च ॥ १४९॥

शकीत्यर्थनिर्देशः । शक्तोत्यर्थविशिष्टे धात्वर्थे लिङ् भवति चकाराद् व्याश्च । भवता खलु विद्या अध्येतव्या । अध्ययनीया अध्येया । भवान् खलु विद्यामधीयीत । भवान् हि समर्थः लिङ् सर्वापवाद इति व्यानामनुकर्षणं क्रियते । यदि शकीति प्रकृत्यर्थविशेषणम् । शक्नुयादित्यत्र लिङ् प्राप्नोति प्रकृत्यैवाभिहितत्वात् । शक्यर्थस्यानैव दोषः सामान्यविशेषभावेन भेदाभ्युपगमात् । यथा एषितुमिच्छति एषिषिषति ।

आशिषि लिङ्लोटौ ॥ १५० ॥

इष्टस्याशंसनमाशीः । अत एव निपातनादिह इकारः । आशीर्विशिष्टेर्थे वर्तमानाद्धोः लिङ्लोटौ भवतः । चिरं जीव्यात् । जीव्यास्ताम् । जीव्यासुः । जीवतु । आशिषीति किम् । जीवति यदि पथ्याशी ।

क्तिच्क्तौ खौ ॥ १५१ ॥

आशिषीति वर्तते । आशिष्यर्थे क्तिक्तौ स्यौ भवतः खुविषये । चकारः न क्तिचि दीश्चेति विशेषणार्थः । तनुतात् तन्तिः । सनुतात् सातिः । भवताद्भूतिः । कृतः क्तिचा विशेषविहितेन बाध्येरन्निति पुनर्विधीयन्ते । देवा एनं देयासुरिति देवदत्तः । देवा एनं श्रूयन्तु देवश्रुतः ।

माङि लुङ् ॥ १५२ ॥

माङि वाचि लुङ् भवति । सर्वलकारापवादः । मा कार्षीरधर्मम् । मा हार्षीत्परस्वम् । ङकारः प्रतिषेधवाचिनो माशब्दस्य ग्रहणं यथा स्यादित्येवमर्थः ।

सस्मे लङ् च ॥ १५३ ॥

सह स्मशब्देन वर्तते सस्मः । तस्मिन् माङि वाचि लङ् भवति लुङ् च । मा स्म क्रुध्यत् । मा स्म हरत् । म स्म हार्षीत् ।

इत्यभयनन्दिविरचितायां जैनेंद्रमहावृत्तौ द्वितीयाध्यायस्य
तृतीयः पादः समाप्तः

॥ ॐ नमः ॥

धुयोगे त्याः ॥ १ ॥

धुशब्देन ध्वर्थोऽत्र निर्दिष्टः । अभिधेये अभिधानस्योपचारात् । धूनां योगे सति अयथाकालोक्ता अपि त्याः साधवो भवन्ति । विश्वदृश्वाऽस्य पुत्रो जनिता । कृतः कृतः श्वो भाविता । भाविकृत्यमासीत् विश्वदृश्वेति भूतकालः जनितेत्यनेन भविष्यत्कालेन साधुर्भवति । इहोपसर्जनभूतं सुबन्तं प्रधानभूतस्य मिङन्तस्य कालमनुवर्तते धोरितिवर्तमाने पुनर्धुग्रहणं अस्तिभूजनिपरिग्रहार्थम् । त्य इति वर्तमाने पुनस्त्यग्रहणं त्यमात्रपरिग्रहार्थम् । गोमान् भवितेति मत्वन्तस्य वर्तमानकालस्य अयथाकालत्वेन साधुत्वम् ।

क्रियासमभिहारे लोट् तस्य हिस्वौ वा तध्वमोः ॥ २

क्रियासमभिहारविशिष्टे ध्वर्थे वर्तमानाद्धोर्लोट् भवति सर्वलकारापवादः । तस्य लोटः हि स्व इत्येतावादेशौ भवतः तध्वमोस्तु वा भवति । क्रियासमभिहारे लोडिति योगविभागः कर्तव्यः । ततस्तस्य हिस्वौ भवतः । किमेवं सति लब्धम् । अन्यत्र यौ लोडादेशौ हिस्वौ प्रसिद्धौ ताविह भवतः तेन मविधिदविधिव्यतिकरो न भवति । वातध्वमो रित्यत्र ध्वमा सहनिर्देशात्तशब्दस्य थादेशस्य वह्नोर्ग्रहणम् । लुनीहि लुनीही इत्येवाहं लुनामि । आवां लुनीवः । लुनीहि लुनीहि इत्येव त्वं लुनासि युवां लुनीथः । यूयं लुनीथ । तशब्दस्य तु वा भवति लुनीत लुनीत इत्येव यूयं लुनीथ । लुनीहि लुनीहि इत्येवायं लुनाति । लुनीतः । इमे लुनन्ति । भूते लुनीहि लुनीहि इत्येवाहमलाविषम् । आवामलाविष्व । वयमलाविष्म । एवं युष्मदन्ययोरपि । वत्स्यैति लुनी

हिलुनीहीत्येव लविष्यामि । आवां लविष्यावः । वयं लविष्यामः । एवं युष्मदन्ययोरपि । अधीष्व अधीष्व इत्येवाहमधीये आवामधीवहे । वयमधीमहे । एवं युष्मदन्ययोरपि योज्यम् । ध्वमस्तु पक्षे श्रवणम् । अधीध्वमधीध्वमित्येवं यूयमधीध्वे । भूते अधीष्व अधीष्व इत्येवाहमध्यगीषि आवामध्यगीष्वहि । वयमध्यगीष्महि । एवं सर्वत्र । वर्त्स्यति अधीष्व इत्येवाहमध्येष्ये । आवामध्येष्यावहे । वयमध्येष्यामहे । एवं युष्मदन्ययोरपि । एवं शेषेष्वपि लकारेषु योज्यम् । द्वित्वमपेक्ष्य लोट् क्रियासमभिहारस्य द्योतकः योग इति वर्तते प्रत्यासत्तेर्यत एव लोट् विधीयते तस्यैवानुप्रयोगः कालाश्मदाद्येकत्वादीनामभिव्यक्तये क्रियते ।

प्रचये वा ॥ ३ ॥

प्रचयः समुच्चयः । स चैकस्मिन् द्विप्रभृतेरध्यावायः । प्रचये उपाधौ वा लोट् भवति तस्य हिस्वावादेशौ भवतः तध्वमोस्तु वा । अयं सर्वलकारप्राप्तौ विकल्पः । कर्मप्रचयो ग्राममट । नगरमट गिरिमटइत्येवाहमटामि आवामटावः । वयमटामः । ग्राममट नगरमट गिरिमटइत्येवं त्वमटसि । युवामटथः । यूयमटथ । तशब्दस्य तु वा ग्राममटत नगरमटत गिरिमटत इत्येव यूयमटथ । ग्राममट नगरमट गिरिमट इत्येवायमटति इमौ अटतः । इमे अटन्ति । वावचनात् ग्राममटामि नगरमटामि गिरिमटामि इत्येवाहमटामि । आवामटावः । वयमटामः । एवं युष्मदन्ययोरपि । एवं भूते वर्त्स्यति सर्वलकारेषु योज्यम् । द्रव्याभ्य्यः जैनेन्द्रमधीष्व तर्कमधीष्व गणितमधीष्व इत्येवाहमधीये आवामधीवहे वयमधीमहे । जैनेन्द्रमधीष्व तर्कमधीष्व गणितमधीष्व इत्येव त्वमधीषे युवामधीयाथे यूयमधीध्वे । ध्वमस्तु वा जैनेन्द्रमधीध्वं तर्कमधीध्वं गणितमधीध्वं इत्येव

यूयमधीध्वे । जैनेन्द्रमधीध्व तर्कमधीध्व गणितमधीध्व इत्येवा-यमधीते इमौ अधीयाते इमे अधीयन्ते। वावचनात् जैनेन्द्रमधीये गणितमधीये तर्कमधीये इत्येवाहमधीये । आवामधीवहे । वयमधीमहे । एवं भूते वर्त्स्यति सर्वलकारेषु योज्यम् । कर्तृ-समुच्चये देवदत्तोऽद्धि जिनदत्तोऽद्धि गुरुदत्तोऽद्धि इत्येव वयमो-दनमद्मः । देवदत्तोऽद्धि जिनदत्तोऽद्धि गुरुदत्तोऽद्धि इत्येव यूयमो-दनमत्थ । देवदत्तोऽद्धि जिनदत्तो ऽद्धि गुरुदत्तोऽद्धि इत्येव इमे ओदनमदन्ति । कर्तृसमुच्चये द्विवचनं बहुवचनं वा भवति एकस्य समुच्चयाभावात् । क्रियासमुच्चये ओदनं भुङ्क्ष्व सक्तून् पिब धानाः खाद इत्येवाहमभ्यवहरामि आवामभ्यवहरावः वयमभ्यवहरामः । बहूनां क्रियाणां समुच्चये सामान्याप्रयोगेऽभिधानवशात् । एवं प्रकरसमुच्चयेऽप्यूह्यः ।

निषेधेऽलंखल्वोः क्त्वा ॥ ४ ॥

वेति वर्तते । अलं खलु इत्येतयोर्निषेधवाचिनोर्वाचोः धोः क्त्वा प्रत्ययो भवति। अलं कृत्वा । अलं बाले रुदित्वा । भिन्नामेवेति नियमात् वाक्सो न भवति । निषेध इति किम् । अलंकारः । अलंखल्वोरिति किम् । मा कार्षीः । वेत्येव । अलं रोदनेन । प्रकृत्यादिभ्य उपसंख्यानमिति भा ॥

माङो व्यतिहारे ॥ ५ ॥

माङो व्यतिहारेऽर्थे क्त्वा भवति वा परकालत्वादप्राप्तः क्त्वा विभाष्यते । अपमित्य याचते । अपमित्य हरति । वेमेङ इतीत्वम् । वेत्यधिकारात् याचित्वा अपमयते । हृत्वा अपमयते । मेङः कृतात्वस्य निर्देशो ज्ञापकः । नानुबन्धकृतं हलन्तत्वम् ।

परावरयोगे ॥ ६ ॥

परावराभ्यां योगे गम्यमाने धोःक्त्वा भवति वेति वर्तते ।

संबन्धिशब्दत्वात् परेण पूर्वस्य योगे अप्राप्य नदीं पर्वतः। परया नद्या युक्तः पर्वतः प्रतीयते। अवरेण योगे परस्य क्त्वा। अतिक्रम्य पर्वतं नदी। अवरपर्वतयोगविशिष्टा परा नदी प्रतीयते। वावचनाल्लडादयो भवन्ति। न प्राप्नोति नदीं पर्वतः। अतिक्रामति पर्वतं नदी॥

परकालैककर्तृकात् ॥ ७ ॥

परः कालो यस्य सेयं परकाला क्रिया तया एककर्ता यस्य सामर्थ्यात् पूर्वकालक्रियाभिधायिनः स तथोक्तः। तस्माद्धोः क्त्वा भवति। स्नात्वा भुङ्क्ते। स्नात्वा भुक्त्वा व्रजति। एककर्तृकादिति किम्। भुक्तवति देवदत्ते गच्छति जिनदत्तः। परकालग्रहणं किम्। सामर्थ्यात् पूर्वकालक्रियाऽभिधायिनो यथा स्यादिह मा भूत्। भुङ्क्ते च पिबति च आस्ते च जल्पति च इहापि कथंचित् पूर्वकालत्वविवक्षास्ति। व्यादाय स्वपिति। संमील्य हसति। इति वेत्यधिकरात्। भुङ्क्ते शेते च।

णम् चाभीक्ष्ण्ये ॥ ८ ॥

परकालैककर्तृकादिति वर्तते। मुहुर्मुहुर्वृत्तिराभीक्ष्ण्यम्। एतच्च प्रकृत्यर्थविशेषणम्। परकालैककर्तृकात् णमित्ययं स्यो भवति क्त्वात्यश्च। आभीक्ष्ण्ये भोजंभोजं व्रजति। भुक्त्वा भुक्त्वा व्रजति। पायं पायं गच्छति। पीत्वा पीत्वा गच्छति। क्त्वाणमौ द्वित्वमपेक्ष्याभीक्ष्ण्यं द्योतयतः। पूर्वेण क्त्वात्ये सिद्धे णमर्थं वचनम्। इह वेतिनिवृत्तम्। उत्तरत्र वाग्रहणात्।

न यदनाकाङ्क्षे ९ ॥

यच्छब्दे वाचि क्त्वाणमौ न भवतः अनाकाङ्क्षे सति वाक्ये अनन्तरव्यवहितभेदाभावात् पूर्वसूत्रविहितो अनन्तरश्च क्त्वा निषिध्यते णम् च। यदयं भुङ्क्ते ततो गच्छति। यदयं

शेते ततोऽधीते । अनाकाङ्क्ष इति किम् । यदयं भुक्त्वा व्रजति । अधीत एव ततः परम् । अत्र पूर्वोत्तरक्रियाभ्यां व्यतिरिक्तमध्ययनं काङ्क्षते ।

वाग्रेप्रथमपूर्वे ॥ १० ॥

आभीक्ष्ण्य इति निवृत्तम् । परकालैककर्तृकादित्यनेन त्क्वात्वे प्राप्ते विभाषेयम् । अग्रे प्रथम पूर्व इत्येतेषु वाक्षु त्क्वाणमौ वा भवतः । अग्रेभोजं ततो ददाति । अग्रे भुक्त्वा ततो ददाति । प्रथमंभोजं ततो ददाति । प्रथमं भुक्त्वा ततो ददाति । पूर्वं भोजं ततो ददाति । पूर्वं भुक्त्वा ततो ददाति । भिन्नामेवेत्यत्र एवकारोपादानात् केवलेनैवामा विहितेन वाक्त्वो भवति नान्यसहितेन । वावचनाल्लङादयोऽपि भवन्ति । अग्रे भुङ्क्ते ततो ददाति । प्रथमं भुङ्क्ते ततो ददाति । पूर्वं भुङ्क्ते ततो ददाति ।

कर्मण्याक्रोशे कृञः खमुञ् ११ ॥

कर्मणि वाचि आक्रोशे गम्यमाने कृञः खमुञ् भवति । चोरोसीत्येवमाक्रोशति चोरङ्कारमाक्रोशति । दस्युङ्कारमाक्रोशति । त्क्वापवादोऽयम् । आक्रोश इति किम् । चोरं कृत्वा गच्छति । नात्राक्रोशसंपादनार्थं चोरग्रहणम् ।

स्वादुमि णम् ॥ १२ ॥

स्वादुमीत्यर्थनिर्देशः । स्वाद्वर्थेषु वाक्षु कृञो णम् भवति । परकालैककर्तृकादिति वर्तते । स्वादुङ्कारं भुङ्क्ते । संपन्नंकारं भुङ्क्ते । लवणंकारं भुङ्क्ते । स्वादुमीति णम्सन्नियोगे मकारान्तता निपात्यते । खमुञि प्रकृते स्विदप्यक्षेर्मुमच इति मुमा सिद्धमिति चेत् च्व्यन्तविवक्षायां अक्षेरिति प्रतिषेधः प्रसज्येत । खमुञ्येव मान्तनिपातनं कर्तव्यमिति चेत्

न चुण्यन्तार्थमेव तत्सम्भाव्येत णमि पुनर्निपातनं ङीनिवृत्यर्थ घोर्दीत्वनिवृत्यर्थं च । स्वादूकृत्वा यवागूं भुङ्क्ते । स्वादुं कारं भुङ्क्ते । च्विविवक्षायामस्वादुं स्वादुं कृत्वा भुङ्क्ते स्वादुं कारं भुङ्क्ते । च्वाविति दीत्वं प्रसज्येत । उत्तरार्थं च इह णम्ग्रहणम् विभाषाधिकारात् क्त्वापि भवति । क्त्वादय आतुमो विधीयमानाः भावे भवन्ति । ननु स्वादुंकारं भुङ्क्ते देवदत्त इति णमा कर्तुरनुक्तत्वात् कर्तरि ता प्राप्ता नक्तिसेत्यादिना ताः कर्तरि न भवति

अन्यथैवंकथमित्थंस्वनर्थात् ॥ १३ ॥

अन्यथा एवं कथं इत्येतेषु वाक्षु धुभ्यो णम् भवति अनर्थात् । येन विनापि यदर्थः प्रतीयते स तत्र प्रयुज्यमानोऽनर्थकः शब्दः तथाहि यावानेवार्थोऽन्यथा भुङ्क्ते इति तावानेव कृञ्प्रयोगेऽपि अन्यथाकारं भुङ्क्ते । एवंकारं भुङ्क्ते । कथंकारं भुङ्क्ते । अनर्थादिति किम् । अन्यथा कृत्वा शिरो भुङ्क्ते ।

यथातथयोरसूयाप्रत्युक्तौ ॥ १४ ॥

कृञोऽनर्थादिति वर्तते । यथातथाइत्येतयोर्वाचोः कृञोऽनर्थात् णम् भवति असूयाकर्तायां प्रत्युक्तौ गम्यमानायाम् । कथं कृत्वा भवान् भुङ्क्ते इत्येवं पृष्टोऽसूयकः तं प्रत्याह यथाकारमहं भोक्ष्ये तथाकारमहं भोक्ष्ये किं तवानेन । अनर्थादिति किम् । यथाकृत्वाहं बलिं भोक्ष्ये किं तवानेन । असूयाप्रत्युक्ताविति किम् । यथाकृत्वाहं भोक्ष्ये तथाकृत्वाहं भोक्ष्ये यदा द्रष्टव्यं भवता

कर्मण्यशेषे दृशिविदः ॥ १५ ॥

अशेषः कः साकल्यम् । इदं कर्मणो विशेषणं अशेषविशिष्टे कर्मणि वाचि दृशिविदोर्धोर्णम् भवति । साधुदर्शं प्रणमति

सर्वं साधु प्रशंसतीत्यर्थः । अतिथिवेदं भोजयति । यं यं विन्दति विन्ते वा तं सर्वं भोजयतीत्यर्थः । अशेष इति किम् । अतिथिं दृष्ट्वा भोजयति ।

यावति विन्दजीवः ॥ १६ ॥

यावच्छब्दे वाचि विन्दतिजीवत्योर्णम् भवति । यत्र पूर्वकालत्वं संभवति तत्र त्कापवादः । यत्र न संभवति तत्रापूर्व एव विधिः । धुयोग इति वर्तते । यावद्वेदं भुङ्क्ते । यावल्लभते तावद्भुङ्क्ते इत्यर्थः । यावज्जीवमधीते । यावज्जीवति तावदधीते इत्यर्थः ।

चर्मोदरयोः पूरेः ॥ १७ ॥

कर्मणीति वर्तते । चर्म उदर इत्येतयोः कर्मणोर्वाचोः पूरयतेर्णम् भवति । चर्मपूरं शेते । उदरपूरं भुङ्क्ते ।

वर्षप्रमाणे ॥ १८ ॥

कर्मणीति वर्तते । कर्मणि वाचि पूरयतेः णम् भवति समुदायेन वर्षप्रमाणे गम्यमाने । गोष्पदपूरं वृष्टो देवः । शीतापूरं वृष्टो देवः । कथं गोष्पदप्रं वृष्टो देवः प्रातेरातः के कृते क्रियाविशेषणत्वेन नपुंसकलिंगं एतस्य कन्तस्यैव विभक्त्यंतस्य घ्यादिषु च प्रयोगः साधुः । गोष्पदप्रेण गोष्पदप्री भवति गोष्पदप्रतरम् गोष्पदपूरं वृष्टो देवः इत्येवमादावुभयथा प्रयोग इष्यते णमन्तस्य घञन्तस्य च क्रियाविशेषणभावेन प्लुतिविभक्त्यन्तरे च विशेषः णमन्तस्यहि देश्यादिषु गोष्पदपूरं भवति गोष्पदपूरंदेश्यम् गोष्पदपूरंदेशीयं गोष्पदपूरंकल्पं गोष्पदपूरंतराम् । घञन्तस्य गोष्पदपूरीभवति गोष्पदपूरदेश्यं गोष्पदपूरदेशीयम् गोष्पदपूरकल्पम् । गोष्पदपूरतराम् ।

चेलेषु क्नोपेः ॥ १९ ॥

कर्मणीति वर्तते । चेलार्थेषु कर्मसु वाचि क्नोपयतेर्णम् भवति वर्षप्रमाणे गम्ये । चेलक्नोपं वृष्टो देवः । एवं वस्त्रक्नोपं वसनक्नोपम् ।

शुष्कचूर्णभक्षेषु पिषः ॥ २० ॥

कर्मणीति वर्तते । शुष्क चूर्ण भक्ष इत्येतेषु कर्मसु वाक्षु पिषेर्णम् भवति । शुष्कपेषं पिनष्टि तगरम् । शुष्कं पिनष्टीत्यर्थः । एवं चूर्णपेषं पिनष्टि । भक्षपेषं पिनष्टि । घञि सति क्रियाविशेषणे शुष्कस्य पेषं पिनष्टि इत्येवमादयः प्रयोगाः साधवः । इतः प्रभृति उपदंशो भायामित्यतः प्राक् यत एव धोर्णम् भवति तस्यैवानुप्रयोगोऽपि भवत्यभिधानवशात् ।

जीवाकृते ग्रहिकृञः ॥ २१ ॥

कर्मणीति वर्तते । जीव अकृत इत्येतयोः कर्मवाचिनोर्वाचोर्यथासंख्यं ग्रहि कृञ् इत्येताभ्यां णम् भवति । जीवग्राहं गृहीतः । अकृतकारं करोति

निमूले कषः ॥ २२ ॥

कर्मणीति वर्तते । निमूले कर्मणि वाचि कषेर्णम् भवति । निमूलकाषं कषति । घञि सति क्रियाविशेषणे निमूलस्य काषं कषति इत्यपि भवति ।

समूले हनश्च ॥ २३ ॥

कर्मणीति वर्तते । समूले कर्मणि वाचि हन्तेः कषेश्च णम् भवति । समूलघातं हन्ति । समूलकाषं कषति ।

करणे ॥ २४ ॥

हन इति वर्तते । करणे वाचि हन्तेर्णम् भवति । पाणिघातं कुड्यं हन्ति । पाणिना हन्तीत्यर्थः । पादघातं शिलां हन्ति यदा हिंसार्थो हन्तेर्विवक्षितः तदा हिंसार्थादेककर्मकादिति

णमपि ईब्विधिं पूर्वविप्रतिषेधेन बाधित्वा अयमेव णम् । असिघातं हंति चौरान् कोऽत्र विशेषः अनेन नित्यः सविधिः तस्यैव धोरनुप्रयोगश्च भवति ।

हस्ते वर्तिग्रहः ॥ २५ ॥

करण इति वर्तते हस्त इति अर्थनिर्देशः । हस्तवाचिनि करणे वाचि वर्तयतिगृह्णातिभ्यां णम् भवति । हस्तवर्तं वर्तयति हस्तेन वर्तयति इत्यर्थः । एवं पाणिवर्तम् । करवर्तम् । हस्त ग्राहं गृह्णाति । हस्तेन गृह्णातीत्यर्थः । एवं पाणिग्राहं करग्राहम् ।

स्वेषु पुषः ॥ २६ ॥

करण इतिवर्तते स्व इति स्वरूपस्य तद्विशेषाणां च ग्रहणम् । बहुत्वनिर्देशात् । स्ववाचिकरणवाचिनि पुषेर्णम् भवति । आत्मात्मीयज्ञातिधनानि स्वशब्देनेष्यन्ते । स्वपोषं पुष्टः । विद्यापोषं गोपोषं मातृपोषं पितृपोषं रैपोषं पुष्णाति । सर्वत्र घञन्तेन णमन्तस्यार्थकथनं द्रष्टव्यम् । स्वेन पोषं पुष्टं इति स एव पुषिः कालसाधनभेदादन्यत्वं गतः पुषिणा युज्यते यथा एषितुमिच्छति एषिषिषति इषिरिषिणा युज्यते ।

स्नेहने पिषः ॥ २७ ॥

करण इति वर्तते । स्निह्यतेऽनेनेति स्नेहनं स्नेहनवाचिनि करणे वाचि पिषेर्णम् भवति । घृतपेषं पिनष्टि । घृतेन पिनष्टीत्यर्थः । एवं तैलपेषम् । उदपेषम् । पेषमीत्युदकस्योदादेशः ।

वन्धोऽधिकरणे ॥ २८ ॥

अधिकरणे वाचि बध्नातेर्णम् भवति । चक्रबन्धं बद्धः । चक्रे बद्ध इत्यर्थः । एवं चारकबन्धम् । द्रुष्टिबन्धम् । गुप्तिबन्धम् । बध्यमानाधारे वाचि णम् भवति न बन्धाधारे । हस्ते बध्नातीति वेत्यधिकाराद्वा न भवति ।

खौ ॥ २९

खुविषये च बध्नातेर्णम् भवति । चण्डालिकाबन्धं बद्धः । अट्टालिकाबन्धं बद्धः । महिषिकाबन्धं मयूरिकाबन्धं क्रौञ्चबंधं बद्धाः । णमन्ताः बन्धविशेषाणां संज्ञा एताः अर्थप्रदर्शनं तु यथाकथं चित्करणेन वाचा अन्यथा वा दर्शनीयम् । अन्ये तु व्याचक्षते खुभूतो यो बन्धः तस्मिन् करणवाचिनि वाचि बध्नातेर्णम् भवति ।

कर्त्रोर्जीवपुरुषयोर्न्शिवहोः ॥ ३० ॥

जीव पुरुष इत्येतयोः कर्तृवाचिनोर्वाचोर्यथाक्रमं नशिवहिभ्यां णम् भवति । जीवनाशं नश्यति । जीवो नश्यतीत्यर्थः । पुरुषवाहं वहति । पुरुषो भूत्वा वहतीत्यर्थः । कर्त्रोरिति किम् । जीवेन नष्टपुरुषं वहन्ति । अत्र करणं कर्म च वाक् ।

ऊद्र्ध्वे शुषिपूरोः ॥ ३१ ॥

कर्त्रोरिति वर्तते । ऊद्र्ध्वशब्दे कर्तृवाचिनि वाचि शुषिपूरि इत्येताभ्यां णम् भवति । ऊद्र्ध्वशोषं शुष्कः । ऊद्र्ध्वः इत्यर्थः । ऊर्द्धपूरं पूर्यते ऊर्ध्वं पूर्यत इत्यर्थः ।

कर्मणि चेवे ॥ ३२ ॥

शब्दे कार्यस्यासंभवादिवार्थ उपमानं गृह्यते । इवशब्दार्थे वर्तमाने कर्मणि कर्तरि भूवादिधोर्णम् भवति कर्मणि । घृतनिधायं निहितः । घृतमिव निहित इत्यर्थः । एजं जीवितरक्षं रक्षितः । कर्तरि अक्रूरनाशं नष्टः । अक्रूर इव नष्ट इत्यर्थः । एवमजकनाशं नष्टः । चूडकनाशं नष्टः । पिषादिषु यथाविध्यनुप्रयोगो न वक्तव्यः । धुयोग इति वर्तते तत्र प्रत्यासत्तेरभिधानवशाद्धा घृत एव धोर्णम् तस्यैवानुप्रयोगः ।

उपदंशो भायाम् ॥ ३३

उपपूर्वाद्दंशेर्भान्ते वाचि णम् भवति धुयोग इति च

णिन् च्यपावश्यकाधमर्णे ।
४ । ४ । १३४ ।
णिश्रिस्तुतङ्कर्मणः । ४ । ३ । ४३ ।
णिहलिजुपांत्याद्वा । ४ । २ । २५१ ।
णेरिक्तानिडामाल्वंतेत्न्वाच्ये
। ४ । ३ । १०१ ।
णेवेत्त्यासश्रंथघट्टवंदोऽनः
। ४ । ४ । ७५ ।
णोऽन्नात् । ३ । २ । १९० ।
णोऽसेः । २ । २ । १५९ ।
णौ गमज्ञाने । ४ । ३ । १२५ ।
णौ मृगरमणे । ४ । १ । २२६ ।
णौ सन्डे । ४ । १ । १२२ ।
ण्युक्तः । ४ । ४ । ६७ ।
ण्योऽतिथे । ३ । २ । २०५ ।
ण्योऽन्वङिधक्षीपात् । ३ । १ । ७९ ।
ण्वुत्रज् लिहादिभ्यश्च ।
४ । ३ । ८५ ।

॥ त ॥

तंत्रान्नवोद्धृते । ३ । ३ । १०४ ।
तं भाविभूते च । ३ । २ । १०३ ।
तः । १ । १ । १२९ ।
तक्षस्तनूकृतौ । ४ । ३ । २७ ।
तङः । १ । ४ । १२१ ।
तङि वा । ४ । ३ । १४ ।
तङोऽनतः । १ । ४ । ९० ।
ततः । ४ । १ । ४८ ।
ततः प्रागार्यवज्रस्य । १ । २ । १३ ।
तत् । ३ । २ । २२७ ।
तत्पुरुषे कृति बहुलं । २ । २ । १४ ।
तत्प्रत्यनोर्लोमकूलेपात् ।
३ । २ । २६ ।
तत्सम्मयोपात्पीड्रुधकृषः ।
४ । ४ । १५७ ।
तत्र । ३ । ३ । ३ ।
तत्र साधौ । ३ । २ । १९६ ।
तत्राधीने । ३ । ४ । ६१ ।
तत्र नियुक्ते । ३ । २ । ७२ ।
तत्राहोरात्रांशं कृत्न । २ । १ । ५५ ।
तत्रोद्धृतेऽमत्रेभ्यः । २ । ४ । २३५ ।
तथाऽग्रादेः । २ । ४ । ११६ ।
तदः पादपूरणे । १ । १ । १५९ ।
तदस्य पण्यं । ३ । २ । ५२ ।
तदत्रा स्मै वा वृद्ध्यायलाभोप-
दाशुल्कं देयं ३ । २ । १५६ ।
तदस्य प्रमाणान्मयट् । ३ । ३ । ६० ।
तदस्मिन्प्रायोऽन्नं नाम्नि ।
३ । ३ । १०७ ।
तद्वृति घण् । ३ । ४ । ३१ ।
तद्यात्येभ्यः । ३ । २ । ८६ ।
तद्धरद्वहद्वावहत्सु वंशादेर्भा-
रात् । ३ । २ । १६६ ।
तद्धत्योजसः । ४ । १ । २३ ।
तनुपुत्राणुस्नातवृहतीशून्या-
त्सूत्रकृत्रिमनिपुत्रसमा-

॥ न ॥

॥ प: ॥

"स्वि" इत्यादेस्तद्वत् त्वमपि ज्ञानादिगुणवानसीत्येवं-गुणपरत्वान्नाभेदप्रतिपादकत्वमित्यत आह-अत एवेति ।

अत एव प्रत्यक्षविरोधादभेदश्रुतिः "आदित्यो यूपः" इति श्रुतिरिव गुणवाद इति प्रत्युक्तम् । प्रत्यक्षस्य सद्विलक्षणभेदाविषयत्वेनाप्युपपत्तेः । भेदनिषेधवचनस्य तात्पर्यलिङ्गानुगृहीतत्वात् । प्रत्यक्षश्रुत्योर्यथार्थत्वे संभवति श्रुतेर्बाधायोगाच्च ।

एतेन प्रत्यक्षस्योपजीव्यत्वेन बलवत्त्वात्तेन श्रुतेर्बाध इति निरस्तम् । उपजीव्यांशस्य श्रुत्याऽबाधितत्वात् । भेदसत्तांशे प्रामाण्यस्यानुपजीव्यत्वात् । तथा चाहुः "उत्पादकाप्रतिद्वन्द्वित्वादिति । प्रत्यक्षस्य ज्येष्ठत्वेऽपि प्रत्यक्षश्रुत्योर्भिन्नविषयत्वान्न श्रुतिबाधः ।

तस्मादद्वैतसिद्धान्तविजये दुन्दुभिश्रुतिः ।
नान्येऽतोऽस्तीति जयति भेदवादिशुगावहा ॥

अतः शब्दपरामृष्टमेवाह--प्रत्यक्षस्येति । वर्त्तमानमात्रविषयस्य प्रत्यक्षस्य त्रैकालिकबाधाभावलक्षणसत्त्वागोचरत्वादवर्त्तमानत्वस्य च वास्तवाभेदाविरोधादभेदश्रुतेर्जघन्यवृत्त्या न गुणपरता युक्ता इत्यर्थः । किंच "आदित्यो यूपः" इत्याद्यर्थवादस्य प्रत्यक्षविरोधेन

स्वार्थपरित्यागेऽपि विध्यपेक्षितस्तुतिसमर्पणेन विध्येकवाक्यतया प्रामाण्यमुपपद्यते । अभेदश्रुतेस्त्वनन्यशेषत्वात्स्वार्थपरित्यागेऽत्यन्ताप्रामाण्यमेव स्यादित्याह--भेदनिषेधेति । किं च ग्राहकस्याभेदसत्त्वेपि भेदप्रत्यक्षस्य तद्वति तत्प्रकारकत्वलक्षणप्रामाण्यस्य संभवान्न श्रुतिबाधकतेत्याह-प्रत्यक्षेति ।

ननु लोके गृहीतसंगतिकानामेव पदानां वेदे बोधकत्वात्संगतिग्रहणस्य च भेदग्राहिपदपदार्थविषयप्रत्यक्षसापेक्षत्वादुपजीव्यप्रत्यक्षविरोधेन श्रुतेरेव बाधो युक्त इत्यत आह--एतेनेति । संगतिग्रहणाय पदार्थभेदमात्रमपेक्ष्यते, नतु तत्सत्त्वमपि । मायाविपरिकल्पितहस्त्यश्वादावपि संगतिग्रहदर्शनात् तथा च यदुपजीव्यं भेदमात्रप्रत्यक्षं, न तच्छ्रुत्या बाध्यते । यच्च बाध्यते सत्त्वावैशिष्ट्यांशविषयं, न तदुपजीव्यमित्यर्थः । उपजीव्यांशं श्रुतिर्न बाधते इत्यत्राभियुक्तसंमतिमाहतथा चाहुरिति । तथापि ज्येष्ठप्रत्यक्षविरोधे श्रुतेरेव बाधो युक्त इत्याशङ्क्य ज्येष्ठस्यापि प्रत्यक्षस्यानुपजीव्यत्वान्न श्रुतिबाधकत्वं प्रत्युत "पौर्वापर्ये पूर्वदौर्बल्यम्" इतिन्यायाज्ज्येष्ठत्वं बाध्यत्वे हेतुरित्यभिप्रेत्याह--प्रत्यक्षस्येति । अभेदश्रुतेः स्वार्थपरत्वमुपहरति श्लोकेन-तस्मादिति । यस्मात् "नान्योऽतोऽस्ति" इत्यादिश्रुतिर्नान्यपरा तस्मात्तदद्वैतसिद्धान्तविजयसूचकदुन्दुभिघोषरूपाप-

राजितभेदवादिनां शोकं कुर्वन्ती सर्वदेशेष्वप्रतिहता प्रवर्तत इत्यर्थः ॥

इदानीं प्रकारान्तरेण श्रुतिप्रत्यक्षयोरविरोधमाह- किं चेति ।

किं च प्रत्यक्षे ऽन्तःकरणावच्छिन्नात्मनो भेदोऽनुभूयते, न तु केवलस्य अहमनुभवस्य । भेदविषयस्यान्तःकरणतादात्म्यावेष्टितात्मविषयत्वस्योक्तत्वात् । न च संसाराज्ञानाद्याश्रयस्य सुषुप्तिसंबन्धिन एवाहमनुभवे भेदो ऽनुभूयत इति कथमन्तःकरणावच्छिन्नस्यैव भेदो ऽहमनुभवविषय इति वाच्यम् । अहमनुभवगोचरादतिरिक्तचिदात्माज्ञानदशायां तस्यैवाज्ञानाद्याश्रयाभेदारोपेण तथाऽनुभवात् । तज्ज्ञानदशायां तु नेश्वरभेदो ऽनुभूयते न ह्यहमनुभवगोचरातिरिक्त आत्मा ईश्वराद्भिन्न इति कश्चिदनुभवति । अन्तःकरणाधिष्ठानचैतन्यस्य सुषुप्त्यादिधर्मित्वेन तस्यैव कल्पितभेदाश्रयतया योहमज्ञो ऽस्वाप्सं, सोऽहमीश्वराद्भिन्न इत्यनुभवसंभवाच्च ।

अहं निर्दुःखो नेति प्रत्यक्षे ऽहमनुभवविषयधर्मिको ब्रह्मभेदः प्रतीयते । अहमनुभवविषयश्चान्तः करणतादात्म्यापन्न एव चिदात्मेत्यकर्त्रात्मवादे निरूपितम् ।

तथा च यस्य शबलितस्येश्वरभेदः प्रत्यक्षेण प्रतीयते, न तस्येश्वराभेदः शास्त्रेण प्रतिपाद्यते । यस्य तु केवलस्येश्वराभेदः प्रतिपाद्यते न तस्य भेदः प्रत्यक्षेण प्रतीयत इति न श्रुतिप्रत्यक्षयोर्विरोध इत्यर्थः । यदुक्तं पूर्ववादिना योऽहं सुप्तो,, यस्य यथाज्ञानं संसारश्च,' सोऽहमीश्वरो नेत्यन्तःकरणानुपहित स्वात्मनीईश्वरभेदः प्रतीयत इति तदपवदति--न चेति । किमहमनुभवगोचराच्चिदात्मनोऽविवेकदशायामयमनुभवः, विवेकदशयां वा ?। आद्ये भेदवता विशिष्टेन तद्रहितस्य केवलस्याभेदारोपादुक्तप्रत्यभिज्ञेत्यभिप्रेत्याह--अहमनुभवेति । द्वितीये ऽहमर्थातिरिक्तात्मन ईश्वराभेदेनैव सिद्धत्वान्न तत्र तद्भेदानुभवोऽस्तीत्याह--तज्ज्ञानेति । अज्ञानोपहितचैतन्यस्यैवान्तःकरणोपहितत्वात्तस्याहमर्थाभेदेऽपि शुक्लस्यैव पटस्य रक्तद्रव्योपरागे रक्तोऽयं पटो न शुक्ल इति प्रतीतेरिव योऽहमतोऽस्वाप्सं सो ऽनीश्वर इति प्रतीतेरौपाधिकभेद एव विषय इति न स्वाभाविकाभेदविरोध इत्याह--अन्तः करणेति ।

किञ्च निर्दुःखादहं भिन्न इति दुःखाभावावच्छिन्नप्रतियोगिको भेदो ऽनुभूयते विभ्वात्मवादिमते च शरीरानवच्छिन्न जीवात्मनोऽपि दुःखाभाववत्त्वात् तत्प्रतियोगिकभेदस्य स्वाभाविकस्य तस्मिन्नसंभवादौपाधिकभेद एवैतदनुभवविषय इत्यभिप्रायेणाऽऽह--किञ्च सर्वेति ।

किञ्च सर्वगतात्मवादे निर्दुःखादहं भिन्न

इत्यनुभवो नेश्वरभेदविषयतया नियन्तुं शक्यते। शरीरानवच्छिन्नजीवप्रदेशस्यापि निर्दुःख त्वात्। किञ्च नात्र योग्यानुपलब्धिरप्यस्ति पित्तोपहतनयनस्य सत्यपि शङ्खे श्वेताभेदतदनुपलब्धिवत् सतोऽपि जीवे ब्रह्माभेदस्याविद्यादोषेणानुपलम्भसंभवात्। न तं विदाथ य इमाजजानान्यद्युष्माकमन्तरं बभूव एतं ब्रह्मलोकं न विंदन्त्यनृतेन हि प्रत्यूढाः अविद्यामन्तरे वर्त्तमाना अज्ञानेनावृतं ज्ञानमित्यादिश्रुतिस्मृतिभ्यामज्ञानावरणस्य सिद्धत्वात्। श्रुतिसिद्धाभेदस्य श्रुतिसिद्धावरणेनैवानवभासोपपत्तौ तदभावकल्पनायोगाच्च। प्रतिबद्धप्रतिभासस्याप्यभावकल्पनायामतिप्रसङ्गात्।

अपि चान्योन्याभावरूपभेदस्य योग्यानुपलब्धिरूपसहकार्यभावात् न प्रत्यस्य मानगम्यत्वमित्याह—किंचेति। अनुपलब्धेस्तर्कितप्रतियोगिसत्त्वविरोधित्वमेव योग्यता। तदत्र नास्तीति सदृष्टान्तमाह-पित्तोपहतेति। पित्तस्य शङ्खश्वैत्यावभासप्रतिबन्धकत्वे ऽन्वयव्यतिरेकवदविद्याया ब्रह्माभेदप्रतिभासप्रतिबन्धकत्वे न किंचिन्मानमित्याशङ्क्याह--न तं विदाथेति। तमीश्वरं न विद। यूयं तमीश्वरं न विजानीथ। नन्वीश्वरस्याभावादेव न विजानीमो, न त्वस्मदपराधादित्यत आह—य ईश्वर इमाः प्रसिद्धा जरायुजाण्डजादिरूपाः प्रजा जजान

उत्पादितवान्। तथा च जगत्कर्तृत्वेनेश्वरस्य सिद्धत्वान्न तदभाव इत्यर्थः। तथापि तस्य भिन्नत्वाद्विप्रकृष्टत्वाच्च न अन्यदिति जानीम इत्यत आह-अन्यल्लौकिककारणविलक्षणं नित्यप्राप्तस्याप्याच्छादकत्वादस्माकमन्तरं तत्त्वरूपाच्छादनेन ततो भेदकमज्ञानं बभूव। अतो भवन्तस्तमात्मतया न जानन्तीत्यर्थः। यथा मार्गपतितं मलिनं सुवर्णपिण्डमुपर्युपरि गच्छन्तः स्खलन्तोपि सुवर्णत्वाज्ञानान्न प्राप्नुवन्ति। एवमेव सर्वे जीवा अहरहः सुषुप्तौ ब्रह्म गच्छन्तोऽपि एतं ब्रह्मलोकं ब्रह्मैव लोको ब्रह्मलोकः तं न विदन्ति न प्राप्नुवन्ति। तत्र श्रुत्यन्तरादिप्रसिद्धं हेतुमाह--अनृतेनेति। अनृतमनिर्वचनीयमज्ञानं तेन मोहिता यत इत्यर्थः। नन्वनुभूयमानमभेदं कल्पयित्वा तदनवभासप्रयोजकतया प्रतिबन्धकस्यापि कल्पनाद्वरमभेदस्यैवाभावकल्पनमित्यत आह--श्रुतिसिद्धेति। अयोगमेवोपपादयति-प्रतिबद्धेति। प्रतिबद्धइति बहुव्रीहिः॥

किञ्च यथा व्याधपरिगृहीते ब्राह्मणपुत्रे राजपुत्रे वा विद्यमानोऽपि ब्राह्मणादिशरीराभेदस्तन्निश्चायकोपदेशाभावान्नोपलभ्यते। अत एव व्याधभावेन विपर्यस्यते। एवं च जीवेश्वराभेदस्याप्युपदेशमात्रगम्यत्वात्तदभावदशायां सतोऽप्यभेदस्योपलम्भकाभावादेवानुपलम्भाद्युपपत्तेर्योग्यानुपलब्ध्यभावान्नाभेदाभावरूपभेदः प्रत्यक्षयोग्य इत्याह—अपि चेति।

अपि च यथा ब्राह्मणत्वाद्याश्रयाभेदे सत्यपि मनुष्यशरीरे तदुपदेशासहकृतप्रत्यक्षेण स नानु-

भूयते, विपरीततया च गृह्यते। एवं जीवे ब्रह्माभेदे सत्यपि यथावद्वेदान्तोपदेशार्थावगमात्पूर्वं स नानुभूयते, तदभावश्च ज्ञायते। नावेदविन्मनुते तं बृहतमिति। तत्र वेदान्तातिरिक्तमानाप्रवेशस्य तं त्वौपनिषदं सर्वे वेदा यत्पदमामनन्ति आचार्यवान् पुरुषो वेदेति। वेदान्तानामाचार्यस्य चात्मावबोधसाधनत्वस्य श्रुतिसिद्धत्वात्। सहकारिविरहादनुभूयमानस्याप्यभावे सर्वत्र तथा प्रसङ्गात्।

किञ्च न तावदण्वात्मनीश्वरभेदः प्रत्यक्षग्राह्यः। अणोर्जीवस्यातीन्द्रियत्वेन तत्र तर्कितेश्वराभेदस्य जीवाभेद इवातीन्द्रियत्वात्। नाप्यनुमानम्। अनुकूलतर्काभावेनोक्तहेतूनामप्रयोजकत्वात्। सर्वज्ञत्वकिञ्चिज्ज्ञत्वादेरौपाधिकस्यामत्वावद्यातत्ववद् व्यवस्थितत्वात्। भेदनिषेधश्रुतिप्रामाण्यभङ्गप्रसङ्गलक्षणप्रतिकूलतर्कपराहतत्वाच्च।

स नानुभूयत इति। संशयादिनिवर्त्तकानुभयविषयो नेत्यर्थः। तदभावश्चेति। अभेदाभावरूपभेदो भ्रान्त्या गृह्यते इत्यर्थः। ब्रह्माभेदस्योपदेशमात्रगम्यत्वे हेतुमाह-नावेदविदिति। वेदान्तानामिति। अधीतमात्रवेदाना-

मायातं बोधहेतुत्व आचार्योक्तिन्यायेपोद्वलितानां तेषां संशयादिनिवर्त्तकसत्तानिश्चयहेतुत्वमिति भावः ।

किं च जीवस्य ब्रह्मातिरिक्तस्वरूपेण सर्वगतत्वे मानाभावान्मध्यमपरिमाणत्वे चानित्यत्वादिप्रसङ्गाद्वस्तुतोऽभेदेऽणुत्वमेव वाच्यम् । तथा च परमाणाविव जीवेऽपि नेश्वरभेदः प्रत्यक्षेण शक्यते ग्रहीतुम् । योग्यानुपलब्ध्यभावादित्यभिप्रेत्याह-किञ्चेति । ब्रह्मजीवप्रतियोगिकधर्मिसमसत्ताकभेदवद् अभ्रान्तत्वादित्याद्यनुमानान्यपि न भेदे मानमित्याह-नापीति । ईश्वरस्य भ्रान्तजीवाभेदेऽभ्रान्तत्वसर्वज्ञत्वाद्यनुपपत्तिरेवानूकूलतर्क इत्याशङ्क्य तत्त्वतोऽभेदेऽप्यौपाधिकभेदेन बिम्बप्रतिबिम्बमुखयोरवदातत्वश्यामत्ववदीश्वरस्य सर्वज्ञत्वादिकमेव, जीवस्य तु भ्रान्तत्वादिकमेवेति व्यवस्थोपपत्तेर्मैवमित्याह-सर्वज्ञेति । किञ्चभेदनिषेधश्रुतीनामन्यपरताया निरस्तत्वादभेदाभावे तदप्रामाण्यापत्तिलक्षणप्रतिकूलतर्कपराहतिश्चेत्याह-भेदेति ।

किञ्च आद्यानुमाने किं जीवब्रह्मपदवाच्ययोर्भेदः साध्यते, उत जीवास्तत्वतो ब्रह्मणो न भिद्यंत इत्यभेदानुमाने यौ जीवब्रह्मपदार्थौ तयोर्वा किं वा जीवब्रह्मपदोपलक्षितयोः ? । आद्ये सिद्धसाधनं ब्रह्मशब्दवाच्यस्य विशिष्टरूपस्य स्वसमानसत्ताकानिर्वचनीयजीवभेदवत्त्वाभ्युपगमादित्याह--ब्रह्मजीवेति ।

ब्रह्मजीवप्रतियोगिकधर्मिसत्तासमानसत्ताकभेदवानित्यनुमानं च सिद्धसाधनंबुद्ध्युपहितजी-

वात् संसारिणस्त्वंपदवाच्यात् तत्पदवाच्यस्यासंसारिणो ब्रह्मणः सर्वज्ञत्वादिविशिष्टस्याद्वैतवादिभिरपि भेदस्याभ्युपगतत्वात् । अभेदानुमानेऽपि तयोरेव जीवब्रह्मशब्दाभ्यामभिहितत्वात् विशुद्धचिदात्मन एवाऽऽविद्यकबुद्ध्युपहिततया संसारः, स्वरूपेण नित्यमुक्तत्वमिति बन्धमोक्षयोरेकाधिकरणत्वाच्च । न च सर्वज्ञत्वाद्युपलक्षितस्य पक्षत्वम् । तस्यैव दुःखाद्यनुभवितृत्वेन ममासिद्धेः । न च तदुपहितं पक्षः । उपहितत्वस्य विशेषणोपलक्षणत्वे उक्तदोषापरिहारात् । मिथ्यात्वधर्मिशुक्तिरजतादिसमानसत्ताकभेदवत्तयाऽर्थांतरञ्च ॥

द्वितीयेऽपि सिद्धसाधनमेव स्यात् । अनुमाने तु तत्त्वत इति विशेषणान्न बाध इत्यभिप्रेत्याह—अभेदानुमानेपीति । ननु त्वंपदवाच्यस्य ब्रह्मभिन्नस्य संसारित्वं तल्लक्ष्यस्य ब्रह्माभिन्नस्य मुक्तिरिति बन्धमोक्षयोर्वैयधिकरण्यं स्यादित्याशङ्क्याह-विशुद्धेति । परमते यथा शरीरोपहितात्मनिष्ठेन सुखदुःखानुभवरूपबन्धेन तदनुपहितात्मनिष्ठमोक्षस्य सामानाधिकरण्यम् । एवमहंकारोपहितचिदात्मधर्मबन्धेन केवलात्मान्वयिमोक्षस्यापि तदुपपत्तिः । उपहितात्मधर्मोऽपि बन्धः परमार्थ इति परेषामभिमानः । अस्माकं तूपहितेऽपि कूटस्थचिदात्मन्याध्यासिकः स इत्येतावदेव वैषम्यमिति भावः । तृतीयेऽपि किं ब्रह्मपद-

लक्ष्यं सर्वज्ञत्वाद्युपलक्षितं तदुपहितं वा ? । आद्ये चिन्मात्रस्य तदुपलक्षितत्वेन जीवचैतन्यस्यापि पक्षता स्यात् । तथा च हेतुरन्यतरासिद्ध इति दूषयति- न च सर्वज्ञत्वेति । द्वितीये उपहितत्वं विशेषणमुपलक्षणं वा ? आद्ये सिद्धसाधनम् । द्वितीये पूर्ववदसिद्धिरिति दूषयति-न च तदिति । एवं पक्षं दूषयित्वा साध्यमपि दूषयति-मिथ्यात्वेति ।

यत्रोक्तं धर्मिशब्दस्य संबन्धिवाचकत्वान्मात्रादिशब्दवत् प्रकृतिपदार्थधर्म्मिवाचकत्वमेवेति तदपवदति-न चेति ॥

न च धर्मिशब्दस्य सम्बन्धिशब्दत्वात् न रजतपरामर्शित्वमिति वाच्यम् । किं तर्हि ब्रह्मणो धर्मित्वं किं वा भेदस्य ? । नाद्यः । ब्रह्मणस्तदभावात् । द्वितीये हि ब्रह्म भेदधर्मिसमानसत्ताकजीवप्रतियोगिकभेदवदिति स्यात् । तथा च शुक्तिरजतादेरपि जीवप्रतियोगिकभेदधर्मित्वात्सिद्धसाधनम् । न च धर्मिपदं ब्रह्मण एव वाचकम् । घटादौ साध्यवैकल्यात् । न च धर्मिपदस्थाने स्वपदप्रक्षेपान्न दोष इति वाच्यम् । ब्रह्म ब्रह्मप्रतियोगिकधर्मिसत्तासमानसत्ताकभेदवत्, स्वसमानसत्ताकजडत्ववत्, तादृशदुःखवत् दुःखाननुभवितृत्वात्;

असंसारित्वात्, अभ्रान्तत्वात्; ज्ञातृत्वात्। घटवत्, जीववच्च इत्याभाससमानयोगक्षेमत्वात्। न च पारमार्थिकभेदः साध्यः। श्रुतिनिषिद्धस्य पारमार्थिकत्वानुपपत्तेः, दृष्टान्ते साध्याभावाच्च ॥

अत्र हि प्रतिज्ञावाक्ये ब्रह्मपदार्थो भेदपदार्थश्च प्रकृतः। तत्र धर्मिपदेन ब्रह्मणो धर्मित्वं विवक्षितम्ः, भेदस्य वेति विकल्पयति-किं तर्हीति। आद्ये साध्याप्रसिद्धिरित्यभिप्रेत्याह-नाद्य इति। द्वितीये शुक्तिरजतादेरपि जीवप्रतियोगिकभेदं प्रति धर्मित्वात् तत्समसत्ताकजीवभेदो ब्रह्मण्यभेदाविरोधीष्ट एवेत्याह-द्वितीय इति। ननु ब्रह्मनिष्ठभेदस्य प्रकृतत्वात् तद्धर्मि ब्रह्मैव धर्म्मिपदार्थ इत्यत आह-न चेति। घटादाविति। तत्र ब्रह्मसत्ताकभेदस्य समासिद्धेरिति भावः। यदपि चोक्तं धर्मिपदस्थाने स्वपदं वाऽस्त्विति तदाभाससाम्येन दूषयति-न च धर्मीति। तादृशदुःखवदित्यत्र हेतुर्ज्ञातृत्वादिति। तत्रैव दृष्टान्तो जीववदिति। ननु धर्मिग्राहकमानेन ब्रह्मण एकत्वेन चिद्रूपत्वेन निर्दुःखत्वेनैव च सिद्धत्वादुक्तहेतूनां धर्मिग्राहकमानबाध इति चेत्-तर्हि जीवभेदानुमानेऽपि ब्रह्मसाधकमानेन श्रुत्या जीवाभेदेनैव तस्य सिद्धत्वाद्धर्मिग्राहकमानबाधस्तुल्य इति भावः। यदपि चोक्तं धर्मिसमानसत्ताकेतिपदस्थाने पारमार्थिकेत्यादिविशेषणं देयमिति, तद् दूषयति-न चेति। पारमार्थिकत्वानुपपत्तिरित्युपलक्षणं श्रुतिनिषि-

द्धत्वादेव यावद्ब्रह्मस्वरूपमनुवर्तमानत्वादिकमपि भेदस्यानुपपन्नमित्यर्थः । पारमार्थिकभेदवदिति साध्ये दोषान्तरमाह-दृष्टान्त इति ॥

यत्तु सामान्यानुमानेन घटे जीवप्रतियोगिकपारमार्थिकभेदसिद्धिरित्युक्तं, तद् दूषयति-न चेति ।

न च घटो जीवप्रतियोगिकप्रतियोगिज्ञानाबाध्यभेदवान् जीवधर्मिकधर्मिज्ञानाबाध्याभेदाप्रतियोगित्वात् इत्यनुमानात्तत्सिद्धिः । घटस्य स्वरूपेणानिर्वचनीयस्य विनापि पारमार्थिकभेदं जीवज्ञानाबाध्याभेदाप्रतियोगित्वात् । सति हि धर्मिणि सत्प्रतियोगिकाभेदाभावे सन् भेदः सिध्यति । भेदस्य जीवज्ञानाबाध्यत्वेऽपि न सत्यता । तस्य ब्रह्मविषयाज्ञानादेव जीवत्वादेरिव सिद्धत्वात् । न च जीवप्रतियोगिकब्रह्मज्ञानाबाध्यभेदवानिति वा साध्यम् । आत्मातिरिक्तस्य सर्वस्यापि ब्रह्मज्ञानेन बाधात् । उक्तरीत्या अप्रयोजकत्वाच्च ॥

घटे सद्रूपजीवाभेदाप्रतियोगित्वस्य सत्त्वाभावेनापि संभवादुक्तसाध्ये हेतुरप्रयोजक इत्याह-घटस्येति । कुत्र तर्हि भेदाभावात्सन् भेदः सिद्ध्यतीति वीक्षायामाह-सति हीति । भेदस्य धर्मिप्रतियोगिपरतन्त्रत्वात्तत्सत्यत्वं भेदसत्यत्वे प्रयोजकम् । न हि-धर्मी सन्न

भवति, धर्मः सन्निति युज्यते । अतः सद्विलक्षणे घटे जीवाभेदाभावेन भेदमात्रसिद्धावपि न तस्य सत्यत्वसिद्धिरिति भावः। किं च प्रतियोगिज्ञानाबाध्येति घटनिष्ठजीवभेदस्य किं कर्तृत्वादिविशिष्टजीवज्ञानाबाध्यत्वं साध्यते, उत तदुपलक्षितब्रह्मज्ञानाबाध्यत्वम् ? । आद्ये सिद्धसाधनं ब्रह्माज्ञानकार्यस्य तस्य तदज्ञानानिवर्तकजीवज्ञानाबाध्यत्वादित्याह-भेदस्येति । द्वितीयं दूषयति-न चेति । अस्मिन् पक्षे यद्यज्ज्ञानाबाध्ययद्धर्मिकाभेदाप्रतियोगि तद् ब्रह्मज्ञानाबाध्यतत्प्रतियोगिकभेदवदित्येवं सामान्यव्याप्तिर्वक्तव्या । अत्र न किंचिदुदाहरणमस्ति दूरस्थवृक्षभेदस्यापि ब्रह्मज्ञानबाध्यत्वादित्यभिप्रेत्याह-आत्मातिरिक्तस्येति । अनिर्वचनीयघटस्य ब्रह्मज्ञानेन बाध्यजीवभेदवत्त्वेऽपि तदभेदाप्रतियोगित्वोपपत्तेरत्रापि हेतुरप्रयोजक इत्याह-उक्तरीत्येति। एतेन यावत्स्वरूपमनुवर्तमानभेदवदित्यादिसाध्येष्वपि हेतोरप्रयोजकत्वमिति सूचितम् । भ्रान्त्यादेराविद्यकत्वेन तदभावरूपाभ्रान्तत्वादेर्घटादाविव जीवप्रतियोगिकाविद्यकभेदेनैव ब्रह्मण्युपपत्तेः ।

एवं सामान्यतः सर्वहेतूनां पक्षादिदूषणमुक्त्वा प्रत्येकमपि दूषयति--प्रथमेति ।

प्रथमहेतौ च दुःखपदं व्यर्थम्। घटादौ तेन विनाऽपि व्याप्तिग्रहसंभवात् । व्याप्तिग्रहोपयुक्तस्यैव हेतुविशेषणत्वात्। केवलाभावस्य व्याप्य

त्वे विशिष्टाभावस्य गौरवेणाव्याप्यत्वात् । अननुभवितृत्वमात्रस्य ब्रह्मण्यसिद्धेः । विशिष्टोऽपि हेतुरसिद्ध एव । सर्वज्ञे ब्रह्मणि दुःखाननुभवासंभवात् । स्वसमवेतदुःखाननुभवितृत्वं हेतुरिति चेत् । न, ब्रह्मणि दुःखाभावेन प्रतियोग्यप्रसिद्ध्या हेतोरसिद्धेः । न च दुःखगोचरलौकिकसाक्षात्कारानाश्रयत्वं हेतुः । अस्मन्मते जीवे व्यभिचारात्, तदीयदुःखसाक्षात्कारस्याप्यलौकिकसाक्षित्वात्, अप्रसिद्धेश्च । अभ्रान्तत्वादित्यपि हेतुरसिद्धः । मिथ्यावस्तुविषयज्ञानस्य भ्रान्तेः कल्पितप्रपञ्चसाक्षिणि ब्रह्मण्यपि सत्त्वात् ॥

दुःखपदं विना घटादावननुभवितृत्वस्यैवोक्तसाध्यव्याप्यत्वेऽप्यसिद्धिनिवारणेन तदर्थवदित्याशङ्क्याह-व्याप्तिग्रहेति । असिद्धिनिवारणमात्रेण हेतुविशेषणत्वे क्षित्यादिकमकर्तृकं शरीरजन्यत्वादित्यादिप्रयोगोऽपि साधीयान् स्यादिति भावः । विशिष्टाभावस्यान्यत्वान्न वैयर्थ्यमित्याशङ्क्याह-केवलेति । अभावरूपहेतौ स्वगतस्य व्याप्यतावच्छेदकधर्मस्याभावात् प्रतियोग्येव तदवच्छेदको वाच्यः । तथा चानुभवितृत्वमात्रस्य प्रतियोगितया व्याप्यतावच्छेदकत्वे लाघवम् । दुःखविशेषितस्यावच्छेदकत्वे तु गौरवमिति भावः । तर्ह्यननुभवितृत्वमेव हेतुरस्त्वित्यत आह-अननुभवितृत्वेति । किं

च विशिष्टहेतावपि किं दुःखविषयानुभवाभावमात्रं विवक्षितमुत स्वसमवेतदुःखाननुभवितृत्वं, दुःखगोचरलौकिकसाक्षात्कारानाश्रयत्वं वा?। आद्ये सर्वज्ञब्रह्मणो जीवगतदुःखानुभववत्त्वात्तदभावोऽसिद्ध इत्याह-विशिष्टेपीति। द्वितीयं शङ्कते-स्वसमवेतेति। स्वशब्दस्य समभिव्याहृतब्रह्मपरत्वात्तदीयदुःखाप्रसिद्ध्या तदनुभवोऽप्यप्रसिद्धः। तदप्रसिध्या च तदभावरूपहेतुरर्थासिद्ध इत्याह-न ब्रह्मणीति। तृतीयं दूषयति-न चेति। वस्तुतस्त्वस्मन्मते दुःखगोचरलौकिकसाक्षात्काराभावेन तदनाश्रयत्वस्याप्रसिद्धेरत्राप्यप्रसिद्धिरित्याह-अप्रसिद्धेश्चेति। अभ्रान्तत्वादित्यत्रापि किं मिथ्यावस्तुज्ञानं भ्रान्तिस्तदभाववत्त्वं हेतुत्वेन विवक्षितमुतासज्ज्ञानं भ्रान्तिस्तदभाववत्त्वं वा?। आद्ये ब्रह्मज्ञानस्यापि मिथ्याभूतप्रपञ्चविषयत्वेन भ्रान्तित्वात्तदभावो ब्रह्मण्यसिद्ध इत्याह-अभ्रान्तत्वादित्यपीति।

द्वितीयं शङ्कते—असदिति॥

असद्विषयं ज्ञानं भ्रम इति चेत्। न, 'असन्न भासते' इति मते जीवे व्यभिचारात्। लाघवेन ज्ञानाभावस्यैव व्याप्यत्वादसिद्धेश्च। असंसारित्वमपि यदि संसारध्वंसवत्त्वं तर्हि ब्रह्मण्यप्यसिद्धिः, त्वदभिमतमुक्तजीवेषु व्यभिचारश्च। अथ संसारात्यन्ताभाववत्त्वं, तर्हि अस्मदभिमतजी-

वस्यारोपितसंसारात्यन्ताभाववत्त्वाद् व्यभिचारः। एवं जीवपक्षकभेदानुमानेष्वपि व्यर्थविशेषणत्वादय ऊह्याः साध्यवैकल्यं च घटस्य। ब्रह्मप्रतियोगिकभेदे सत्त्वाभावात्॥

एवं सति वैशेषिकादिमते जीवेऽप्यसज्ज्ञानाभावात् तत्रापि हेतुः स्यात्। तथा च व्यभिचार इत्याह-नसदिति। ननु त्वन्मतेऽपि जीवे जीवान्तरप्रतियोगिकभेदसत्त्वान्न व्यभिचार इति चेन्न। तथापि जीवत्वावच्छिन्नप्रतियोगिकजीवभेदस्य जीवे ऽभावात्। न च यत्किंचिज्जीवप्रतियोगिकजीवभेद एव साध्य इति वाच्यम्। यत्किञ्चिज्जीवत्वस्यापि सर्वजीवानुगतत्वेन तदवच्छिन्नप्रतियोगिकजीवभेदस्य जीवेऽभावात्, भेदस्य प्रतियोगितावच्छेदकाधिकरणजीवे ऽसंभवादिति भावः। ज्ञानाभावस्यैव घटादावुक्तसाध्यव्याप्तत्वादसद्विशेषणं व्यर्थं चेत्याह-लाघवेनेति। अस्तु तर्हि ज्ञानाभाव एव हेतुरित्यतआह-असिद्धश्चेति। असंसारित्वादित्यत्रापि किं संसारध्वंसवत्त्वं हेतुत्वेन विवक्षितं,तदत्यन्ताभाववत्त्वं वा?। आद्ये ब्रह्मणि संसाराभावेन प्रतियोगिसमानाधिकरणस्तद्ध्वंसोऽपि तत्रासिद्ध इत्याह-असंसारित्वमपीति। किं च पराभिमतमुक्तजीवेषु संसारध्वंससत्त्वेऽपि पूर्वोक्तविधया जीवप्रतियोगिकभेदाभावाद्व्यभिचारश्चेत्याह-त्वदभिमतेति। द्वितीयमनूद्य दूषयति-अथेति। यदपि चोक्तजीवो ब्रह्मप्रतियोगिकधर्मिसत्तासमानसत्ताकभेदवान्

असर्वज्ञत्वात्, असर्वशक्तित्वात्, अस्वतन्त्रत्वाच्च घटवदिति तत्राप्युक्तदूषणजातमतिदिशति-एवमिति । अत्रापि जीवब्रह्मपदाभ्यां विशिष्टविवक्षायां सिद्धसाधनं, कर्तृत्वाद्युपलक्षितविवक्षायां ब्रह्मणोऽपि पक्षत्वेन बाधः, तदुपहितविवक्षायां चोपहितत्वस्यापि विशेषणत्वोपलक्षणत्वयोरुक्तदोषापातात् । धर्मिपदस्थाने स्वपदप्रक्षेपे च जीवो जीवप्रतियोगिकस्वसमानसत्ताकयावद्भेदवान् स्वसमानसत्ताकज्ञानाद्यत्यन्ताभाववान् वा असर्वज्ञत्वादिभ्यः घटवदित्याभाससाम्यम् । असर्वज्ञत्वं च किंचिज्ज्ञत्वं सर्वविषयज्ञानाभावो वा सर्वविषयसाक्षात्काराभावो वा सर्वविषयलौकिकसाक्षात्काराभावो वा? । आद्ये घटादौ साधनवैकल्यम् । न द्वितीयतृतीयौ । जीवेऽपि तव मते सामान्यलक्षणादिप्रत्यासत्तिजन्यसर्वविषयज्ञानस्य तत्साक्षात्कारस्य च सत्त्वात् । तुरीये ब्रह्मणि व्यभिचारः । संयोगादिषट्कान्यतमप्रत्यासत्तिजन्यस्य लौकिकसाक्षात्कारस्य ब्रह्मण्यभावेन तत्रोक्तहेतोः सत्त्वात्, घटादौ ज्ञानाभावस्यैवोक्तसाध्यव्याप्यत्वाद्विशेषणवैयर्थ्यं च ।

असर्वशक्तित्वमपि किं सर्वासां शक्तीनां राहित्यं सर्वकार्यविषयशक्तिराहित्यं वा ?। आद्ये ब्रह्मणि व्यभिचारः वन्ह्यादिगतदाहादिशक्तेर्ब्रह्मण्यभावात् । द्वितीयेऽप्यस्मन्मते ब्रह्मणि तादृशशक्तेरारोपितत्वेन तदभावस्यापि ब्रह्मणि सत्त्वेन व्यभिचारात् । परमते ऽपि ब्रह्मप्रतियोगिकघटनिष्ठभेदे व्यभिचारः । तत्र ब्रह्मप्रतियोगिकभेदान्तराभावात् ।

अस्वतन्त्रत्वमपि किमकर्तृत्वम् अन्येच्छाधीनव्यापारवत्त्वं वा आश्रितत्वं वा कार्य्यत्वं वा?। नाद्यः। जीवस्य पुण्यपापादिकर्तृत्वेनाकर्तृत्वासिद्धेः । अस्मन्मते ब्रह्मणोऽपि वस्तुतोऽकर्तृत्वेन तत्र व्यभिचाराच्च । द्वितीये व्यापारपदेन किं कृतिरुच्यते परिस्पन्दो वा कार्य्यमात्रं वा ?। आद्ये घटे साधनवैकल्यम् । द्वितीये जीवेऽसिद्धिः। तस्य मध्यमपरिमाणत्वे ऽणुत्वे वा ऽनित्यत्वाप्रत्यक्षत्वाद्यापत्तेः। सर्वगतत्वेन वा परिस्पन्दायोगात् । आरोपितपरिस्पन्दस्य घटादिषु तवाभावात् । तृतीयेऽपि जीवेच्छाधीनजीवशरीरसंयोगादिकार्यवत्त्वात् सर्वगतेश्वरस्य तत्र व्यभिचारः । तृतीयचतुर्थयोश्च जीवेऽसिद्धिः । सर्वगतस्य नित्यस्य तस्याश्रितत्वकार्यत्वयोरभावादित्यादिदूषणं जीवपक्षकानुमानेषूह्यमिति भावः । अत्रापि धर्मिसत्तासमानसत्ताकपदस्थाने पारमार्थिकेत्यादिपदप्रक्षेपे दोषमाह—साध्येति । कार्यकारणयोरारम्भणाधिकरणन्यायेन वास्तवभेदायोगात् घटादेश्च ब्रह्मकार्यत्वात् तत्र ब्रह्मप्रतियोगिकवास्तवभेदोऽसिद्ध इत्यर्थः ।

ब्रह्मपक्षकानुमानान्तरमप्यनूद्य दूषयति—यत्त्वित्यादिना ।

यत्तु ब्रह्म तत्त्वतो जीवाभिन्नं नेत्यनुमानं, तन्न । ब्रह्मस्वरूपातिरिक्तस्य जीवाभेदस्य वास्तवत्वानुपपत्तेः, शास्त्रप्रतिपाद्यतत्स्वरूपाभेदस्य तवासिद्धेः। एतेन जीवपराभेदे वास्तवत्वं निषिध्यत

इति प्रत्युक्तम् । तस्यासिद्धावाश्रयासिद्धेः । सिद्धौ वा परमार्थत्वाद्धर्मिग्राहकमानबाधात् । सर्वेषां हेतूनामुक्तश्रुतिविरोधाच्च ।

अत एव कर्मज्ञानोपदेशानुपपत्तिर्जीवस्य ब्रह्मभेदे मानम् । अन्यथा ब्रह्मण इव जीवस्यापि तदुपदेशवैयर्थ्यादिति प्रत्युक्तम् । आत्मस्वरूपसत्तया लब्धात्माऽनिर्वचनीयभेदेनैव तदुपपत्तेः ।

किमत्र ब्रह्मस्वरूपातिरिक्तस्य तात्त्विकजीवाभेदस्य निषेधः उत तत्त्वमस्यादिशास्त्रगम्यब्रह्मस्वरूपाभेदस्य ? नाद्यः । ब्रह्मातिरिक्तस्य तात्त्विकस्याप्रसिद्धत्वेन तदभावस्यापि घटादावप्रसिद्धेः साध्यवैकल्यादित्यभिप्रेत्याह—ब्रह्मेति । द्वितीये निखिलभेदाभावात्मकस्य सत्यज्ञानादिरूपस्य शास्त्रगम्याभेदस्य तवासिद्धेरुक्तदोषस्तदवस्थ इत्यभिप्रेत्याह—शास्त्रेति । नन्वस्मिन्प्रयोगे न तात्त्विकजीवाभेदो निषिध्यते येनोक्तविकल्पः स्यात्, किं तु जीवपराभेदे ब्रह्मणि प्रसिद्धं तात्त्विकत्वमेवेत्याशङ्कामपवदति--एतेनेति । एतच्छब्दार्थमेवाह--तस्येति । जीवब्रह्मपक्षकसर्वानुमानेष्वपि "नान्योऽतोऽस्ति" इत्यादिश्रुतिबाधश्चेत्याह-सर्वेषामिति ।

जीवपरभेदे श्रुतिप्रत्यक्षानुमानानि निराकृत्यार्थापत्तिमपि निराकरोति-अत एवेति । कर्मज्ञानयोरुपदेशः कर्मज्ञानोपदेशः तदनुपपत्तिरित्यर्थः । अनुपपत्तिमेवाह--अन्यथेति । कर्माद्युपदेशस्य कर्तृत्वादि-

मात्रापेक्षत्वात्तस्य चानिर्वचनीयभेदादपि प्रतिबि-म्बगतश्यामत्वादिवज्जीवे व्यवस्थितत्वाद्वस्तुतो ब्रह्मा-भेदेऽपि नोक्तानुपपत्तिरित्याह--आत्मेति ॥

भेदस्वरूपस्यैव निर्वक्तुमशक्यत्वादनिर्वाच्यभेदेनैव सर्वत्र विरुद्धधर्मव्यवस्थेत्यभिप्रेत्य भेदस्वरूपं खण्डय-ति--किं चेति ।

किं च न तावदन्योन्याभावो भेदः । तत्प्रति-योगिनोऽनिरूपणात् । तथा हि—न तावद् घटादिः प्रतियोगी । संसर्गाभावसांकर्यप्रसङ्गात् । ननु तादात्म्यं तदवच्छिन्नो घटादिर्वा प्रतियोगीति चेत् । न, घटपटतादात्म्यस्याप्रमितत्वात् । असत्प्र-तियोगिकाभावस्याभावात् । अथ घटे घटता-दात्म्यं प्रमितं पटे निषिध्यते, घटतादात्म्याभा-वश्च पटाधिकरणस्तस्य ततो भेद इति चेत् । न, तादात्म्यस्य घटस्वरूपत्वे घटेऽपि घटभेदप्रसङ्गात् । अतिरिक्तमपि घटत्वं न तादात्म्यमिति वक्ष्यते । तदन्यत्तु दुर्निरूपमेव । किं च तादात्म्याभावो रूपा-द्यभाववन्न भेदः । योऽभावो यस्य येन तादात्म्य-विरोधी स खलु तस्य भेदः ॥

भेदः किं पदार्थधर्मस्तत्स्वरूपं वा ? । आद्येऽपि किमन्योन्याभावः स, उत वैलक्षण्यम् ? । नाद्य इत्याह—न तावदिति । किमन्योन्याभावस्य घटादिरेव प्रतियोगी

तादात्म्यं वा तदवच्छिन्नो घटादिर्वा ?। आद्ये प्रतियोगितदवच्छेदकभेदाभावात् संसर्गाभावादस्य भेदो न स्यादित्याह--न तावदिति । किं चास्य प्रतियोगिविरहस्वभावत्वेन तत्प्रतियोगिकाले तत्सामानाधिकरण्यानुपपत्तिः, तद्विरहात्मत्वाभावे ऽभावत्वमेव न स्यादिति द्रष्टव्यम् । द्वितीयतृतीयौ शङ्कते-नन्विति । किमत्र पटधर्मिकघटतादात्म्यं तत्प्रतियोगि उत घटधर्मिकघटप्रतियोगिकमेव ?। आद्यं दूषयति--न घटेति । ततः किमित्यत आह--असदिति । द्वितीयं शङ्कते-अथेति । किं घटतादात्म्यं घटस्वरूपं, तदतिरिक्तं वा ? नाद्यः । घटधर्मिकघटप्रतियोगिकाभावस्य परमते घटेऽपि सत्त्वात् । सोऽपि स्वस्मादेव भिद्येतेति दूषयति--न तादात्म्यस्येति । द्वितीयेऽपि तत्किं घटत्वमेव ततो ऽन्यद्वा ?। नोभयथापीत्याह-अतिरिक्तमपीति । दुर्निरूपमेवेति । घटघटत्वातिरिक्ततादात्म्यस्य द्रव्याद्यन्यतमत्वेन निरूपणायोगादित्यर्थः । तादात्म्यस्यानिरूपणादेव तदवच्छिन्नप्रतियोगिकाभावो भेद इत्येतदपि निरस्तमिति द्रष्टव्यम् । घटधर्मिकघटप्रतियोगिकतादात्म्यमङ्गीकृत्यापि तदभावस्य भेदत्वं दूषयति-किं चेति । तस्याभेदत्वं दर्शयितुं भेदशब्दार्थमाह--योऽभाव इति । अभाव इति च्छेदः ।

तर्हि घटधर्मिकघटप्रतियोगिकतादात्म्याभाव एव पटतादात्म्यविरोधीति स एव तस्याभेद इत्यत आह--न चेति ॥

न च घटप्रतियोगिकघटधर्मिकतादात्म्याभावः पटस्य घटप्रतियोगिकतादात्म्यविरोधी । धर्मभेदेन तादात्म्यभेदात् । जीवस्य ब्रह्माभेदाविरोधितद्भेदस्यास्माभिरनिवार्यत्वात् । जीवस्य ब्रह्मतादात्म्यस्य प्रामाणिकत्वात् । अत एव संयोगावच्छिन्नवृक्षतादात्म्याभावस्य तस्मिन्नेव तदभावावच्छिन्ने सत्त्वेपि न वृक्षभेदः ॥

तत्र हेतुमाह-धर्मभेदेनेति । यथैकस्मिन् वृक्षे अग्रत्वावच्छिन्नवृक्षप्रतियोगिकमेकं कपिसंयोगावच्छिन्न॰प्रतियोगिकमपरं वृक्षत्वावच्छिन्नप्रतियोगिकमन्यदित्यनेकानि तादात्म्यानि धर्मभेदाद्भिद्यन्ते । तथा च मूलावच्छिन्ने वृक्षे ऽग्रत्वावच्छिन्नप्रतियोगिकस्य संयोगावच्छिन्नप्रतियोगिकस्य वा तादात्म्यस्याभावेऽपि वृक्षत्वावच्छिन्नप्रतियोगिकतादात्म्यसत्त्येव । एवं मृदवच्छिन्नघटप्रतियोगिकस्य देशविशेषसंयोगावच्छिन्नघटप्रतियोगिकस्य वा तादात्म्यस्य पटत्वावच्छिन्ने ऽभावेऽपि घटत्वावच्छिन्नप्रतियोगिकतादात्म्यस्य पटेऽपि सत्त्वाविरोधान्न घटधर्मिकघटप्रतियोगिकतादात्म्याभावमात्रात्पटे तद्भेदसिद्धिरित्यर्थः ।

ननु यत्र यदवच्छिन्नप्रतियोगिकतादात्म्याभावस्तस्य तदवच्छिन्नात्स एव भेदः । मूलावच्छिन्नवृक्षस्यापि अग्रावच्छिन्नवृक्षाद्भेद एवेत्याशङ्क्य वृक्षवदेव जीवस्य

स्वरूपेण ब्रह्माभेदेऽपि सर्वज्ञत्वादिविशिष्टरूपेण तद्भेदो ऽविरुद्धत्वादिष्ट एवेत्याह-जीवस्येति ।

ननु मूलाग्रयोर्वृक्षाभेदस्य प्रत्यभिज्ञासिद्धत्वात् सोऽप्यभ्युपेयः, न तथा जीवब्रह्मणोः स्वरूपाभेदे प्रत्यभिज्ञाऽस्तीत्याशङ्क्य तदभावेऽपि तत्त्वमस्यादिश्रुतिसिद्धत्वात् सोऽप्यभ्युपेय इत्यभिप्रेत्याह-जीवस्येति । ननु मूले वृक्षः कपिसंयोगवान्न भवतीति प्रतीतेर्न संयोगावच्छिन्नवृक्षतादात्म्याभावो विषयः, किं तु संयोगात्यन्ताभाव एव । तथा च वृक्षतादात्म्याभाववतो वृक्षाद्भेद एव न त्वभेदोऽपि । एवं ब्रह्मतादात्म्याभावे जीवस्य ब्रह्मभेद एव न त्वभेदोऽपीत्यत आह-अत एवेति। विशिष्टभेदस्य स्वरूपाभेदेनाविरोधादेवेत्यर्थः

अयमभिसंधिः—इदमिदं न भवतीति ज्ञानस्य घटादौ भेदविषयत्वाद् वृक्षेऽपि तद्विषयत्वमेव तस्य वक्तव्यम् । इतरथा कपिसंयोगतदभावयोरधिकरणभेदाभावादन्यत्रापि भावाभावयोर्विरोधो दत्तजलाञ्जलिः स्यात् । तदभिन्ने तद्भेदोऽपि विरुद्ध इति चेत् । न, तत एव भेदस्यानिर्वचनीयत्वाङ्गीकारात्, भेदाभेदयोः प्रतियोगितावच्छेदकभेदेनाविरोधोपपत्तेश्च । अन्यथा 'नाहं सर्वज्ञ' इति प्रतीतेरपि सर्वज्ञत्वादेरेवाभावो विषय इति न जीवेश्वरभेदसिद्धिरिति ॥

ननु यद्धर्मिकतादात्म्ये यत्प्रतियोगिकत्वाभावः स एव तस्य ततो भेद इति शङ्कते—अथेति ।

अथ पटधर्मिकतादात्म्ये घटप्रतियोगिकत्वाभाव एव तस्य ततो भेद इति चेत् तथाप्यभेदातिरिक्ततादात्म्याभावात् । अभेदश्च भेदाभाव इत्यन्योन्याधीनतया दुर्निरूपो भेदः । शास्त्रप्रतिपाद्याभेदश्च न स्वरूपादतिरिच्यते ।

अथ न तादात्म्यमन्योन्याभावप्रतियोगि प्रतियोगितावच्छेदकत्वं वा, किं तु घटादिरेव तत्प्रतियोगी । न चैवं संसर्गाभावान्योन्याभावयोरभेदप्रसङ्गः । अधिकरणविषयप्रतियोग्यारोपजन्यज्ञानविषयाभावत्वं संसर्गाभावत्वम् । अधिकरणविषयप्रतियोगितावच्छेदकारोपजन्यज्ञानविषयत्वाभावत्वमन्योन्याभावत्वमिति तद्भेद इति चेत्।

किं पटधर्मिकतादात्म्यं पटस्वरूपमेव पटत्वं वा भेदाभावो वा ? । नाद्यः । धर्मधर्मिभावानुपपत्तेः । न द्वितीयः । पटत्वस्याखण्डधर्मत्वेन तस्मिन्पटप्रतियोगिकत्वस्याप्यभावेन पटत्वस्य स्वाभावप्रतियोगित्वेन पटस्य पटत्वाभावाद्भेदोऽपि न स्यात्, पटत्वरूपतादात्म्ये घटप्रतियोगिकत्वाभावेऽपि घटभेदस्य पटधर्मिकत्वासिद्धेश्च । तादात्म्यस्यासाधारणधर्मरूपत्वे धर्मान्तराभावात्तस्येतरभेदो न स्यात् तत्रापि धर्मान्तराङ्गीकारे ऽनवस्थापत्तेः । तस्मात् तृतीय एव परिशिष्यते इत्यभिप्रेत्याह-तथापीति । तथापि दोषमाह-अभेदश्चेति । पटाभेदज्ञाने

वेदेत्यर्थः । मनसैवानुद्रष्टव्यं मनसैवाप्तव्यमित्यादिश्रुतेः । राहुरदृश्योपि सदा शशिबिम्बस्थः प्रकाशते जगति तद्वद्विशुद्धचित्ते प्रकाशमेति स्वयं ह्यात्मेतिवचनाच्च । एवं ज्ञानमाहात्म्यं तत्सिद्धिप्रकारं च प्रतिपाद्याथ ज्ञानयोगसिद्धेरन्तरङ्गसाधनान्याह श्रद्धावान् तत्त्वमसीति श्रुत्या ब्रह्मात्मैकत्वमुच्यते तदेव गुरुणोपदिश्यते । तत्र श्रुतिवाक्ये गुरूक्तौ च सत्यबुद्धिः श्रद्धा अस्तीत्येवोपलब्धव्य इति श्रवणात्तादृश्यव्यभिचारिणी श्रद्धा यस्यास्ति स श्रद्धावान् मुमुक्षोरवश्यं श्रद्धावत्त्वेन भवितव्यं तदभावे न किञ्चिदस्त्यतः श्रद्धा प्रयत्नेन सम्पादनीयेत्यर्थः । श्रद्धावत्त्वेपि बहिर्मुखस्य ज्ञानं न सिध्यत्यतस्तद्राहित्येन भवितव्यमित्याह संयतेन्द्रिय इति । संयतानि शब्दादिविषयेष्वप्रवर्तितानि ज्ञानकर्मेन्द्रियाणि येन सः संयतेन्द्रियत्वं यतेर्धर्मस्तेन सदा भवितव्यं बहि प्रवृत्तिशून्यस्यैव ज्ञानं सिध्यति सिद्धं च तेनैव रक्षितव्यं भवति नान्यथा तिष्ठतीत्यर्थः । एवं श्रद्धावत्त्वसंयतेन्द्रियत्वयोः सिद्धयोः सतोरप्यन्तविषयान्ध्यायतो यतेर्ज्ञानं न सिध्यत्यतस्तद्राहित्येन भवितव्यमित्याह तत्पर इति । सर्वदा तस्मिन्नेव वृत्तेरन्तर्बहिर्ब्रह्माकारत्वापादन एव परः आसक्तचित्तस्तत्परः ब्रह्माकारवृत्तिपरत्वमेव असाधारणकारणं तेनैव विपरीतप्रत्ययाः सर्वे नश्यंत्यनात्मवासनाश्च सर्वाः ज्ञानस्याप्रतिबद्धता च सिध्यत्यतस्तदेव सम्पादनीयं मोक्षैकार्थिन इत्येवं नियतविशेषणत्रयसंपन्नो यो यतिः स एव ब्रह्मैवाहमस्मीत्यप्रतिबद्धं ज्ञानं लभते नान्यः शतधा श्रुतश्रावितवेदान्तोपि विद्वानित्यर्थः । एवं श्रद्धावत्त्वसंयतेन्द्रियत्वतत्परत्वादिसाधनसम्पत्त्या दैर्घ्यकालिक्या नित्यानिरन्तरब्रह्मनिष्ठया निष्पन्नं जगतश्च स्वस्य च ब्रह्मात्मनैवोपलभ्यमानत्वापादकं ज्ञानं लब्ध्वा ब्रह्मविद्यतिरचिरेणैव ज्ञानोत्पत्त्युत्तरक्षण एव परां संशयविपरीतभावनादिनिर्मुक्तज्ञानावभासितत्वाद्वस्तुस्वाभाव्याच्चाविद्यात्तत्कार्याभासशून्यां निरतिशयसुखात्मिकां ब्रह्मात्मनावस्थानलक्षणां शान्तिं मुक्तिं विदेहात्मिकां गच्छति प्राप्नोतीत्यर्थ इत्याहुः ॥ ३९ ॥

यथोक्तसाधनवानुपदेशमपेक्ष्याचिरेण ब्रह्म साक्षात्करोति साक्षात्कृतब्रह्मा त्वचिरेणैव मोक्षं प्राप्नोतीत्यस्मिन्नर्थे संशयो न कर्तव्यस्तस्य पापिष्ठत्वादित्याशयेनाह—

अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यति ।
नायं लोकोस्ति न परो न सुखं संशयात्मनः ॥ ४० ॥

अज्ञश्चेति । अज्ञोऽनधीतशास्त्रत्वेनात्मज्ञानशून्यः गुरुवेदान्तवाक्यार्थ इदमेवं न भवत्येवेति विपर्य्ययरूपा नास्तिक्यबुद्धिरश्रद्धा तद्वानश्रद्दधानः इदमेवं भवति न वेति सर्वत्र संशयव्याप्तचित्तः संशयात्मा विनश्यति स्वार्थलाभाद्भ्रष्टो भवति संशयात्मापेक्षया न्यूनत्वकथनार्थमज्ञाश्रद्दधानयोश्चकाराभ्यां प्रयोगः । अज्ञाश्रद्दधानयोः परलोकसुखस्य जीवन्मुक्तिसुखस्य चाभावेपि मनुष्यलोकसुखमस्त्येव तथाऽज्ञः कदाचिदभ्यासवशात्परलोकादिसाधनं देहात्मविवेकादिज्ञानं लभतेप्यश्रद्दधानोपि युक्तियुक्तं गुरुशास्त्रादिवाक्यं श्रुत्वा श्रद्धावानपि स्यात्कदाचित् ततश्च परलोकादिभाजौ तौ स्यातां सदा सर्वत्र संशयग्रस्तस्तु न तथातोऽतिपापिष्ठ इत्याह नायमिति । कुतः संशयात्मा सर्वतः पापीयान् यतो नायं मनुष्यलोकोस्ति वित्तार्जनाद्यभावात् न परो लोकः स्वर्गमोक्षादिः धर्मज्ञानाद्यभावात् न सुखं भोजनादिकृतं संशयात्मनः सर्वत्र संदेहाक्रान्तचित्तत्वात् अज्ञस्याश्रद्दधानस्य च परो लोको नास्ति मनुष्यलोके भोजनादिसुखं वर्तते संशयात्मनस्तु किमपि नास्त्यतः सर्वतः पापीयानित्यर्थः । तस्मात्संशयो न कर्त्तव्य इत्याशयः ॥ ४० ॥

ननु संशयनिवर्तकोपायाभावे तदकरणं कथमित्याशंक्य तन्निवृत्युपायं निश्चयरूपमात्मज्ञानं सूचयन् तत्त्वसाक्षात्कारानिरस्तसंदेहस्य विदुषः कर्मालेपमाह—

योगसंन्यस्तकर्माणं ज्ञानसंछिन्नसंशयम् ।
आत्मवन्तं न कर्माणि निबध्नन्ति धनंजय ॥ ४१ ॥

योगेति । एतादृशस्य सर्वानर्थमूलस्य संशयस्य निराकरणायात्मनिश्चयमुपायं वदन्नध्यायद्वयोक्तां पूर्वापरभूतिकाभेदेन द्विविधां कर्मज्ञानरूपां ब्रह्मनिष्ठामुपसंहरति योगेत्यादिद्वाभ्यामित्यन्ये । हे धनञ्जय कर्माणि "गुणा गुणेषु वर्तन्ते" इति बुद्ध्या क्रियमाणानि लोकसंग्रहार्थानि वृथाचेष्टारूपाणि वा न निबध्नंति अनिष्टमिष्टं मिश्रं वा देहं नारभन्ते । कं ? ज्ञानसंछिन्नसंशयं ज्ञानेन ब्रह्मात्मैक्यज्ञानेन संछिन्नः सम्यग्निवृत्तः संशयः आत्मा देहाद्यभिन्नो भिन्नो वा भिन्नत्वेपि विभुरविभुर्वा विभुत्वेपि कर्ताऽकर्ता वाऽकर्तृत्वेपि भोक्ताऽभोक्ता वाऽभोक्तृत्वेपि नित्योऽनित्यो वा नित्यत्वेपि ब्रह्मभिन्नस्तदभिन्नो वाऽभिन्नत्वेपि तद्ज्ञानं बन्धनिवर्तकं न वा तदपि कर्मसमुच्चितं केवलं वा बन्धनिवर्तकमित्येवमादिरूपो यस्य तं सं-

च्छिन्नसंशयस्यापि कर्माण्यनर्थहेतवो भविष्यन्तीत्याशंक्याह योगसंन्यस्तकर्माणं योगेन परमार्थदर्शनलक्षणेन संन्यस्तानि त्यक्तानि कर्माणि धर्माधर्माख्यानि येन परमार्थदर्शिना तं । यद्वा योगेन भगवदाराधनलक्षणेन समत्वबुद्धिरूपेण संन्यस्तानि भगवति समर्पितानि कर्माणि येन तं । विषयपरवशस्य योगासम्भवात्कुतो योगसंन्यस्तकर्मत्वमित्याशंक्याह आत्मवन्तं अप्रमत्तं विषयासक्तिशून्यं परमार्थदर्शनेन संशयनिवृत्तौ तन्माहात्म्यादेव कर्मणां च निवृत्तावप्रमत्तस्याभासमात्राणि कर्माणि बंधहेतवो न भवन्तीत्याह न कर्माणीति । यद्वा संशये सति कथं योगसंन्यस्तकर्मत्वमत आह ज्ञानसंच्छिन्नसंशयं विषयासंगलक्षणप्रमादे सति कुतो ज्ञानोत्पत्तिरत आह आत्मवन्तमप्रमादिनं सर्वदा सावधानम् एतादृशमप्रमादित्वेन ज्ञानवन्तं तेन ज्ञानसंच्छिन्नसंशयत्वेन योगसंन्यस्तकर्माणं कर्माणि न निबध्नन्तीति योजना यथा त्वया राज्ञामतिप्रबलत्वात्तान्विजित्य धनमाहर्तुं मम सामर्थ्यमस्ति न वेति संशयमतिप्रबलात्मरूपनिश्चयेन निवर्त्य धनं जित्वा राजसूयं (१) सम्पादितं तथा संशयं मुक्त्वा विषयासंगलक्षणं प्रमादं जित्वा सावधानलक्षणं धनं लब्ध्वा तत्त्वज्ञानं संपादनीयमिति सूचनाय धनंजयेत्युक्तम् ॥

अन्ये तु "ब्रह्मविदाप्नोति परं, ज्ञात्वा देवं मुच्यते सर्वपाशैः, ज्ञात्वा शिवं शांतिमत्यन्तमेति, तमेव विदित्वातिमृत्युमेति. य एतद्विदुरमृतास्ते भवंति. ये विदुर्यांति ते परं, ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरमिति, ब्रह्मविन्मुक्तो भवति ज्ञानवत्त्वाद्वामदेवादिवदित्यादि-"श्रुतिस्मृतियुक्तिशतप्रसिद्धेः सम्यग्ज्ञानान्मोक्ष इत्येतस्मिन्नर्थे ब्राह्मणादिना मोक्षैककामेन अश्रद्धा वा संशयो वाप्यात्मज्ञानसंपादने प्रयत्नाभावो वा न कर्त्तव्यः कुतश्चेन्मोक्षो न लभ्यते इत्याह अज्ञश्चेति । यस्तु सर्वाणि कर्माणि मोक्षार्थं संन्यस्य मोक्षकारणे श्रवणादौ तत्कारणे गुरुशुश्रूषाशमदमतितिक्षातत्परत्वादौ च प्रयत्नमकृत्वाऽऽत्मज्ञत्वं संपादयति स एवात्र मोक्षशास्त्रे अज्ञ इत्युच्यते गुरूपदिष्टार्थानभिज्ञः स च यस्य तु संन्यासे वेदान्ते श्रवणादौ गुरौ च मोक्षे च ज्ञानान्मोक्ष इत्यस्मिन्नर्थे चाविश्वासो भवति सोऽश्रद्दधानः श्रद्धाशून्यश्च संशयात्मा च अपाम सोमममृता अभूम, दक्षिणावन्तोऽमृतं भजन्त" इत्यादिवाक्यैः कर्मणो मुक्तिहेतुत्वं प्रतिपाद्यते । "तरति शोकमात्मवित् ज्ञानादेव तु

(१) राज्ञा लतात्मकः सोमः सूयतेऽत्र राजसूयं यागविशेषः ।

कैवल्यं, कर्मणा बध्यते, विद्यया तु विमुच्यत–" इत्यादिश्रुतिस्मृतिवाक्यैर्ज्ञानेन मुक्तिरिति प्रतिपाद्यते ततः कर्मणा वा ज्ञानेन वा मुक्तिरिति संशय आत्मनि चित्ते यस्य स संशयात्मा सम्यगधीतशास्त्रोऽपि यः संशयग्रस्तः स चापि विनश्यति ज्ञानफलाद्भ्रश्यति न कदापि मुक्तिं प्राप्नोतीत्यर्थः । एवं त्रयाणामप्यात्मज्ञान शून्यानां मुक्त्यभावं प्रतिपाद्य तत्र दोषाधिक्यात्संशयालुं विशेषयति नायमिति । संशयात्मन पापिष्ठस्य मुक्तिरेव नास्तीति न किन्तु भाविजन्मन्ययं लोको मानुषोऽपि नास्ति न परः स्वर्गोऽपि च नास्ति पुंसः संशय एव महापापसमुद्भवः सर्वानर्थस्य च बीजं तत इदमवश्यं कर्तव्यमनेन तरिष्यामीति कर्मणि वैदिके सर्वत्र च श्रद्धाऽसंभवाच्छ्रद्धावैधुर्येण कृतानां कर्मणां सत्फलदानसामर्थ्यासम्भवात्तत्लोकप्राप्त्यभावोपपत्तेर्न च विषयसुखमप्यस्ति तादृशस्य त्वाहारादावपि संशयसम्भवात्ततः संशयात्मा नरलोकपरलोकयोस्तत्सुखस्य च दूरीभवतीत्यर्थः । एतेन मुमुक्षोर्यतेः प्रयत्नेनात्मज्ञत्वं संन्यासगुरुवेदान्तश्रवणादिषु श्रद्धावत्त्वं सर्वत्र निःसंशयत्वं संपादनीयमिति सूचितं भवति ॥

तर्ह्येवमनर्थहेतोः संशयस्य निःशेषनिवृत्तिः कथं सिध्यतीत्याकांक्षायां श्रुतियुक्तिसमुत्पन्नब्रह्मात्मैकत्वविज्ञानेनैव तस्य विच्छित्तिर्नान्यथेतीति सूचयितुं परावरैकत्वविज्ञानविच्छिन्नसर्वसंशयत्वादेव ब्रह्मवित्कर्मभिर्न बध्यत इति प्रतिपादयति योगेति । ज्ञानसंछिन्नसंशयं ज्ञानं परावरयोरखंडैकरसत्वदर्शनलक्षणं तेन ज्ञानेन निरन्तरसमाधिनिष्पन्नाप्रतिबद्धभावेन संछिन्ना निःशेषनिर्मूलिताः संशयाः मोक्षः कर्मणा वा ज्ञानेन वा ज्ञानं परोक्षं वाऽपरोक्षं वा मोक्षो ज्ञानेन सिध्यति वा न वेत्येवमादयः सर्वे यस्य तं ज्ञानसंछिन्नसंशयमत एव योगसंन्यस्तकर्माणं सर्वमिदमहं च ब्रह्मैवेति सर्वस्य जगतः स्वस्य च ब्रह्ममात्रत्वदर्शनं योगस्तेन संन्यस्तानि विश्लेषितानि सम्यङ्नितरामस्तानि ब्रह्मणि ब्रह्मात्मना लयं गतानीति वा कर्माणि संचितान्यागामीनि च सर्वाणि यस्य तं योगसंन्यस्तकर्माणमात्मवन्तमप्रमत्तं । यद्वा आत्मैव बहिरन्तः सर्वत्र वृत्तेर्विषयत्वेनास्यास्ति नान्यादित्यात्मवान् तमात्मवन्तं ब्रह्मविदं कर्माणि स्वप्नवदाभासरूपाणि शरीरयात्रामात्रैकप्रयोजनानि देहचेष्टारूपाणि योगाग्निनिर्दग्धत्वान्निर्वीर्याणि न निबध्नन्ति बंधाय न कल्पन्ते शुक्तिदृष्ट्या रजतप्रत्ययवत् ब्रह्मदृष्ट्या विनश्यंतीत्यर्थः । एतेन ब्रह्मविदां यतीनां योगेनैव सर्वकर्मसंन्यासः कर्तव्यः कर्मणामबन्धकत्वायेति सूचितं भवतीत्याहुः ॥४१॥

यथा ब्रह्मवित्तमो ज्ञानसंछिन्नसंशयत्वाद्योगसंन्यस्तसर्वकर्मा सन् कर्मबन्धनिर्मुक्तस्तथात्वमपि ज्ञानसंछिन्नसंशयो भूत्वा योगसंन्यस्तकर्मा सन् कर्मनिष्ठो भवेत्याह—

तस्मादज्ञानसंभूतं हृत्स्थं ज्ञानासिनात्मनः ।
छित्त्वैनं संशयं योगमातिष्ठोत्तिष्ठ भारत ॥ ४२ ॥

इतिश्रीकर्मसंन्यासयोगो नाम चतुर्थोऽध्यायः ॥ ४ ॥

तस्मादिति । यस्मात्संशयवान् तद्दोषेणैव कर्मज्ञानयोगयोरन्यतरप्रवृत्त्यनुपपत्त्या स्वयमुभयभ्रष्टो भवति तस्मात् हे भारत त्वमज्ञानसंभूतं स्वस्याविक्रियब्रह्मात्मत्वदर्शनलक्षणं यदज्ञानं तस्मादेवं संभूतमात्मनः स्वस्य हृत्स्थं चित्तगतं संशयं मोक्षसाधनं ज्ञानं वान्यद्वा ज्ञानं च परोक्षं वाऽपरोक्षं वा ज्ञानेनाविद्यातत्कार्याणां निःशेषनिवृत्तिरस्ति वा न वेत्यादिलक्षणं संदेहं ज्ञानासिना ज्ञानं ब्रह्मैवाहमिति स्वस्य निर्विकारेऽद्वितीये परे ब्रह्मण्येवात्मप्रत्ययोऽप्रतिबद्धस्तदेवासिः खड्गं तेनैनं निरुक्तलक्षणं संशयमात्मनाशकं छित्वोत्तिष्ठ व्युत्थाय योगं कर्मयोगमातिष्ठ समाचर युध्यस्वेत्यर्थः ॥
अथाध्यायार्थसंग्रहः—

बोध्यं कर्मागमोक्तं द्विविधमपि विनश्यत्फलं तद्धि कर्म
स्यात्तच्चाकर्म यत्स्यादमृतफलमतः कर्मनैष्कर्म्ययोस्तु ॥
अन्योन्यं साहचर्यं भवति तदखिलं मामिहोद्दिश्य कार्यं
तद्धे ब्रह्मार्पणं स्याद्विविधयजनतः प्राह पार्थं चतुर्थे ॥ १ ॥

अन्ये तु इत्थं हे भारत यस्मादेवंभूतं ज्ञानं चित्तशुद्धिलभ्यं यस्माच्च संशयात्मा विनश्यति यस्माच्च ज्ञानसंछिन्नसंशयः कर्मभिर्न निबध्यते तस्मादज्ञानादविवेकात्संभूतमुत्पन्नं हृत्स्थं हृदि बुद्धौ स्थितं कारणस्याश्रयस्य च ज्ञाने शत्रुः सुखेन हंतुं शक्य इत्युभयोपादानं आत्मनः स्वस्य संशयं आत्मविषयं यद्वात्मनो ज्ञानासिना आत्मविषयकनिश्चयखड्गेन शोकमोहादिहरणं छित्वा योगं सम्यग्दर्शनहेतुभूतं निष्कामकर्मयोगमातिष्ठ कुर्वित्यर्थः । इदानीं तु युद्धाय स्वधर्मभूतायोत्तिष्ठोद्युक्तो भवेत्यर्थः । स्वाश्रयस्य संशयस्य स्वाश्रयेणैव ज्ञानेन समुच्छेदसंभवात्किमिति स्वस्येति विशेषणमिति चेत् स्थाण्वादिविषयः संशयस्तद्विषयेण देवदत्तनिष्ठेन ज्ञानेन तन्निष्ठो निवर्त्यते प्रकृते त्वात्मविषयस्तदाश्रयश्च संशयस्तदाश्रय-

विषयेण ज्ञानेनापनीयतेऽतस्तद्व्यावर्तकं तदर्थवदित्यवेहि । भरतवंशे प्रसूतस्य तवोपास्थितयुद्धाविमुखत्वमनुचितमिति सूचनाय संबोधनम् । अत्राध्याये योगस्य सम्प्रदायसिद्धत्वं स्वस्यानीश्वरत्वबाधेन सर्वज्ञत्वमीश्वरत्वं च प्रतिपाद्य स्वस्वरूपप्राप्तये कर्मनिष्ठां तत्साध्यां ज्ञाननिष्ठां वात्युत्तमां तत्र प्रणिपातादीनि बहिरंगसाधनानि श्रद्धादीन्यन्तरङ्गसाधनानि चाभिधाय तस्याः फलं सर्वानर्थनिवृत्त्या ब्रह्मभावलक्षणां परमां शान्तिं तत्प्रतिबन्धकं संशयं चातिपापिष्ठमभिदधता भगवता शेषदोषवन्तं संशयं विहायोत्तमाधिकारिणो ज्ञाननिष्ठोक्तेतरस्य कर्मनिष्ठेति द्रष्टव्यम् ॥ ४२ ॥

इतिश्रीभगवद्गीतार्थसङ्ग्रहदीपिकायां जयरामाख्येन विदुषा
निर्मितायां चतुर्थोऽध्यायः ॥ ४ ॥

अथ पञ्चमाध्यायः ।

श्रीरामाय नमः ॥

अध्यायाभ्यां कृतो द्वाभ्यां निर्णयः कर्मबोधयोः ।
कर्मतत्त्यागयोर्द्वाभ्यां निर्णयः क्रियतेऽधुना ॥ १ ॥
निराशीर्यतचित्तात्मा त्यक्तसर्वपरिग्रहः ।
शारीरं केवलं कर्म कुर्वन्नाप्नोति किल्विषम् ।

इत्यादिना कर्मसंन्यासं योगमातिष्ठोत्तिष्ठ भारतेति कर्मयोगं च ज्ञानार्थत्वेन विहितं श्रुत्वा तयोश्च विरुद्धयोर्युगपदनुष्ठानासम्भवात् क्रमेण च तदविधानाच्चान्यतरस्य कर्तव्यताप्राप्तौ सत्यां मया जिज्ञासुना किमनुष्ठेयमिति सन्दिहानः अर्जुन उवाच—

अर्जुन उवाच ।

संन्यासं कर्मणां कृष्ण पुनर्योगं च शंससि ।
यच्छ्रेय एतयोरेकं तन्मे ब्रूहि सुनिश्चितम् ॥ १ ॥

संन्यासमिति । कृष्ण सदानन्दरूप भक्तदुःखाकर्षणेति वा कर्मणां यावज्जीवादिश्रुतिविहितानां नित्यानामग्निहोत्रसन्ध्यावन्दनादीनां नैमित्तिकानां जातपुत्रेष्ट्यादीनां च संन्यासं परित्याग एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्तीत्यादिवेदेन निराशीर्यतचितात्मा त्यक्तसर्वपरिग्रह इत्यादिगीतावाक्येन च पुनस्तद्विरुद्धं योगं तेषामनुष्ठानं च तमेतं वेदानुवचनेन ब्राह्मणाः विविदिषन्ति यज्ञेन दानेन तपसा नाशकेनेत्यादिवेदेन छित्त्वैनं संशयं योगमातिष्ठोत्तिष्ठ भारतेत्यादिगीतावाक्येन च शंससि कथयसि तत्रैकमज्ञं प्रति कर्मतत्त्यागयोर्ज्ञानार्थत्वेन विधानाद्युगपदनुष्ठानासंभवात् । क्रमेण तदनुष्ठानाविधानाच्च एनयोः कर्मतत्त्यागयोर्मध्ये यदेकं श्रेयः श्रेष्ठतरं कर्म तत्त्यागं वा मन्यसे तन्मे सुनिश्चितं ब्रूहि कथयानुष्ठानाशेभयप्राप्तौ समुच्चयानुष्ठानानुपपत्तावन्यतरानुष्ठाने तच्छ्रेष्ठत्वज्ञानस्य हेतुत्वादित्यर्थः ।

अन्ये तु कर्मण्यकर्म यः पश्येदित्यारभ्य कर्मसंन्यासमुपक्रम्य ज्ञानाग्निदग्धकर्माणं शारीरं केवलं कर्म यदृच्छालाभसन्तुष्टः सर्वं कर्माखिलं पार्थ ज्ञानाग्निः सर्वकर्माणि योगसंन्यस्तकर्माणमित्येतैर्वाक्यैर्ब्रह्मनिष्ठस्य कर्त्तव्यः कर्मसंन्यास एवेति प्रतिपाद्येदानीं कर्मसंन्यासकर्मयोगयोरेक-

पुरुषानुष्ठेयत्वमुभयोरव्यवहितव्यवहितसाधनभावेनैकार्थोपयोगित्वं फलैकत्वेऽपि तयोः साध्यसाधनभावेन पूर्वापरभावित्वं कर्मसाधनसाध्ये ज्ञाने सम्प्राप्ते ब्रह्मविदः कर्तव्यः सर्वकर्मसंन्यास एवेत्याद्यर्थनिरूपणाय पञ्चमाध्याय आरभ्यते । तत्रादौ लोकसंग्रहमेवापीति विदुषो लोकहितार्थं कर्म कर्तव्यमिति कर्मयोगमुपक्रम्योपक्रान्ते वर्त्त एव च कर्मणीति तत्र स्वदृष्टान्तं विधाय गुणा गुणेषु वर्तन्त इति न्यायेनानुष्ठातव्यमित्यनुष्ठानप्रक्रियां सूचयित्वा एवं पूर्वैः कृतमिति तस्य शिष्टाभ्युपगतत्वं दर्शयित्वा तस्मिन्नेव कर्मयोगे कुरु कर्मैव तस्मात्त्वमिति योगमातिष्ठोत्तिष्ठेति संन्यासेन सहोपदिष्टे सति कर्मसंन्यासकर्मानुष्ठानयोरुभयोर्युगपत्कर्त्तव्यत्वेन प्राप्तयोश्चक्षुरुन्मीलननिमीलनवदन्योन्यविरोधादेकेनैकदा कर्तुमशक्यत्वात् द्वयोरन्यतरस्य कर्तव्यत्वे प्राप्ते तयोर्यच्छ्रेष्ठतरं पुमर्थसाधनं तज्ज्ञात्वैकं कर्तुं शक्यत इति तदन्यतरश्रेष्ठत्वजिज्ञासयार्जुन उवाच । नन्वत्र एतयोः कर्मसंन्यासकर्मयोगयोर्यच्छ्रेष्ठतरं तन्मे ब्रूहीत्यर्जुनस्य प्रश्नः किं विद्वत्कर्तृककर्मसंन्यासकर्मयोगयोर्वा किमविद्वत्कर्तृककर्मसंन्यासकर्मयोगयोर्वा उत विद्वदविद्वत्कर्तृककर्मसंन्यासकर्मयोगयोर्वेति चेदुच्यते नाद्यः निरन्तरसमाधिसमुत्पन्नसम्यक्ज्ञानेन ब्रह्मैवाहमिति निष्क्रिये परे ब्रह्मण्येवात्मभावमुपेत्य सदा तदात्मनैव तिष्ठतो ब्रह्मविदस्तद्विपरीताज्ञानमूलकानात्मतादात्म्यासंभवादहङ्कारैककारणककर्मयोगासिद्धेः स्वविरोधिनि सम्यग्ज्ञाने विजृम्भमाणे सत्यर्के तमस इवाज्ञानस्य स्थित्यनुपपत्तौ विदुषोऽनात्माहङ्कारतादात्म्यं न सम्भवत्येव तदसम्भवे तत्कारणकाहंकारासम्भवात्तदेकनिबन्धनः कर्मयोगः स्वप्नेऽपि सम्भावितुं न शक्यते न हि जाग्रतः स्वप्नार्थसम्बन्धवद्ब्रह्मविद्यायामेव जाग्रतोऽनात्मतादात्म्यतत्कार्यसम्बन्धः सम्भवति तत्सत्त्वे कृतकृत्यताऽभावप्रसङ्गात्तद्ब्रह्माहमस्मीति कृतकृत्यो भवति नैवास्ति किंचित्कर्तव्यमित्यादिश्रुतिस्मृत्यप्रामाण्यप्रसंगात्प्रत्यक्षविरोधाच्च । यथा वक्रकोटरत्वादिधर्मसन्दर्शिनः स्थाणौ पुनश्चोरत्वबुद्धिः पलायनं च न सम्भवति तथा ब्रह्मैवात्मानं विजानतस्तदानन्दमनुभवतः सर्वं ब्रह्मैव पश्यतो ब्रह्मविदोऽनात्मतादात्म्यापत्तिः कर्तृत्वबुद्धिः कामना च कर्मप्रवृत्तिश्च न सम्भवत्येवातो विद्वत्कर्तृककर्मसंन्यासकर्मयोगविषयोऽर्जुनस्य प्रश्नो न सम्भवति । नापि तृतीयः विद्वत्ताविद्वत्तयोः परस्परविरोधिनोरेकाधिकरणत्वानुपपत्तौ प्रश्नासम्भवात्परिशेषादविद्वत्कर्तृकयोरेव कर्मसंन्यासकर्मयोगयोर्द्वयोरेकदैव कर्तव्यत्वप्रसक्तावप्युभयोः परस्परविरुद्धत्वेन सहप्रयोगायोगात्तयोरन्यतरस्य प्रशस्यतरत्वं

सिद्धे तत्रैको मुमुक्षुणा कर्तुं शक्यत इति तयोरेकस्य श्रेष्ठत्वजिज्ञासुरर्जुनः पृच्छति संन्यासमिति । हे कृष्ण सदानन्दरूप परमात्मन् पूर्वोक्तैर्वचनैः संन्यासं विध्युक्तानामवश्यमनुष्ठेयानां कर्मणां त्यागं शंससि कथयसि पुनर्भूयोपि कुरु कर्मैव तस्मात्त्वमिति योगमातिष्ठेति च कर्मयोगमपि शंससि क्रिययाप्यधिकारितः साधनसंपत्त्या चाश्रमेण च परस्परविरुद्धौ संन्यासकर्मयोगावेकेनैकदा कर्तुमशक्यौ मह्यं तत्कर्तव्यत्वेन विधत्से । ममात्र संशयः कर्मयोगो वा संन्यासो वा कर्तव्य इति द्वयोरप्याश्रमादिभेदेन विरुद्धत्वादेकेनैकदा कर्तुमशक्यत्वात्तयोर्यच्छ्रेयः श्रेयःसाधनं तदेव कर्त्तव्यं न तु द्वयमिति भात्यत एतयोर्यदेकं प्रशस्यतरं मोक्षसाधनत्वेन भवता सुनिश्चितं तदेव मे ब्रूहीत्यर्थ इत्याहुः ॥ १ ॥

एवं कर्मसंन्यासकर्मयोगयोरेकेनैकदाननुष्ठेयत्वे सिद्धे तयोरन्यतरस्य ज्यायस्त्वनिर्णयाय ।

देशकालवयोवस्थाबुद्धिशक्त्यनुरूपतः ।
धर्मोपदेशो भेषज्यं वक्तव्यं धर्मपारगैः ॥

इति न्यायेनाधिकार्यनुरूपमुत्तरं—

श्रीभगवानुवाच ।

संन्यासः कर्मयोगश्च निःश्रेयसकरावुभौ ।
तयोस्तु कर्मसंन्यासात्कर्मयोगो विशिष्यते ॥२॥

संन्यास इति । ब्रह्मणि नितरामासः संन्यासः बाह्यप्रवणताराहित्येन चित्तस्य ब्रह्मणि ब्रह्मात्मनावस्थानलक्षणो निर्विकल्पसमाधिः प्रत्यग्दृष्ट्याऽनात्मप्रत्ययनिरासः संन्यासः सविकल्पसमाधिः द्वावप्येतौ संन्यासौ प्रधानौ एतयोः श्रवणमननयोश्चांगभूतस्तत्प्रतिकूलानां सर्वेषां च कर्मणां परित्यागलक्षणः संन्यास इत्येवं संन्यासशब्दार्थस्त्रेधा भिद्यते । अत्र प्रधानभूतौ संन्यासौ न विवक्षितौ किन्त्वङ्गभूत एव सर्वकर्मसंन्यासः श्रवणादिजन्यज्ञानद्वारा मोक्षहेतुर्यस्त्वाविद्वत्कर्तृकः स च स्वानुष्ठानप्राप्तचित्तशुद्धिजन्याज्ञानद्वारा मोक्षहेतुर्यस्त्वाविद्वत्कर्तृकः कर्मयोगः स चैतावुभावपि निःश्रेयसकरौ यद्यपि मोक्षस्य साधने एव भवतस्तथाप्यविदुषः समकाले कर्तव्यत्वेन प्राप्तयोस्तयोस्तु गुणदोषविचारे क्रियमाणे सदसद्विवेकजन्यतीव्रवैराग्यतीव्रमोक्षेच्छायमनियमशमदमाद्यन्तरङ्गसाधनपौष्कल्यशून्यात्के-

वलेप्रषमात्रोच्चारणरूपात् संन्यासात्कर्मयोगः श्रद्धया समनुष्ठीयमानो विशिष्यते स्वानुष्ठानभेवगुणैर्विशेषत्वाय कल्पते श्रौतस्मार्तादिलक्षणं कर्मैव परमेश्वरप्रीत्यै श्रद्धया समनुतिष्ठतो विदुष ऋणत्रयनिवृत्तिस्तज्जन्य इन्द्रादिदेवताप्रसाद इन्द्रियप्रसादश्चित्तशुद्धिरेवमादिज्ञानसाधनसम्पत्तिः सिध्यत्यस्माद्धेतोरुक्तलक्षणात्संन्यासात्कर्मयोगो विशिष्टतरो भवत्यतः साधनशून्येनाविदुषा सहसा संन्यासो न कर्तव्यः कर्मैवेश्वरार्पणबुद्ध्या सम्यक्कर्तव्यमिति सिद्धं। ननु न्यासमेषां तपसामतिरिक्तमाहुरिति संन्यासस्यैवोत्कृष्टत्वं श्रूयते ततो भगवतः संन्यासन्यक्कारपूर्वकं कर्मयोगस्योत्कृष्टत्ववर्णनमयुक्तमिति चेन्न सर्वलोकानुग्रहहेतुत्वाद्भगवत्प्रवृत्तेः पूर्वं न जायते म्रियते वेत्यादिवाक्यैरमूढानामात्मतत्त्वज्ञानं तत्साधनं सर्वसंन्यासं चोपदिश्येदानीं स्वीयां विद्यां प्रज्ञां प्रकृतिं च परपारगमनशक्तिं चाविज्ञायाऽज्ञानात्कुतश्चिन्निमित्तात्सहसा संन्यस्य मूढाः पतिष्यन्तीति तानुद्धर्तुमत्राप्रकृतमपि कर्मयोगं प्रकृत्य तेषां कर्मण्येव प्रवृत्तिसिद्ध्ये कर्मयोगं स्तौति कर्मयोगो विशिष्यत इति। न तु संन्यासं निराकरोति संन्यासस्य स्वस्वरूपत्वात्सर्वोत्तमत्वाच्च न्यास इति ब्रह्मा ब्रह्मा हि पर इति न्यास एवात्यरेचयदिति संन्यासस्यैव ब्रह्मत्वसर्वश्रेष्ठतमत्वश्रवणात्ततः कर्मयोगस्तुतिपरमेवैतद्वचनमिति निश्चेतव्यम् ॥

अन्ये तु एवमर्जुनस्य प्रश्ने आदौ भगवदर्प्पणबुद्ध्या निष्कामकर्मानुष्ठानादन्तष्करणशुद्धौ तीव्रेण वैराग्येण विविदिषायां दृढायां सर्वकर्मसंन्यासः श्रवणमननादिरूपवेदान्तवाक्यविचाराय कर्तव्य इत्याभिप्रेत्योत्तरं श्रीभगवानुवाच संन्यास इति। यद्यपि कर्मणां संन्यासस्त्यागः च पुनः कर्मयोगस्तेषां कर्मणामनुष्ठानमुभौ निःश्रेयसकरौ ज्ञानोत्पत्तिहेतुत्वेन मोक्षसाधकौ तथापि तयोस्तु कर्मतत्त्यागयोर्मध्ये कर्मसंन्यासादशुद्धचित्तेनाविरक्तेन कृतात्कर्मयोगश्चित्तशुद्ध्या वैराग्यादिजनको विशिष्यत उत्कृष्टो भवतीति कर्मयोगं स्तौतीत्याहुः ॥ २ ॥

पुनः कर्मयोगं स्तौति ज्ञेय इत्यादित्रिभिः—

ज्ञेयः स नित्यसंन्यासी यो न द्वेष्टि न काङ्क्षति।
निर्द्वन्द्वो हि महाबाहो सुखं बन्धात्प्रमुच्यते ॥ ३ ॥

स कर्माणि प्रवृत्तोपि कर्मयोगी नित्यं संन्यासीति ज्ञेयः ज्ञातव्यः कोसौ ? यो न द्वेष्टि दुःखं तत्साधनं च। यद्वा भगवदर्प्पणबुद्ध्या क्रियमाणं

कर्म निष्फलत्वशंकयेत्यर्थः न कांक्षति स्वर्गादिसुखं तत्साधनं च कुतो यतो निर्द्वन्द्वो रागद्वेषसुखदुःखादिद्विन्द्वशून्यः हे महाबाहो हि यस्मात्सुखमनायासेन बन्धादन्तष्करणाशुद्धिरूपाज्ञानप्रतिबन्धकात्प्रमुच्यते नित्यानित्यवस्तुविवेकादिप्रकर्षेण मुक्तो भवतीत्यर्थः ॥ ३ ॥

ननु यष्कर्मनिष्ठः स संन्यासी ज्ञातव्य इत्ययुक्तं कर्मतत्त्यागयोः स्वरूपाविरोधात्फलैक्यात्तथेति चेन्न स्वरूपतो विरुद्धयोः फलेपि विरोधस्यौचित्यात्तथा च निःश्रेयसकरावुभावित्यनुपपन्नमित्याशंक्याह—

सांख्ययोगौ पृथग्बालाः प्रवदन्ति न पण्डिताः ।
एकमप्यास्थितः सम्यगुभयोर्विन्दते फलम् ॥ ४ ॥

सांख्ययोगाविति । संख्या सम्यगात्मबुद्धिस्तां वहतीति व्युत्पत्त्या ज्ञानान्तरङ्गसाधनतया सांख्यः संन्यासः योगष्कर्मयोगस्तौ पृथग्विरुद्धफलौ बालाः शास्त्रार्थविवेकज्ञानशून्याः प्रवदन्ति न पण्डिताः । किं तर्हि पण्डितानां मतमित्यत्राह उभयोः संन्यासकर्मणोर्मध्ये एकमप्यास्थितः कृतवान्सन्नुभयोः फलं ज्ञानोत्पत्तिद्वारेण निःश्रेयसरूपमेकमेव विन्दते लभते इत्यर्थः ॥ ४ ॥

एकस्यापि सम्यगनुष्ठानात्कथमुभयोः फलं विन्दते इत्यत्राह—

यत्सांख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते ।
एकं साङ्ख्यं च योगं च यः पश्यति स पश्यति ॥ ५ ॥

यदिति । सांख्यैर्ज्ञाननिष्ठैस्संन्यासिभिः प्राग्जन्मकर्मभिरेव शुद्धांतष्करणैः श्रवणादिपूर्विकया ज्ञाननिष्ठया यत्प्रासिद्धं स्थानं तिष्ठत्येवास्मिन्न तु कदापि च्यवत इति स्थानं मोक्षाख्यं प्राप्यते आवरणनिवृत्त्या लभ्यत इव नित्यप्राप्तत्वात् योगैरपि भगवदर्पणबुद्ध्या कृतानि कर्माणि योगास्ते येषां सन्ति ते योगाः योगिनस्तैर्योगिभिरपि चित्तशुद्धिसंन्यासपूर्वकश्रवणादिजन्यया ज्ञाननिष्ठया वर्तमाने जन्मनि भविष्यति वा संप्राप्तया तत्स्थानं गम्यते अत एकफलत्वात् एकं सांख्यं च योगं च यः पश्यति स एव सम्यक्पश्यति नान्य इत्यर्थः । तथा च येषां संन्यासपूर्विका ज्ञाननिष्ठा दृश्यते तेषां तयैव प्राग्जन्मसु भगवदार्पितकर्मनिष्ठानुमीयते कारणं विना-कार्योत्पत्त्ययोगात् । एवं येषां भगवदार्पितकर्मनिष्ठा दृश्यते तेषां तयैव

भाविनी संन्यासपूर्वकज्ञाननिष्ठानुमीयते सामग्र्याः कार्याव्यभिचारादिति भावः ॥ ५ ॥

अन्ये तु इदं त्रयमित्थं योजयन्ति । तथा हि तत एव कर्मयोगिनं स्तौति ज्ञेय इति । यस्त्वकुशलं कर्म न द्वेष्टि तत्राप्रीतिं न करोति किन्तु कुशलमकुशलमपि कर्मैव बुद्ध्या करोति । यद्वा न द्वेष्टि द्वेषोऽप्रीतिस्तं यस्मै कस्मैचिदपि प्राणिने न करोति न कांक्षति यत्किंचिदपि कर्मजं फलं न कांक्षति । यद्वा प्राप्तस्यानर्थस्य निवृत्तिमप्राप्तस्यार्थस्य प्राप्तिं न कांक्षति निर्द्वन्द्वः द्वन्द्वानि शीतोष्णसुखदुःखलाभालाभादीनि तेभ्यः समबुद्ध्या निर्गतो निर्द्वंद्वो य एवंलक्षणः स एव नित्यसंन्यासी नित्यं संन्यास्येवेति पण्डितैर्ज्ञेयो ज्ञातव्यः । हि यस्माद्रागादिदोषरहितः परिपक्वचित्तः स समबुद्ध्यादिगुणयुक्तस्तस्मादयं गृही कर्मनिष्ठोपि सुखं परिग्रहत्यागशीतवाताद्युपद्रवाभिक्षाटनादिदुःखराहित्यं यथा भवति तथाऽनायासेन बंधात्संसारान्मुच्यते यथोक्तकर्मानुष्ठानेन चित्तशुद्धिं ज्ञानं च प्राप्य कालान्तरे मुक्तो भवति न त्वपक्वचित्तो यतिरपीत्यर्थः । एतेन कर्मोपासनाभ्यां परिपक्वचित्तस्यैव संन्यासाधिकार इति सूचितं भवति ॥ ३ ॥

ननु कर्मणा पितृलोक इति कर्मिण्यपि पितृलोकप्राप्तिः श्रूयते कथं बन्धात्प्रमुच्यते इति कर्मफलं भवबन्धमोक्षणं शास्त्राविरुद्धमुच्यते इत्याशंकायां कामिनामेव कर्मफलं पित्रादिलोको न तु निष्कामानामिति विरुद्धफलवादिमतन्यक्कारपूर्वकं संन्यासकर्मयोगयोः फलमेकमेवेति निश्चित्य तयोरेकस्याश्रयणेनोभयोर्यत्फलं तदाप्नोतीत्याह सांख्ययोगाविति । बालाः वेदान्तशास्त्रार्थरहस्यानभिज्ञाः केचिद्विद्वांसः सांख्यं सर्ववेदान्तैः सम्यक्तपरत्वेन ख्यायते प्रतिपाद्यते इति सांख्यं परं ब्रह्म तत्प्राप्तेः परमकारणत्वात्सांख्यं ज्ञाननिष्ठाङ्गभूतः संन्यासः योगः कर्मयोगस्तावुभौ सांख्ययोगौ क्रिययाऽधिकारितः आश्रमेण च पृथग्यथा भिन्नौ तथा फलेनापि भिन्नाविति साधनतः फलतश्च भेदं वदन्ति । कर्मणा पितृलोकः स्वर्गं वा एते लोकं यन्तीत्यादिवाक्यैः, संन्यासयोगाद्यतयः शुद्धसत्त्वाः, नैष्कर्म्यसिद्धिं परमां संन्यासेनाधिगच्छतीत्यादिवाक्यैश्च, संन्यासकर्मयोगयोः फलभेदं च प्रतिपादयन्तीत्यर्थः । श्रुतिस्मृतिप्रामाण्यात्तयोः पार्थक्यं युक्तमेवेत्यत आह नेति । पंडिता वेदान्तशास्त्रपारगास्तद्रहस्याभिज्ञा ब्रह्मविदस्तु तयोः फलमेकमेव वदन्ति । तत्कथमिति चेदुच्यते तत्त्वमस्यादिवाक्यानि पुंसश्चित्तशुद्ध्यभावे ब्रह्मतत्त्वं बोधयितुं न शक्नुवन्ति चित्तशुद्धिश्च कर्मोपासनाभ्यां

विना न सिध्यति कर्मोपासनयोः प्रवृत्तिश्च कर्मेश्वरयोर्महत्त्वस्तुतिं विना न सिध्यत्यतः श्रुतिरेवार्थवादवाक्यैः पश्यति पुत्रमित्यादिभिरेष सर्वेश्वर एष सर्वज्ञ इत्यादिवाक्यैः कर्मेश्वरयोर्महत्त्वे प्रतिपाद्यमाने फलानुषक्त्या कर्मण्युपास्तौ च प्रवृत्तस्य ताभ्यां शुद्धात्मन एवोपदिष्टं तत्त्वज्ञानं फलत्यतो ज्ञानसिद्धेः कारणं चित्तशुद्धिस्तत्कारणं कर्मेत्यतः कर्मणां मोक्ष एव फलं। ज्ञानसाधनत्वात्संन्यासस्यापि विद्यां चाविद्यां च यस्तद्वेदोभयं सह अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुत इति श्रवणादविद्यया विद्यया च मृत्युं ज्ञानप्रतिबन्धकमतीत्य ज्ञानेनामृतं मोक्षमाप्नोतीति ज्ञानकर्मयोगयोर्ज्ञानसंन्यासयोश्च साध्यसाधनभावावगमात् ज्ञानफलं तत्फलमेवेति सांख्ययोगयोरेकमेव फलं मोक्ष इति पण्डिता मन्यन्ते तस्मात्कारकादेव भेदो न तयोः फलतो भेद इति सिद्धं। यतस्ततः सांख्ययोगयोरेकमप्यपिशब्दो वार्थः। उभयोर्मध्ये सांख्यं वा कर्मयोगं वा सम्यगास्थितः समनुतिष्ठन् मुमुक्षुरुभयोरपि फलं मोक्षाख्यं विन्दते प्राप्नोतीति सांख्यकर्मयोगयोर्मोक्षं प्रत्यन्तरङ्गबहिरङ्गभावेन कालतोऽप्यल्पत्वानल्पत्वाभ्यां च साध्यसाधनभावेनाप्युभयोस्तरतमभावेपि विद्यमानेपि गजाश्वयोरिव तयोः समत्वप्रतिपादनमनधिकारिणः कर्मैव कर्तव्यं न तु संन्यसनमिति सूचनार्थम्॥ ४॥

यदुक्तं सांख्ययोगयोरेकफलत्वं पुनस्तदेव विस्पष्टयन् तदेकत्वदर्शिनं स्तौति यदिति। सांख्यं परं ब्रह्म तदात्मत्वेन ये विदुस्ते सांख्यास्तैः सांख्यैर्ब्रह्मनिष्ठैर्यतिभिर्यत्स्थानं सदैकरूपेणैव तिष्ठति न क्वचित्किंचिदपि विकरोतीति स्थानं स्वरूपं केवलभावात्मकं प्राप्यते स्वात्मनावगम्यते योगैः फलाभिसन्धिवर्जितमीश्वरप्रीत्यै क्रियमाणं वैदिकं स्मार्तं च कर्म मोक्षोपायत्वाद्योग इत्युच्यते। योगो येषामस्ति ते योगाः मतुबर्थोऽच्प्रत्ययोऽत्र द्रष्टव्यस्तैर्योगैः कर्मनिष्ठैरपि तदेव स्थानं गम्यते निरन्तरं श्रद्धया समनुष्ठीयमानकर्मसम्भावितचित्तशुद्धिजन्यज्ञानतद्योगप्राप्त्या तैरपि स्वात्मत्वेनावगन्तुं शक्यत इत्यर्थः। एष पन्था एतत्कर्मैतद्ब्रह्मेति श्रवणाद्यतः सांख्ययोगयोः फलैकत्वं प्रमाणसिद्धं ततः सांख्यं ज्ञानयोगं च कर्मयोगं चैकं यः पश्यति द्वयोरप्येकस्यैव मोक्षस्य फलत्वान्मोक्षसाधनयोस्तयोरप्येकत्वमेकार्थकत्वं यः पश्यति स पश्यति स एव सम्यग्दर्शी न त्वन्य इत्यर्थः॥ ५॥

यस्मात्संन्यासकर्मयोगयोर्मोक्षैकफलकत्वं प्रदर्शितन्यायेन सिद्धं तस्मा-

दपक्कान्तःकरणेन मोक्षार्थिना कर्मैव कर्तव्यं न तु संन्यासस्तद्विपरीतश्चेद् पक्कान्तरात्मनः संन्यासो दुर्घट इत्युपदिशन् कर्मणा मृदितकषायस्य तु कर्तव्यत्वेन संन्यासमुपादिशति—

संन्यासस्तु महाबाहो दुःखमाप्तुमयोगतः ।
योगयुक्तो मुनिर्ब्रह्म न चिरेणाधिगच्छति ॥६॥

संन्यास इति । अयोगतस्त्वयोगे कर्मयोगानुष्ठानजन्याचित्तशुद्ध्यभावे संन्यासो ज्ञाननिष्ठालक्षणः आप्तुमधिगन्तुं दुःखं दुर्घटं चित्तशुद्धैयकसाध्यत्वात् ज्ञाननिष्ठालक्षणसंन्यासस्य कारणाभावे कार्याभाव इति न्यायेन कर्मसम्भावितचित्तशुद्ध्यभावे संन्यासो न सिध्यतीत्यर्थः । एवं संन्यासस्य कर्मयोगानुष्ठानसम्भावितचित्तप्रसादैकलभ्यत्वं निश्चित्येदानीं कर्मयोगेन सुपक्वान्तःकरणस्य तु मुमुक्षोः संन्यासः कर्तव्य इत्याशयेनाह योगयुक्त इति । योगेन कर्मयोगानुष्ठानसम्भूतचित्तप्रसादेन युक्तः स्वयं मुनिर्गृही ब्रह्म ब्रह्मशब्देनात्र संन्यास उच्यते "न्यास इति ब्रह्मा ब्रह्मा हि पर इति" श्रवणाद्ब्रह्मस्वरूपेणावस्थानलक्षणं प्रधानसंन्यासं परिपक्वान्तःकरणत्वात् मुमुक्षुरधिकारी न चिरेण शीघ्रमेवाधिगच्छति प्राप्नोतीत्यर्थः । यद्वा योगयुक्तः योगसम्भाविताचित्तशुद्धियुक्तः स्वयं मुमुक्षुश्चित्तप्रसादमहिम्नैव मुनिः संन्यासो निरुक्तलक्षणसंन्यासवान्भूत्वा तन्निष्ठया न चिरेण क्षिप्रमेव ब्रह्माधिगच्छति ब्रह्मैवाहमित्यप्रतिबद्धवृत्त्या स्वं ब्रह्मैव विजानातीत्यर्थः। एतेनापक्वान्तःकरणस्य कृतेपि कर्मसंन्यासे मुख्यसंन्यासो- न सिध्यति परिपक्वान्तःकरणस्य तु बाह्योप्यबाह्यश्च संन्यासः सिध्यति तत्फलमपि सिध्यति सर्वात्मभावापत्तिरिति सूचितं भवति ॥

अन्ये तु इत्थं योजयंति। एवमज्ञेन मुमुक्षुणान्तष्करणशुद्ध्ये प्रथमं कर्मयोगोनुष्ठेयो न तु संन्यासः स तु वैराग्यतीव्रतायां स्वयमेव भविष्यतीत्युक्तमधुनाऽशुद्धान्तष्करेणनीप संन्यास एव प्रथमं कुतो न क्रियते ज्ञाननिष्ठाहेतुत्वेन तस्यावश्यकत्वादित्याँशंक्यान्तष्करणशुद्धिंविना संन्यासो दुर्घट एवेत्याशयेनाह संन्यास इति । संन्यासस्तु ज्ञाननिष्ठासहितस्तु परमार्थसंन्यासोऽयोगतो योगेन विनाऽऽप्तुं दुःखं दुर्घटमित्यर्थः । योगेन वैदिकेन कर्मयोगेनेश्वरसमर्पितरूपेण निष्कामेन युक्तः मुनिः सगुणेश्वरस्वरूपमननशीलो ब्रह्म परमार्थसंन्यासं परमात्मज्ञाननिष्ठालक्षणं न चिरेण क्षिप्रमेवाधिगच्छति प्राप्नोति। ननु संन्यासे ब्रह्मशब्दप्रयोगे किं मानमिति चेत्

न्यास इति ब्रह्म ब्रह्म हि पर इति तैत्तिरीयकश्रुतेरेव मानत्वात्प्रकृतसंन्यासस्य परमात्मज्ञाननिष्ठालक्षणत्वाच्च तत्र ब्रह्मशब्दप्रयोगः। श्रुतावपि हिरण्यगर्भवाची ब्रह्मशब्दः कथं संन्यासे प्रयुज्यत इति चेत् द्वयोरपि परत्वाविशेषादित्यवेहि। तदेवाभिप्रेत्य ब्रह्म हि पर इति श्रुतावुक्तं यतो निष्कामकर्मभिर्निवृत्तपापस्य शुद्धचित्तस्य करणानि सर्वतो व्यावृत्तानि कूटस्थप्रत्यगात्मान्वेषणप्रवणानि भवन्त्यतो मया परमार्थसंन्यासप्राप्त्युपायः कर्मयोगो विशिष्यत इतीत्युक्तमिति भावः।

अन्ये तु अयोगतो योगमन्तष्करणशोधकं कर्म विना हठादेव कृतस्तु संन्यासो दुःखमाप्तुमेव अशुद्धान्तष्करणत्वेन तत्फलस्य ज्ञाननिष्ठाया असम्भवात् शोधके कर्मण्यनाधिकारात् कर्मब्रह्मोभयभ्रष्टत्वेन परमसङ्कटापत्तेः। कर्मयोगयुक्तस्तु शुद्धान्तष्करणत्वान्मुनिर्मननशीलः संन्यासी भूत्वा ब्रह्मसत्यज्ञानादिलक्षणं प्रत्यगभिन्नं न चिरेण शीघ्रमेवाधिगच्छति साक्षात्करोति प्रतिबन्धकाभावात्। एतच्च प्रागुक्तमेव न कर्मणामनारम्भान्नैष्कर्म्यं पुरुषोऽश्नुते न च सन्न्यसनादेव सिद्धिं समधिगच्छतीत्याहुः॥ ६॥

ननु कर्मभिः शुद्धान्तष्करणस्य संन्यासिनो विचारादिना लब्धात्मबोधस्यापि प्रारब्धवशात्प्राप्तकर्माणि बन्धकानि भविष्यन्ति तेषां तत्स्वभावत्वादित्यत्राह—

योगयुक्तो विशुद्धात्मा विजितात्मा जितेन्द्रियः।
सर्वभूतात्मभूतात्मा कुर्वन्नपि न लिप्यते॥ ७॥

योगेति। योगेन निष्कामकर्मयोगेन युक्तो योगयुक्तोऽत एव विशुद्धान्तष्करणोऽत एव विजितकार्यकरणसंघात इत्याह। विजित आत्मा देहो येन सः जितानीन्द्रियाणि येन सः। एवमाधिकारिलक्षणसम्पन्नो ब्रह्मात्मैक्यसाक्षात्कारवान् भवतीत्याह सर्वेति। सर्वेषां ब्रह्मादिस्तम्बपर्यन्तानां देहिनामात्मभूत आत्मस्वरूपः आत्मा प्रत्यक्चेतनो यस्य स अखण्डब्रह्मात्मसाक्षात्कारवानित्यर्थः। एतादृशः सम्यग्दर्शी लोकसंग्रहार्थं कर्माणि कुर्वन्नपि न तैर्लिप्यते बध्यत इत्यर्थः॥

अन्ये तु ननु कर्मणो बन्धकत्वाद्योगयुक्तो मुनिर्ब्रह्माधिगच्छतीत्ययुक्तमित्यत्राह। योगेन भगवदर्पणफलेच्छाराहित्यादिगुणयुक्तेन कर्मयोगेन युक्तः प्रथमानिर्मलान्तष्करणः सन्स्ववशीकृतदेहस्ततः स्ववशीकृतबाह्येन्द्रियः एतादृशो मनःकायेन्द्रियदण्डवान् त्रिदंडितत्त्वज्ञानसम्पन्नो

भवतीत्याह । सर्वभूत आत्मभूतश्चात्मा स्वरूपं यस्य स तथा जडात्मकं सर्व-मात्ममात्रं पश्यन्नित्यर्थः । एतादृशः परमार्थदर्शी कर्माणि कुर्वन्नपि परदृष्ट्या न तैर्लिप्यते स्वदृष्ट्या तदभावादित्यर्थ इत्याहुः ॥

केचित्तु ननु योगयुक्तस्य सत्त्वशुद्धावपि सर्वकर्मत्यागे कृते नित्या-करणजन्यप्रत्यवायलक्षणो लेप आपद्येतेत्याशंक्याह योगयुक्त इति । योगेन निर्विकल्पकसमाधिना युक्तः पुरुष अकुर्वन्नपि नित्यं कर्म तदकरणोत्थेन दोषेण न स्पृश्यत इत्यर्थः । तत्र हेतुमाह सर्वेषां ब्रह्मादिस्थावरान्तानां भूतानां योनुस्यूत आत्माऽसङ्गोदासीनचिद्रूपस्तं भूतः प्राप्तस्तदैक्यज्ञानवा-नात्मान्तष्करणं यस्य स इत्यर्थ इत्याहुः ।

अपरे तु यः कर्मानुष्ठानसंप्राप्तचित्तशुद्धिर्जितेन्द्रियः सर्वात्मभावापन्नो ब्रह्मवित्तमः स शारीरं कर्म यत्किंचित्कुर्वन्नपि न लिप्यत इत्याह । योगयुक्तः योगेन कर्मयोगेन युक्तश्चिरमनुष्ठितकर्मयोग इत्यर्थः । यद्वा मुनिर्ब्रह्माधिग-च्छतीति मुख्यसंन्यासाधिगमस्योक्तत्वाद्योगयुक्तः .योगेन संन्यासयोगेन ब्रह्मनिष्ठालक्षणेन युक्तश्चिरमनुष्ठितसमाधियोग इत्यर्थः । तत एव विशु-द्धात्मा जितेन्द्रियश्च विशुद्धः रागद्वेषादिदोषैर्निःशेषवियुक्त आत्मा मनो यस्य स विशुद्धात्मा तत एव जितेन्द्रियः जितानि विषयवैमुख्यं प्रापिता-न्युभयेन्द्रियाणि येन स जितेन्द्रियः विशुद्धात्मत्वं जितेन्द्रियत्वं च चिरकाल-समनुष्ठितसमाध्येकलभ्यमत एव विजितात्मा "आत्मा यत्नधृतिस्वांतस्वभाव-परमात्मस्वि" त्यभिधानाद्विजितो निर्जितो निर्यापितः आत्मा स्वभावो बाह्यवा-सनालक्षणो येन स विजितात्मा समाधिनिर्मूलितानात्मवासन इत्यर्थस्तत एव सर्वभूतात्मभूतात्मा सर्वेषां ब्रह्मादिस्तम्बान्तानां भूतानां प्राणिनामात्म-भूतः स्वरूपभूतः आत्मा प्रत्यग्लक्षणः स्वात्मा यस्य स सर्वभूतात्मभूतात्मा प्राणो ह्येष सर्वभूतैर्विभाति अहमेवेदं सर्वमित्यादिश्रुत्यर्थानुभूत्या स्वानुभूत्या च सर्वात्मतामापन्नो यो ब्रह्मवित्तमः शरीरयात्रार्थं यत्किंचिद्वैधमवैधं वा कर्म कुर्वन्नपि तेन कर्मणा पुण्येनापुण्येन वा न लिप्यते कर्मण्यकर्म-त्वदृष्ट्या न क्षिप्यत इत्यर्थः । ननु लोकसंग्रहमित्यादिशास्त्रेण कर्तव्यतया प्राप्तानां शास्त्रीयाणामेव कर्मणाममुष्य कर्तव्यत्वे शरीरयात्रार्थं कर्मेति शास्त्राविरुद्धमुच्यते इति चेन्न ब्रह्मविदः कर्मानुपपत्तेः । ब्रह्मैवाहमिति स्वस्या-विक्रियब्रह्मात्मत्वाविज्ञानेन निःशेषविनष्टमिथ्याज्ञानत्वात्तद्विपरीतज्ञानैकनि-बन्धनस्य कर्मयोगस्यासम्भवात्सम्यग्ज्ञानस्य मिथ्याज्ञानतत्कार्यविरोधान्न-

ह्यधिष्ठानज्ञाने सति तद्विपर्ययज्ञानं तत्कार्यं च संभावयितुं शक्यं स्थाणुज्ञाने चोरज्ञानतत्कार्यादर्शनात्कूटस्थासंगचिद्रूपमेवात्मानमप्रतिहतवृत्त्या पश्यतो विदुषस्त्वनात्मतादात्म्यानुपपत्तौ तदात्मत्वाभिनिवेशनिष्पाद्यः कर्मयोगः स्वप्नेपि न सम्भवति विधिविधानादेः सर्वदृश्यस्य मिथ्यात्वमेव पश्यतो विधेयत्वासम्भवाच्च योगयुक्तो मुनिर्ब्रह्माधिगच्छतीति सर्वकर्मसंन्यासावगमाच्च पश्यंशृण्वन्नित्यत्र त्रयोदशधा कर्म क्रिया श्रूयते न वैदिकक्रियायास्त्रयोदशधा करणत्वं सम्भवति विदुषस्त्वाहारादौ देहेन्द्रियचेष्टायां तथाविधत्वसम्भवात्सर्वथा ब्रह्मविदो जीवन्मुक्तस्य वैधः कर्मलेशो न सम्भावयितुं शक्यते तत एवोच्यते तस्य कार्यं न विद्यते इति ततो न कश्चिच्छास्त्रविरोध इत्याहुः ॥ ७ ॥

योगयुक्तत्वादिविद्वल्लक्षणपंचकविशिष्टस्य ब्रह्मविदः आहारादौ प्रवृत्तस्य दर्शनादीन्द्रियव्यापारेषु नाहं कर्तास्मीत्येवं बुद्ध्या स्थातव्यमित्याह—

नैव किंचित्करोमीति युक्तो मन्येत तत्त्ववित् ।
पश्यञ्छृण्वन्स्पृशञ्जिघ्रन्नश्नन्गच्छन्स्वपन् श्वसन् ॥८॥
प्रलपन्विसृजन्गृह्णन्नुन्मिषन्निमिषन्नपि ।
इन्द्रियाणीन्द्रियार्थेषु वर्तन्त इति धारयन् ॥ ९ ॥

नैवेति । तत्त्वविदात्मयाथात्म्यज्ञो ब्रह्मविद्यतिर्युक्तः स्वस्य कूटस्थत्वासङ्गत्वान्तर्बहिःपूर्णत्वदर्शनलक्षणया प्रज्ञया युक्तः सन्स्वयं बहिः पश्यन् अश्नन् भक्षणं कुर्वन्स्वपन्निद्रां कुर्वन् श्वसन्नुच्छ्वसन्निश्वासं च कुर्वन् उन्मिषन्निमिषन्निमेषोन्मेषौ च कुर्वन्नपीन्द्रियार्थेषु शब्दादिविषयेष्विन्द्रियाण्येव वर्तन्ते नाहं द्रष्टा श्रोता स्प्रष्टा घ्राता भोक्ता वक्ता गन्तेत्येवंलक्षणामेव वृत्तिं सर्वदा धारयन् तानि तानि कर्माणीन्द्रियाण्येव कुर्वन्त्यहं त्वविक्रियत्वान्नैव किञ्चित्करोमि किंतु तत्तत्क्रियासाक्षित्वेन निष्क्रियात्मना तूष्णीमेवास इत्येव मन्येत स्वं तत्रतत्र निष्क्रियमेव वीक्षेत देहेन्द्रियव्यापारेष्वहं ममेति भावनां त्यक्त्वा विदुषा तूष्णीं स्थातव्यमेवं स्वं ब्रह्मैव पश्यतो ब्रह्मविदो दुष्टादुष्टान्नस्वीकृत्या प्राप्तपापपुण्यलेपो नास्तीति सिद्धम् ॥

अन्ये तु इदं द्वयमित्थं योजयन्ति। कुतो न लिप्यते यतो परमार्थतो न करोतीत्याह द्वाभ्यां नैवेति। युक्तः समाहितः सन् तत्त्ववित्परमार्थदर्शी किञ्चिन्नैव करोमीति मन्येत मन्यते यद्वा कर्मयोगेन युक्तः पश्चादन्तःकरणशुद्धिद्वारेण तत्त्वविद्भूत्वा नैव किंचित्करोमीति मन्यते इति सम्बन्धः। कदा किं कुर्वन्नित्यत्राह पश्यन्नित्यादिना। तत्र पश्यन्नित्यादिना ज्ञानेन्द्रियाणां दर्शनश्रवणस्पर्शनघ्राणनाशनानि व्यापारान् कुर्वन् तथा पादयोर्गतिव्यापारं बुद्धेः स्वापं प्राणस्य श्वासं वाचः प्रलापं पायूपस्थयोर्विसर्जनं हस्तयोर्ग्रहणं कूर्मप्राणस्योन्मेषनिमेषं च व्यापारं कुर्वन्नपीन्द्रियाणीन्द्रियार्थेषु वर्तन्ते नाहमसङ्ग आत्मेति धारयन् बुद्ध्या निश्चयं कुर्वन्नैव किंचित्करोमीति तत्त्वविन्मन्यतेऽतो न लिप्यत इत्यर्थः। तत्र श्वसन्निति प्राणादिपंचकस्य व्यापारोपलक्षणं उन्मिषन्निमिषन्निति नागादिपंचकस्य स्वपन्नित्यन्तष्करणचतुष्टयस्येति बोध्यं। यस्मादेवं सर्वव्यापारेषु सत्स्वप्यात्मनोऽकर्तृत्वमेव पश्यत्यतः कुर्वन्नपि न लिप्यत इति युक्तमेवोक्तमिति भावः॥ ८॥

एवं तत्त्वविदो मुधा चेष्टामात्रेण लौकिककर्मणा लेपो नास्तीत्युक्तमिदानीमतत्त्वविदो मुमुक्षोः कर्तृत्वाभिमानात्कर्मलेपो भविष्यत्येव तथा च तस्य संन्यासपूर्विका ज्ञाननिष्ठा न स्यादित्याशंक्य तद्गतिमाह—

ब्रह्मण्याधाय कर्माणि सङ्गं त्यक्त्वा करोति यः।
लिप्यते न स पापेन पद्मपत्रमिवाम्भसा॥ १०॥

ब्रह्मणीति। ब्रह्मणि परमेश्वरे सर्वदातरि कर्माणि लौकिकानि वैदिकानि चाधाय समर्प्य सङ्गं फलेच्छां च त्यक्त्वा ईश्वरार्थं स्वफलनिरपेक्षतया करोमीत्यभिप्रायेण यः करोति सः पुरुषः पापेन पापपुण्यात्मकेन कर्मणा न लिप्यते यथा पद्मपत्रमुपरि प्रक्षिप्तेनांभसा न लिप्यते तद्वत्। तथा च भगवदर्प्पणबुद्ध्यानुष्ठितं कर्म चित्तशुद्धिफलमेव स्यान्नान्यफलकमतो न लेपाशङ्केति भावः॥

इतरे तु विद्वत्परत्वेनैव योजयन्ति। तथाहि तत्त्वविदो लेपः किं स्वाभाविकेन्द्रियशरीरव्यापारजन्यः उत वैधेन्द्रियादिव्यापारजन्यस्तत्राद्यं प्रति द्वाभ्यामुक्त्वा द्वितीयं प्रत्याह ब्रह्मणीति। स किं तत्तत्कर्मजन्यसुकृतपूर्वलक्षणः किं वा तत्तत्कर्मोपयोग्यर्थप्रतिग्रहादिजन्यपापापूर्वलक्षणः नाद्य इत्याह ब्रह्मणीति। ब्रह्मार्पणबुद्ध्या क्रियमाणेषु कर्मसु नापूर्वोत्पत्तिरिति भावः। न द्वितीय इत्याह। सङ्गं त्यक्त्वेति। सङ्गमैहिकधनादिफलासङ्गं त्यजतो न पापापूर्वोत्पत्तिरपीति भाव इत्याहुः॥ १०॥

अज्ञस्येश्वरार्पणबुद्ध्यानुष्ठितं कर्म बुद्धिशुद्धिफलमित्यत्रैव हेतुमाह—

कायेन मनसा बुद्ध्या केवलैरिन्द्रियैरपि ।
योगिनः कर्म कुर्वन्ति सङ्गं त्यक्त्वात्मशुद्धये ॥ ११ ॥

कायेनेति। योगिनः कर्मिणः सङ्गं फलासङ्गं त्यक्त्वा कायेन देहेन मनसा बुद्ध्या च केवलैरिन्द्रियैर्ममत्ववर्जितैरीश्वरायैव करोमि न स्वफलायेति ममत्वबुद्धिशून्यैरिन्द्रियैरपि कर्म कुर्वन्ति आत्मशुद्धये सत्त्वशुद्धये इत्यर्थः। एवं केवलेन कायेन केवलेन मनसेति सम्बध्यते सर्वव्यापारेषु-ममतावर्जनायेति बोध्यं । यस्माच्चित्तशुद्ध्यर्थं कर्मानुष्ठानमावश्यकं तस्मात्त्वमपि तदेव कुर्विति हेतुर्बोध्यः॥

अन्ये तु इदं द्वयमित्थं योजयन्ति। ननु स्वमविक्रियमेव परं ब्रह्म विजानतो महात्मनः कर्मलेपो मास्तु कर्मसु प्रवृत्तस्य मुमुक्षोरबुधस्तु स्यादेव कर्मलेपस्तस्य का गतिरित्याकांक्षायां तस्यापि च निष्कामस्य मद्भक्तस्य मय्यर्पितसर्वकर्मणः कर्मलेपो नास्तीत्याह ब्रह्मणीति । यस्तु मुमुक्षुरनात्मज्ञः सङ्गं फलकामं त्यक्त्वा कर्मफले यत्र कुत्रापि काममकृत्वा संप्राप्तदुःखस्यापि निवृत्तिमकामयमानः सन् ब्रह्मणि सगुणे मयि परमेश्वरे सर्वाणि कर्माण्याधाय कर्तृत्वं कारयितृत्वं भोक्तृत्वं भोजयितृत्वं च स्थापयित्वा मदर्पणबुद्ध्या श्रद्धया भक्त्या च नित्यं नैमित्तिकं च कर्म करोति सोपि मद्भक्तः पापेन बंधकेन यथा पापं जन्मादिबन्धकारणं तथा पुण्यमपि जन्मादिबन्धकारणमेव भवत्यतो वैदिकं कर्म जन्मादिबन्धहेतुत्वात्पापमित्युच्यते तेन न लिप्यते यथा पद्मपत्रमंभसा तथा मद्भक्तकर्मणा न लिप्यते इत्यर्थः । नन्वकामनया कर्माणि कुर्वतां किं फलमित्याकांक्षायामात्यन्तिकसंसारदुःखविध्वंसकविज्ञानजनयित्री चित्तशुद्धिरेव फलमिति ज्ञापयितुं मुमुक्षवश्चित्तशुद्ध्यर्थमेव कर्म कुर्वन्तीत्याह। कायेनेति योगिनः कर्मयोगिनो मुमुक्षवः सङ्गं सज्यते पुमाननेन कर्मफलेष्विति सङ्गः कामः फलविषयकस्तं त्यक्त्वा फलापेक्षां सुतरां परित्यज्य परमेश्वरप्रीतय एव कायेन मनसा बुद्ध्या केवलैरिन्द्रियैरपि चात्मशुद्धये सत्त्वशोधनायैव कर्म वैदिकं नियमेन कुर्वंति । यद्वा यत्किंचित्कर्तव्यं मनसा संकल्प्य तदेव बुद्ध्या निश्चित्य तदेवेन्द्रियैः केवलैरागद्वेषवर्जितैः कायेनापि

कर्म कुर्वन्ति । यद्वा कायेनेन्द्रियैश्च वैदिकं कर्म बुद्ध्या निश्चितस्य विष्णवादेर्ध्यानं श्रोत्रेण केवलेन कथाश्रवणं केवलेन चक्षुषा महद्दर्शनं केवलया वाचा स्वाध्यायादि पद्भ्यां तीर्थाटनादिकं कर्मेश्वरप्रीत्यै कुर्वन्तीत्यर्थः ॥ १० ॥ ११ ॥

श्रद्धया भक्त्या चेश्वरप्रीतय एवाकामनया कर्म कुर्वतामन्यथाकुर्वतां च फलमाह—

युक्तः कर्मफलं त्यक्त्वा शान्तिमाप्नोति नैष्ठिकीम् ।
अयुक्तः कामकारेण फले सक्तो निबध्यते ॥ १२ ॥

युक्त इति । यस्तु सदसद्विवेकी मोक्षेच्छया कर्मफलं त्यक्त्वा स्वेनानुष्ठीयमानानां कर्मणां फलमनपेक्ष्य युक्तो भवति लाभालाभयोः सिद्ध्यसिद्ध्योश्च समो भूत्वा परमेश्वरप्रीतय एव कर्म करोति स एव नैष्ठिकीं कर्मनिष्ठाजन्यां शान्तिं चित्तशुद्धिं प्राप्नोति । यद्वा नैष्ठिकीं कर्मनिष्ठासमुत्पन्नचित्तशुद्धिसंभावितज्ञानप्रकाशितां शान्तिं मुक्तिं प्राप्नोति । यस्त्वविवेकी कामकारेण कामनया फले कर्मफले सक्त आसक्तः सन्नयुक्त उक्तलक्षणाकर्मानुष्ठानपरो न भवति स निबध्यते ज्ञानानुत्पत्त्या जन्मादिबन्धवान्भवति ततस्त्व मुक्तलक्षणयोगयुक्तो भवेत्यर्थः । एतेन निष्कामेन कृतं कर्म मोक्षाय भवति सकामेन कृतं कर्म बन्धाय भवतीति सूचितम् ॥ १२ ॥

नन्वकामस्य कर्मयोगेनैव मुक्तिश्चेत्तर्हि सर्वैरप्यकामनया कर्मैव कर्त्तव्यं न तु संन्यास इत्याशंकायां न ।

नित्यनैमित्तिकैरेव कुर्वाणो दुरितक्षयम् ।
ज्ञानं च विमलीकुर्वन्नभ्यासेन च पाचयेत् ।
अभ्यासात्पक्वविज्ञानः कैवल्यं लभते नरः ॥

इतिस्मरणादकामनया कृतकर्मणां फलं चित्तशुद्धिस्तस्याः फलं ज्ञानं ज्ञानस्य सर्वकर्मसंन्यासः सदात्मनावस्थानं च फलमतो बहुजन्मकृतसुकृतपरिपाकात्संप्राप्तचित्तशुद्धेस्तत्यैव समुत्पन्नपरावरैकत्वविज्ञानस्य सर्वात्मदर्शिनो ब्रह्मविदः कर्मेषदपि न संभवति कारणाभावात्किन्तु ब्रह्मविद्वर्यः सर्वाणि कर्माणि संन्यस्य स्वयमविक्रियब्रह्मात्मना तूष्णीं तिष्ठतीत्याह—

सर्वकर्माणि मनसा संन्यस्यास्ते सुखं वशी ।
नवद्वारे पुरे देहे नैव कुर्वन्न कारयन् ॥ १३ ॥

सर्वेति । नित्यनिरन्तरसमाधिनिष्ठानिर्मूलितसर्ववासनापटलत्वेन सुप्रसन्नबाह्याभ्यन्तरकरणत्वाद्वशी वशीकृतसर्वेन्द्रियग्रामः शुद्धात्मा ब्रह्मवित्सर्वकर्माणि नित्यनैमित्तिककाम्यप्रतिषिद्धलक्षणानि शास्त्रीयाण्यशास्त्रीयाणि च सर्वाणि कर्माणि मनसाधिष्ठानयाथात्म्यसंदर्शनसंजातारोपितसर्वदृश्यवस्तुमिथ्यात्वप्रत्ययवता संन्यस्य कर्म तत्कर्ता तत्साधनं तत्फलं च सर्वमसदेवेति विज्ञानेन संत्यज्येत्यर्थः । ननु मनसेतिवचनात्सर्वेषां कर्मण मनसैव त्यागो न तु बहिःक्रियया विहितानां त्यागायोगादिति चेन्न विकल्पो न हि वस्तु मायामात्रमिदं द्वैतामिति सर्वमिथ्यात्वदर्शिनो विदुषो विध्यनुपपत्तेः विधेरपि दृश्यान्तःपातित्वाद्यथा मरुस्वरूपदर्शिनो जलपानविधिवचनं जलवन्मिथ्या भवति तथाधिष्ठानब्रह्मसंदर्शिनः कर्मविधिरपि कर्मवत्कारकवन्मिथ्यैव भवति सर्वप्रमाणैः सर्वं मिथ्यैव पश्यतो ब्रह्मविदः कर्मप्रवृत्तिश्च न सम्भवति । ननु सर्वं मिथ्यैवेति प्रवर्त्ततामिति चेन्न मिथ्यात्वबुद्धेः प्रवृत्तेश्च परस्परविरोधादेकाधिकरणत्वानुपपत्तेः । नन्वन्तर्मिथ्यात्वबुद्धिर्बहिः सत्यत्वबुद्ध्या क्रियतां कर्मेति चेन्न एकस्मिन्वस्तुनि बुद्धिद्वयायोगान्न हि मरुं दृष्टवतो जलमिथ्यात्वबुद्धिस्तत्सत्यत्वबुद्धिश्चोपपन्ना दृष्टा तद्वत्सर्वदृश्यमिथ्यात्वज्ञानं तत्सत्यत्वज्ञानं तत्प्रवृत्तिश्च नैकस्य कदाप्युपपद्यते पदार्थसत्यत्वधीपूर्वकत्वात्प्रवृत्तेर्मनसि सर्वदृश्यमिथ्यात्वदृढप्रत्ययवति विदुषि सति कथं बहिः प्रवृत्तिः संपद्येत । यद्धि मनसा ध्यायति तद्वाचा वदति तत्कर्मणा करोतीति वागादिप्रवृत्तेर्मनोव्यापारपूर्वकत्वश्रवणात्ततो बहिःकरणं मनसा संन्यास इति यत्तदपास्तम् । तस्मात्सर्वदृश्यमिथ्यात्वनिश्चयपूर्वकं सर्वकर्माणि मनसा संन्यस्य ब्रह्मविद्वर्यः स्वयमविक्रियब्रह्मात्मना तूष्णीमास्ते । कुत्रेत्याकांक्षायामाह । नवद्वारे चक्षुर्भ्यां श्रोत्राभ्यां नासिकाभ्यां वक्त्रेण च पायूपस्थाभ्यां च नवसंख्याकानि द्वाराणि सूर्याद्यधिदैवतरक्षितानि यस्य तन्नवद्वारं प्रत्यगात्मैकराजकं बुद्धिप्रधानकं मनःप्रभृतिसर्वकरणपरिचारकं प्राणादिदशवायुग्रामपालकं ब्रह्मविष्ण्वादिसर्वदेवतायतनं तस्मिन्नवद्वारे पुरे देहे सुखं स्वसुखाविर्भावं यथा स्यात्तथास्ते सुखरूपेण तिष्ठतीत्यर्थः । ननु विद्वान् देहे आस्त इति यत्तदनुपपन्नं विद्वानविद्वान् यतिरयतिश्च सर्वोपि देह एवास्ते अहमिहास इति चेन्न देहात्मबुद्धेर्मूढतमस्य विपरीतप्रत्ययदर्शनात् । यस्तु देहमात्रात्मदर्शी मूढतमस्तस्य गेहे देहल्यामास इति प्रत्ययं विना नाहं देह आस इति प्रत्ययः संभवति यथा ब्रह्मांडे चराचरं सर्वं वस्तुजातं

स्वतेजसा प्रकाशयन्तं भानुमन्तमिव बुद्ध्यादिसर्वदृश्यजातमनात्मकमात्मभासा भासयन्तं स्वप्रकाशं चिदेकरसं सर्वसाक्षिणमसंगोदासीनं नित्यशुद्धमुक्तस्वभावमानन्दघनमात्मानं स्वात्मना साक्षादयमेवाहमस्मीति यो विजानाति स एव देहव्यतिरिक्तात्मदर्शी विद्वान् शक्नोति गेहे देवदत्तवद्देहे निष्क्रियब्रह्मात्मना सुखमासितुं नान्यस्तत एवोच्यते भगवता "सर्वकर्माणि मनसा संन्यस्यास्ते सुखं वशी नवद्वारे पुरे देहे इति"। यद्वा वशी नित्यनिरन्तरब्रह्मनिष्ठया वशीकृतान्तर्बहिःकरणो निश्चलात्मा ब्रह्मविद्वर्यः सर्वकर्माणि विहितानि प्रतिषिद्धान्युभयविलक्षणानि च देहचेष्टारूपाणि सर्वाण्यपि च कर्माण्यतीतानेककल्पेष्वधुना च सर्वावस्थासु सर्वदा देहेन्द्रियव्यापारेण परिणतया प्रकृत्यैव कृतानि न तु मयासङ्गकूटस्थचिद्रूपेणेत्येवमात्मानात्मनोः स्वरूपविवेकज्ञानवता मनसा नवद्वारे स्थूले न पुर्यष्टके न च नवद्वारवति पुरे पुरसदृशे पूर्णत्वाद्वा पुरन्तस्मिन्पुरे देहे कारणे देहशब्दोपलक्षितायां प्रकृतावेव संन्यस्य जननमरणादिविकाराः कर्तृत्वभोक्तृत्वसुखित्वदुःखित्वादिधर्मा जाग्रदाद्यवस्थाविशेषाश्च सर्वे प्रकृतेरेव न तु कूटस्थासंगचिद्रूपात्मनो ममेति सम्यगनात्मतादात्म्याध्यासं परित्यज्य स्वयं निष्कलनिष्क्रियनित्यशुद्धबुद्धनिरन्तरानन्दैकरसाद्वितीयब्रह्मात्मना स्वात्मन्येव तूष्णीं सुखमास्ते न किंचिद्विकरोतीत्यर्थः। ननु जपाकुसुमसान्निध्यादात्मनि प्रतीयमानान्यनात्मकर्तृकानि सर्वाणि प्रकृतिरेव करोति नाहं करोमीति विद्यया स्वयं ब्रह्मभावमापद्य विद्वान् तिष्ठतु तथापि निष्क्रियात्मना स्थातुं न शक्नोति तस्य ब्रह्मात्मना तिष्ठतोऽन्यकर्तृकक्रियासंबंधाऽभावेपि स्वाश्रयाक्रियावत्त्वसंभवात् यथान्तर्गृहस्थप्रदीपस्य पवनकर्तृकचलनक्रियाभावेपि स्वकर्तृकतैलादनक्रिया विद्यते यथा वा गजमारुह्य गच्छतो राज्ञो गजकर्तृकगमनक्रियाभावेपि स्वनिष्ठचलनक्रिया गजप्रेरणादिक्रिया च विद्यते तद्वत्परमात्मनोपि कर्तृत्वं कारयितृत्वं च विद्यत एवेति चेन्न निरवयवत्वात्परमात्मनः क्रियाश्रयत्वानुपपत्तेः। निष्कलं निष्क्रियमिति निरवयवत्वनिष्क्रियत्वश्रवणादात्मनः क्रियावत्त्वे सावयवत्वादनित्यत्वं स्यात्तदनिष्टं सर्ववादिनां श्रुतिविरोधश्च स्यात्। राज्ञोऽवयववत्त्वात्कर्तृत्वाद्युपपत्तेर्न तथात्मन इति बोधयितुमाह नैव कुर्वन्न कारयन्निति निरवयवत्वात्परमात्मा स्वयं नैव किंचित्करोति नाप्यन्यान्कारयति चेत्यर्थः। न हि निरवयवे परिपूर्णे च वस्तुनि चलनक्रिया कल्पयितुं शक्यते प्रमाण-

विरोधान्न हि निरवयवे पूर्णे आकाशे चलनं संभवति तद्वदात्मन्यपि नित्यः सर्वगतस्थाणुरित्यात्मनः पूर्णत्वनिष्क्रियत्वयोः प्रतिपादितत्वात्। ननु परमात्मनो निरवयवस्य निष्क्रियस्य कर्तृत्वकारयितृत्वयोरसंभवे सर्वाधिपत्यं कुरुते महात्मा एष एव साधु कर्म कारयति एष ते आत्मांतर्याम्यमृत इत्यादिश्रुतीनामात्मनः कर्तृत्वकारयितृत्वप्रतिपादिकानामप्रामाण्यं स्यादिति चेन्न सन्निधिमात्रेणात्मनस्तथात्वसम्भवाद्यथा सूर्यसान्निध्यात्तमोनिवृत्तौ सत्यां तन्निवृत्तिं सूर्यः करोतीत्युपचर्यते यथा वा चुम्बकसान्निध्यादयोसि चलति सति तच्चलनं चुम्बकमयश्चालयतीति चुम्बके उपचर्यते तथात्मसान्निध्यात्प्रकृतौ विजृंभमाणायां तद्विजृंभणं सर्वाधिपत्यं परमात्मन्युपचर्यते अविकारिण्येव तथैवात्मसान्निध्याद्बुद्ध्यादेः प्रवृत्तौ सत्यां बुद्ध्यादीनात्मा प्रवर्तयतीति तत्प्रवृत्तिरात्मन्यविक्रिय एवोपचर्यते परमात्मा करोति कारयतीति "ध्यायतीव लेलायतीवेति श्रुतेः"। आत्मन एवंविधकर्तृत्वकारयितृत्वयोः संभवात्तमिममर्थमादाय प्राणिनामस्वातंत्र्यसिद्ध्यै परमात्मनः कर्तृत्वं कारयितृत्वं च श्रुतयो वदंत्यनयोक्तरीत्या परमात्मनः सृष्ट्यादिक्रियाप्रतिपादिकानामेतासां च श्रुतीनां प्रामाण्यमभ्युपगन्तव्यमन्यथा निष्कलं निष्क्रियं शांतमिति न तदश्नाति किंचन न तदश्नाति कश्चनेत्यादिश्रुतीनामात्मनो निर्विकारत्वप्रतिपादिकानां व्याकोपः स्यात्। यत एवं परमात्मनोऽविक्रियत्वं बहुश्रुतिप्रमाणकं तत आत्मा न किंचित्करोति न कारयति चेति सिद्धम्॥

अन्ये तु इदं द्वयमित्थं योजयंति। तथाहि इतश्च सङ्गं त्यक्त्वा किंकर्तव्यमित्याह युक्त इति। यस्मात् युक्तः ईश्वरायैव कर्माणि न मम फलायेत्येवमभिप्रायवान् कर्मफलं त्यक्त्वा कर्माणि कुर्वन् नैष्ठिकीं निष्ठया सत्त्वशुद्धिनित्यानित्यविवेकवैराग्यसंन्यासश्रवणादिजन्यनिष्ठाक्रमेण जातां शान्तिं मोक्षाख्यामाप्नोति तस्माच्च त्वया संगं त्यक्त्वा कर्म कर्तव्यमिति हेतुयोजना। विपक्षे दोषमाह अयुक्त इति। यस्तु ईश्वरायैवैतानि कर्माणि न मम फलायेत्यभिप्रायशून्यः स कामकारेण कामतः प्रवृत्त्या स्वफलायैवेदं कर्म करोमीति फले सक्तो निबध्यते कर्मप्रयुक्तं संसारबन्धं प्राप्नोतीत्यर्थः।

अन्ये तु कर्तृत्वाभिमानसाम्येपि तेनैव कर्मणा कश्चिन्मुच्यते कश्चित्तु बद्ध्यत इति वैषम्ये को हेतुरिति तत्राह युक्त इति। यस्मादेवं तस्मात्त्वमपि युक्तः सन्कर्माणि कुर्विति वाक्यशेष इत्याह योजना तु समानैव ॥१२॥

एवमशुद्धचित्तस्य केवलात्संन्यासात्कर्मयोगः श्रेयानित्युक्तं प्रपंच्याधुना शुद्धचित्तस्य परमार्थदर्शिनः सर्वकर्मसंन्यास एव श्रेष्ठ इति बोधयन्नविदुषो वैलक्षण्यमाह सर्वेति। वशी वशीकृतकार्यकरणसंघातः देहोस्यास्तीति देही देहभिन्नात्मदर्शी विद्वान् सर्वाणि नित्यनैमित्तिककाम्यप्रतिषिद्धरूपाणि कर्माणि देहेन्द्रियादिव्यापाररूपाणि मनसा विवेकबुद्ध्या कर्मादावकर्मदर्शनेन संन्यस्य संत्यज्य सुखमनायासेन प्रारब्धकर्मवशादास्ते तिष्ठत्येवानेन सर्वकर्मत्यागे मरणप्राप्तिर्वारिता। क्वास्ते इत्यत्राह नवद्वारे नवद्वाराणि द्वे श्रोत्रे द्वे चक्षुषी द्वे नासिके वागेका द्वे पायूपस्थे इत्येवंरूपाणि यस्मिन्न तस्मिन् पुरे नवद्वारविशिष्टे नगरस्थानीये देहे आत्मैकस्वामिके इन्द्रियपरिवारिके बुद्ध्यमात्यकेहंकारयुवराजके मनःशिल्पिके किं किंचित्कुर्वन्नास्ते इति नेत्याह नैव कुर्वन्स्वयं न कारयन्नन्यं देहादिकं अनेन स्वनिष्ठव्यापारेणात्मनः कर्तृत्वं देहादिव्यापारेषु कारयितृत्वं च निरस्तम्। अयं भावः। यद्यपि देहभिन्नात्मदर्शी देहे जीवनत्वाद्देहाभिमानाभासवानवतिष्ठते तथापि प्रवासीव परगेहे तत्पूजापरिभवादिभिरप्रहृष्यन्न विषीदन्नहंकारममकारशून्यस्तिष्ठति। ननु सर्वस्य देहिनः संन्यासिनश्च देह एव स्थितत्वात् किमिति विशेषणेनेति चेच्छृणु अज्ञस्तु देह भिन्नात्मदर्शी देह एव न तु देही स च भूमौ गृहे आसने वाऽहमास इति मन्यते न तु देहेहमास इति भेददर्शनाभावात्। संघातभिन्नात्मदर्शी तु सर्वसंन्यासी भेददर्शनाद्देहेहमास इति मन्यते अत एव देहादिव्यापाराणामविद्ययात्मन्यक्रिये सामारोपितानां विद्यया बाध एव सर्वकर्मसंन्यास अत्रोच्यते एतस्मादेवाज्ञवैलक्षण्याद्युक्तं नवद्वारे पुर आस्त इति विशेषणमिति ॥ १३ ॥

नैव कुर्वन्न कारयन्नित्युक्तं प्रपंचयति—

न कर्तृत्वं न कर्माणि लोकस्य सृजति प्रभुः ।
न कर्मफलसंयोगं स्वभावस्तु प्रवर्तते ॥ १४ ॥

नेति। प्रभुरात्मा देहादिस्वामी लोकस्य देहादेः कर्तृत्वं न सृजति त्वं कुर्विति प्रेरणेन तस्य कारयिता न भवतीत्यर्थः। नापि लोकस्य कर्माणीप्सिततमकर्मेत्युक्तानि घटादीनि स्वयं सृजति कर्तापि न भवतीत्यर्थः। नापि लोकस्य रथघटप्रासादादिकर्म कृतवतस्तत्फलेन सम्बन्धं सृजति भोज-

काले बीजमेतावत् तस्मिन् काले चेदमिति नोक्तं तथाऽपि बीजं संस्कार्यं ग्रहेष्वित्युक्तं मुनिभिः ।

"ध्यानग्रहोपदेशाद्बीजं ज्ञात्वा सुदैवज्ञैः ।
तत्संस्कृतग्रहेभ्यः कर्त्तव्यौ निर्णयादेशौ"—इति ॥

अत एव बीजं त्वयाऽपि स्वीकृतम् ।

"मुनिप्रणीते मनुजैर्दृश्यते क्वचिदन्तरम् ।
तदा तदेव संसाध्यं न कार्यं सर्वमन्यथा"—इति ॥

तथा सौरे—

"तत्तद्गतिवशान्नित्यं यथा दृक्तुल्यतां ग्रहाः ।
प्रयान्ति तत् प्रवक्ष्यामि स्फुटीकरणमादरात्"*—इति ॥

अत्र नित्यमिति स्फुटीकरणविशेषणं तेन नित्यं स्फुटीकरणं वक्ष्यामीति । तत्र स्फुटीकरणं द्विविधम् । एकं नित्यमन्यन्नैमित्तिकं च । तत्र नियतनिमित्तोपाधिना तुङ्गव्यवधानादिना क्रियमाणं नित्यमित्युच्यते । अनियतनिमित्तोपाधिना बीजवशेन क्रियमाणं नैमित्तिकम् । बीजाख्योऽपि कश्चन वायुविशेषोऽस्तीति कल्प्यते तत्संस्कारस्य दृष्टत्वात् उच्चपातादिदेवतावत् । स तु स्वच्छन्दगतिश्चन्द्रकक्षाप्रभृतिष्वष्टास्वपि कक्षासु भिन्नभिन्नजवेन कदाचिद्वाति कदाचिदेकस्यामेव कक्षायां वाति द्व्यादिकक्षायां वा कदाचित् कक्षाष्टकेऽपि न वाति । यन्मते मुनीनामतीन्द्रियार्थविज्ञाने शक्तिरस्ति तन्मते बीजजवस्य त्रैविध्यं स्वीकार्यम् । कल्पकाले या वास्तवा ग्रहशीघ्रमन्दोच्चपातानां भगणाद्या गतिस्तस्याः संख्याया एकरूपत्वमेवापेक्षितं वस्तुनि द्वैरूप्यासंभवात् । तस्याः कल्पगतेरनुपातसिद्धा यैकदिनजा गतिः साऽप्येकरूपैव । मुनिभिः कस्मिँश्चित् कालविशेषे योपलब्धा मध्यमा गतिः सा वास्तवगतेर्न्यूनाधिका दृष्टा । कल्पादितो वास्तवगत्या साधितग्रहेषु कल्पादित एव वास्तवोपलब्धगत्यन्तरानुपात-

* सूर्यसिद्धान्ते स्पष्टाधिकारे १४ श्लो० ।

सिद्धान्तरसंस्कारेण दृक्समत्वं बहुकालं दृष्टमिति प्रत्यक्षोपलब्धमध्यगत्यैव नूतनाः कल्पभगणाः शिष्याणां क्लेशो माभूदिति कल्पिताः । एवं बीजलववशेनैव भगणानां भेदो जातः । इयं बीजगतिर्नियतोपाधावेवान्तर्गता ।

अत एव

"युगे युगे महर्षीणां स्वयमेव विवस्वता" * ॥

इति सूर्यसिद्धान्ते उक्तम् । किञ्च यन्मतेऽतीन्द्रियार्थविज्ञानं श्रुतित एव भवति तन्न तु ग्रहपातोच्चभगणानां संख्यानानात्वं वेदमूलकमिति वेदितव्यम् । श्रुतावपि कथमनेकधा पाठ इति तत्रापीदमेवोत्तरं तत्तत्कालविशेषावच्छिन्नमध्यमगतिभिन्नत्वाभिप्रायेण वेदे नोक्तम् । किमिति वास्तवा एकविधा एव भगणा नोक्ताः कथमेवंविधा उक्ता इति वेदं कः पर्यनुयुञ्ज्यात् । तस्मादियं बीजगतिर्नियतोपाधावन्तर्गतेत्ययमेको भेदः । अत एव स्मर्यते यस्मिन् काले येन पक्षेण दृग्गणितैक्यं दृश्यते तस्मिन् काले स एव पक्षोऽङ्गीकार्य इति विषयव्यवस्था । अयं बीजगतिभेदो मनुष्यैः पार्थक्येन विवेक्तुं न पार्यते । कल्पादिकालादन्यस्माद्वा कालादुपचयापचयात्मकः कतिपयकाले नियतगतिर्द्वितीयो भेदः । यथा चाचार्यो वक्ष्यति "खाभ्रखार्कैर्हृताः कल्पयाताः समाः"—इति । अयं पारम्पर्योपदेशान् मनुष्यैरपि ज्ञातुं शक्यते । संप्रति नवकलोनश्चन्द्रो दृक्सम इति तृतीयो भेदः । यथा च गणेशदैवज्ञैरुक्तम्—"अङ्ककलिकोनाब्ज"†—इति । अयं च मनुष्यलक्ष्यः । "ध्यानग्रहोपदेशात्"इति पूर्वं यदुक्तं तदनयोर्भेदयोर्विषयः । वेधस्य चित्तैकाग्र्येण यन्त्रद्वारा ग्रहज्ञानं ध्यानग्रहशब्देनोच्यते । तस्मात् पारम्पर्योपदेशाच्चेत्यर्थः । तस्मादयं बीजाख्यवायुविशेषः समस्तैर्व्यस्तैर्वा गतिभेदैर्ग्रहमुच्चं पातं वा नक्षत्रं बहून् सर्वान् वा चालयति । नक्षत्रध्रुवकस्यापि दृक्समत्वमिष्टम् ।

* सूर्यसिद्धान्ते मध्यमाधिकारे ९ श्लो० ।

† ग्रहलाघवे मध्यमाधिकारे १६ श्लो० ।

"गोलं बध्वा परीक्षेत विक्षेपं ध्रुवकं स्फुटम्" * ।

इति सूर्यसिद्धान्तोक्तेः। तस्माद्बीजसंस्करणमार्षशास्त्रमूलं लम्बनसंस्करणमधिमासनिर्णयार्थं दर्शान्ते न कार्यमार्षशास्त्रविरुद्धत्वादयुक्तत्वादत्र यावत्प्रामाणिकैरकृतत्वाच्चेत्यलमनया प्रसङ्गागततन्त्रान्तरदूषणकथाप्रस्तावनया ।

श्रीमत्कौण्डिण्यवासिकेशवसुतप्राप्तावबोधाद्बुधाद्-
भट्टाचार्यसुताद्दिवाकर इति ख्याताज्जनिं प्राप्तवान् ।
यः कृष्णस्तनयेन तस्य रचिते सद्वासनावार्त्तिके
सत्सिद्धान्तशिरोमणेः सुविषमो मध्यमाधिकारो गतः ॥

इति गणिताचार्यनृसिंहकृतौ मध्यमाधिकारः ।

मरीचिः—अथार्कगणोत्पन्नग्रहाणां लङ्काभूगर्भमध्यार्कोदयासन्नकालीनानां स्वनिरक्षदेशभूगर्भमध्यार्कोदयासन्नकालीनकरणार्थं देशान्तरफलं विवक्षुस्तत्र तदानयनोपजीव्यं भूपरिधिं सविशेषं शार्दूलविक्रीडितेनाह प्रोक्त इति । भूगोलवृत्तपरिधिस्त्र्यंस्त्रिंशदूनपञ्चसहस्रयोजनमितः ४९६७ प्रोक्तः प्राचीनैर्मुनिभिर्मयैव तु । ननु सिद्धान्तशेखरे ।

"योजनैः खखखबाणसंमितैर्भूमिगोलपरिधिः प्रकीर्त्तितः" ।

इत्यनेन ब्रह्मगुप्तादिभिश्च पञ्चसहस्रमितः संपूर्ण उक्तस्तत्कथमित्यतस्तदुत्तरं व्यासकथनव्याजेनाह तदित्यादि । तस्य भूगोलस्य वृत्तपरिधेर्व्यासो मध्यविस्तार एकोनविंशत्यूनषोडशशतयोजनमितः ।

तथा च सिद्धान्तशेखरे ।

"तस्य योजनमया च विस्तृतिर्भूभुजङ्गविषयामृतांशवः" ॥

इत्यनेन व्यासाद्विप्रतिपत्त्या तुल्या † ।

---

* सूर्यसिद्धान्ते नक्षत्रग्रहयुत्यधिकारे १२ श्लो० ।

† विशेषगणः—विस्तृतिर्व्यास इति सिद्धान्तशेखरस्थमूर्ध्वश्लोकमवलोक्यम् ।

"व्यासे भनन्दाग्निहते विभक्ते खबाणसूर्यैः परिधिस्तु सूक्ष्मः" ।

इति पाटीस्थप्रकारेण तदुक्तपरिध्यानयनप्रकारादतिसूक्ष्मेण यः परिधिः स एवेति निर्विवादः । एतदानयनस्य सूक्ष्मत्वं गणेशदैवज्ञैर्लीलावतीटीकायां दर्शितम् । एवं च ।

"भूनागतिथयः कर्णो भुवः खखरसाहतः ।
शशाङ्कनवचन्द्राप्तो भूवृत्त ... ..." ॥

इत्यादिलघुवशिष्टसिद्धान्तेऽङ्गीकाराच्च मदुक्त एव प्रमाणमत एव प्रोक्त इत्युक्तमिति भावः । योजनमानं तु पाटीपरिभाषोक्तमेव । ननु भुव एकत्वात् ।

"योजनानि शतान्यष्टौ भूकर्णो द्विगुणानि तु ।
तद्वर्गतो * दशगुणात् पदं भूपरिधिर्भवेत्" ।

इति सूर्यसिद्धान्ते ।

"तयैवाङ्गुलमानेन क्षितिपरिधिर्भवति योजनैर्मध्यः ।
चेतरवैः ६६२५ पूर्वापर उत्तरयाम्योऽथ वा तावान्" ॥

इतित्यार्यभटः ।

"खखामरा योजनवेष्टनं भुवो नभःशराभक्षितयोऽस्य विस्तृतिः" ।

इति धीवृद्धिदे कथं परस्परं भूमाने भेद इत्यतो योजनं प्रतिजानीते अथेति । अत इत्यर्थः । भूमानाभेदार्थमिति यावत् । योजनमेकजातीययोजनप्रमाणेनान्यमतयोजनप्रमाणं प्रोच्यते । अभेदकर्त्तृत्वप्रकर्षद्वारा मयोच्यते नान्यैरुक्तमिति भावः । तदेवाह याम्योदगिति । भूवेष्टनं भूगोलवृत्तपरिधियोजनमानं प्रागुक्तम् । दक्षिणोत्तरेण वर्त्तमानयोः पुरयोः पलान्तरेण त्रिप्रश्नाधिकारोक्तप्रकारेण ज्ञातयोस्तद्देशीयाक्षांशयोर्यदन्तरं तेनेत्यर्थः । गुणितम् । द्वादशराश्यंशैः षष्ठ्यधिकशतत्रयेण भक्तम् । तद्भक्तस्य फलभक्तस्य । पुरान्तराध्वनोऽक्षांशान्तरेणोक्तदिशा स्वस्वभूपरिध्याश्रयेण

* विशेषशरणः—अत्राकारच्छेदेन 'अदशगुणात्' किञ्चिच्चूनदशगुणादिति पूज्यचरणाः । एतदर्थं द्रष्टव्यः सुधावर्षिणीटीकोपेतः सूर्यसिद्धान्ते मध्यमाधिकारे ५९ श्लो॰ ।

तयोरेव पुरयोरन्तराध्वनः केवलदक्षिणोत्तरभावेनान्तरयोजनमानस्य फलेन तुल्यं योजनम् । एकयोजनमानमिह चतुःक्रोशात्मकपाट्युक्तयोजनमितं भूप्रदेशे ज्ञेयम् । तथा च मदुक्तयोजनमानात् तत्तदुक्तयोजनमानस्य न्यूनाधिकत्वाद्विसदृशं भूमानं भवत्यपि स्वयोजनेन तत्तन्मतेन योजनमानस्य स्पष्टरूपस्यासंपूर्णकस्य एकयोजनत्वाङ्गीकारेण सर्वसंमतं मदुक्तं भूपरिधिमानमित्यभेदः सुबोधः । अत एवार्यभटे प्रश्नेऽदराङ्गुलमानेन क्रोशादिगणने भूमानाधिक्यं स्पष्टमिति नोक्तदोष इति भावः । एतेन तत्तद्देशे स्वसंकेतितमहल्लघुयोजनप्रमाणेन देशान्तरयोजनप्रमाणयोरभेदोऽपि सूचितः ।

अत्रोपपत्तिः । कश्चिद्गणितशास्त्रज्ञः कुतश्चिन्नगरात् पृथ्वीमानज्ञानार्थं सूर्यबिम्बकेन्द्रोदयकाले पूर्वां दिशं गन्तुं प्रवृत्तः । स यावद्योजनदशकं गतः सन् वालुकायन्त्रेणाहोरात्रषष्टिघटिकापरिपूर्णेन कालं गणयतिस्म तावत् तत्र सूर्योदयदर्शनकाले पूर्वसूर्योदयात् किञ्चिन्न्यूनषष्टिघटिका वृत्ताः । ततस्तेनेदं ज्ञातम् । यथा यथा यद्देशात् प्रागगच्छति तथा तथा तद्देशसूर्योदयकालात् पूर्वमेव सूर्योदयं पश्यतीति । पूर्णषष्टिघटिकास्तु यद्देशाच्चलितस्तद्देशसूर्योदयकाले भवन्तीति किञ्चिन्न्यूनषष्टिषट्यूनषष्टिघटिकाः पलात्मका ग्राह्याः । संपूर्णभूपरिधिभ्रमणं विना पुनः सूर्योदयासंभवात् सावनषष्टिघटीभिर्भूपरिधियोजनानि भवन्त्यतः पलात्मकैतदन्तरेण दश योजनानि तदा षष्टिघटीपल—३६००मितेन कानीति भूपरिधिः स्पष्टः । ततो लम्बज्ययाऽयं परिधिस्तदा त्रिज्यतुल्यलम्बज्यया क इति निरक्षदेशभूवृत्तपरिधिरुक्त उपपन्नः । पूर्वप्रकारेण निरक्षदेश एव भूपरिधिमानं साध्यमिति न लम्बज्याऽनुपातप्रयासो वेत्येकदेशिनः । परिधेः पाट्युक्तप्रकारेण भूव्यास उक्तप्रमाणः सिद्धः । याम्योत्तरवृत्तेऽक्षांशानां सत्त्वादक्षांशान्तरं याम्योत्तरान्तरिततत्तद्देशयोर्याम्योत्तरवृत्ताकाशेऽन्तरांशा वृत्तांशभागेन परिधियोजनानां भूमौ सत्त्वात् । द्वादशराशिभागै-३६०-र्भूपरिधियोजनानि तदाऽक्षांशान्तरैः कानीत्यनुपातेन तदक्षां-

शीयदेशयोरन्तरयोजनानि स्वस्वभूपरिधिमानेन भवन्ति । एतानि केवलदक्षिणोत्तरान्तरेण भवन्तीति । पूर्वापरदक्षिणोत्तरान्तरस्थितयोरन्तरं कर्णरूपमक्षांशान्तरेण न भवतीति याम्योदक्पुरयोरिति पूर्वापरान्तराभावदेशयोर्येहार्थमुपपन्नम् । अत एवाक्षांशतुल्यदेशयोरन्तरं दक्षिणोत्तरं शून्यमुक्तप्रकारेणोपलभ्यते । अन्यथा समाक्षांशदेशयोरन्तरस्य प्रत्यक्षत्वेनोक्तप्रकारस्य व्यभिचारापत्तेः । स्वाभिमतान्तरयोजनप्रमाणेन मानं भवति । अतः पुरान्तराध्वन इत्यनेन पराभिमततद्देशान्तरयोजनमानसंख्यायां संकेतात् सम्यगुक्तमभेदकर्तृयोजनमानम् । यद्यपीदं स्वभूपरिधिना परोक्तपरिधियोजनानि तदेकस्वयोजनेन कानीत्यनुपातेन लाघवात् सिद्ध्यति तथाऽपि लौकिके तद्देशविशेषेण महल्लघुयोजनमानस्य भिन्नत्वेन व्यवहारात् । तदभिप्रायेणाप्येकवाक्यतासंग्रहार्थमनया रीत्या प्रामाणिकगौरवस्यानुसरणं युक्तमेव । ननु तथाऽप्युक्तरीत्या पराभिमतभूपरिधिरपि युक्तः । तन्मतैकयोजने स्वाभिमतयोजनप्रमाणेन योजनमानस्य स्वतः सिद्धत्वात् । तथा च मुख्यः परिधिर्गणितार्थक उपयुक्त इति चेन्न ।

'वेश्मान्तः पतितेषु भास्करकरे चालोक्यते यद्रजः
स प्रोक्तः परिमाणुरष्टगुणितैस्तैरेव रेणुर्भवेत् ।
तैर्बालाग्रमथाष्टभिः कचमुखैर्लिक्षा च यूकाष्टभिः
स्यात् ताभिश्च तदष्टकेन च यवोऽष्टाभिश्च तैरङ्गुलम् ॥
तैः स्याद्द्वादशभिर्वितस्तिरुदितो हस्तश्च ताभ्यां पुनश्चापं हस्तचतुष्टयेन धनुषां क्रोशः सहस्रद्वयम् ।
एवं क्रोशचतुष्टयेन गदितं सांवत्सरैर्योजनं
कक्षा तद्ग्रहधिष्ण्यभूपरिधिना व्यासादिसंसिद्धये" ॥

इत्यादिप्रसिद्धपरिभाषायाः सर्वाभ्युपगमात् गोलाध्याये प्रत्यक्षप्रमाणेन गृहीत इति स्फुटमाचार्योक्तेश्चास्यैवोपयोगादिति संक्षेपः ॥ १ ॥

इदानीं भूपरिधिस्फुटीकरणं मध्यरेखां चाह ।

लम्बज्यागुणितो भवेत् कुपरिधिः स्पष्टस्त्रिभज्याहृतो

यद्वा द्वादशसंगुणः स विषुवत्कर्णेन भक्तः स्फुटः ।
यल्लङ्कोज्जयिनीपुरोपरि कुरुक्षेत्रादिदेशान् स्पृशत्
सूत्रं मेरुगतं बुधैर्निगदिता सा मध्यरेखा भुवः ॥ २ ॥

वा. भा.–अत्रोपपत्तिर्गोले ।

मरीचि–अथ भूपरिधेः स्पष्टत्वं देशान्तरफलसाधनहेतुभूतां मध्यरेखां च शार्दूलविक्रीडितेनाह लम्बज्यागुणित इति । प्रागुक्तो भूपरिधिः । अक्षांशोनवत्यंशानां वक्ष्यमाणप्रकारेण साधितज्यया गुणित इत्यर्थः । त्रिराशिज्यया परमज्यासंख्यया भक्तः स्पष्टो देशान्तरफलसाधनप्रयोजकः स्यात् । लम्बांशज्यासाधने श्रमाधिक्येन गौरवाल्लघुभूतं तत्साधनप्रकारान्तरमाह यद्वेति । सः पूर्वोक्तपरिधिर्विषुवत्कर्णेन विषुवद्दिनीयमध्याह्नच्छायायाः कर्णेन वक्ष्यमाणप्रकारज्ञातपलभावर्गयुतवेन्द्रेन्द्र–१४४ मूलेनेत्यर्थः । फलं स्फुटः प्रागानीत एव भवति । यत् लङ्कात उज्जयिनीपुरोपरिस्थितं कुरुक्षेत्रादिदेशान् स्पृशत् तत्तद्देशसंलग्नं मेरुगतं मेरुपर्वतमवधीकृत्य विद्यमानं सूत्रम् । लङ्कामेर्वोः पूर्वापरान्तराभावेन विद्यमानं समसूत्रम् । बुधैः सूर्यादिभिः ।

"राक्षसालयदेवौकःशैलयोर्मध्यसूत्रागाः" * ।

इति वचनेन भुवो लङ्कामेर्वन्तरावच्छिन्नभूगोलचतुर्थांशस्य सा सूत्रोपलक्षिता रेखा मध्यरेखा तच्छकलद्वयस्य सन्धिरित्यर्थः । निगदिता । तथा च लङ्कातो मेरुपर्यन्तं ये भूमिप्रदेशाः पूर्वापरान्तराभावेन सन्ति ते मध्यरेखादेशा देशान्तरफलोपयुक्ता इति पर्यवसन्नम् ।

तथा च श्रीपतिः ।

"लङ्का कुमारी नगरी च काञ्ची पानाटमद्रिश्च सितः षडास्यः ।
श्रीवत्सगुल्मं च पुरी ततश्च माहिष्मती चोज्जयिनी प्रसिद्धा ॥
स्यादाश्रमोऽस्मान्नगरं सुरम्यं ततः पुरं पट्टशिवाभिधानम् ।

* सूर्यसिद्धान्ते मध्यमाधिकारे ६२ श्लो. ।

श्रीगर्गराटं च सरोहितार्कस्थानेश्वरं शीतगिरिः सुमेरुः ॥
इतीव याम्योत्तरगां धराया रेखामिमां गोलविदो वदन्ति ।
अन्यानि रेखास्थितिभाजि लोकैर्ज्ञेयानि तज्ज्ञैः पुटभेदनानि" इति ॥

अत्रोपपत्तिः । प्रागुक्तः सप्ताङ्गाङ्काब्धिमितः परिधिर्निरक्षदेशे । स्वदेशसम्बन्धी यः परिधिः स देशान्तरफलोपजीव्यत्वात् स्फुटः । ननु भुवः कन्दुकाकारत्वेन सर्वत्र तुल्यपरिधेः संभवाद्भवदभिमतो निरक्षदेश-परिधिः स्वदेशस्य न भवतीत्यपूर्वं त्वन्मुखान्निगतं कथं युक्तमिति चेन्न । कन्दुकाकारत्वेऽप्येकप्रदेशस्य मध्यत्वकल्पनेन तत्स्थपरिधेरुक्तमानमितत्व-सम्भवात् । तदितरभूप्रदेशे पूर्ववृत्तानुरोधेन कृतवृत्तस्य भिन्नत्वसम्भवायु-क्तमेव । तथा हि लङ्कातो मेरोर्भूपरिधियोजनचतुर्थांशान्तरेण सत्त्वान्मेरु-भूगर्भं मध्यं प्रकल्प्य भूव्यासार्धेन यद्वृत्तमुत्पद्यते तन्निरक्षदेशोपरीति तद्देशा-नामुक्त एव परिधिः । अत एव भूपृष्ठे भूपरिधिचतुर्थांशसूत्रस्य वृत्तकार-णत्वं युक्तम् । अनयैव रीत्या स्वदेशमेर्वन्तरयोजनैर्मेरुमध्यं प्रकल्प्य भूपृष्ठे यद्वृत्तमुत्पद्यते तत्तत्संलग्नभूप्रदेशस्येति स्वपरिधिस्ततो न्यून एवेति । एवं निरक्षदेशाद्वडवासन्नदेशे वडवामध्यकल्पने परिधिर्ज्ञेयः । तत्र निरक्ष-देशाद्दक्षिणगोलार्धे वडवामध्ये मनुष्यसंचाराभावात् परिधिर्न कृतः । उत्तरभूगोलार्धे मेरुमध्येऽस्मदादीनां सञ्चारात् स्वपरिधिः साधितस्तद-नुरोधेन उक्तरीत्या परमपरिधिः । परिध्यभावस्थाने निरक्षमेरू । तत्र क्रमेण लम्बांशपरत्वाभावत्वे वक्ष्यमाणयुक्त्या स्वतः सिद्धेऽतोऽंशानुपातस्य वक्ष्य-माणयुक्त्याऽयुक्तत्वात् । त्रिज्यातुल्यलम्बज्ययोक्तः परिधिस्तदा स्वदेशल-म्बज्यया क इत्यनुपातेनोपपन्नं लम्बज्येत्याद्विप्रथमसाधनम् । द्वितीयोप-पत्तिस्तु वक्ष्यमाणरीत्याऽक्षकर्णे द्वादशशङ्कुः कोटिस्तदा त्रिज्याकर्णे का कोटिरित्यनुपातसिद्धलम्बज्यास्वरूपेण पूर्वोक्तप्रकारे क्रियमाणे त्रिज्यातुल्य-गुणहरयोर्नाशाद्द्वादशगुणोऽक्षकर्णभक्त इति सिद्धम् । निरक्षे द्वादशमिता-क्षकर्णे यद्युक्तः परिधिस्तदेष्टदेशे तदधिकाक्षकर्णे क इति त्रैराशिकादुक्त-

प्रकारेणानीततदधिकपरिधेरसम्भवात् "इच्छावृद्धौ फले ह्रासः"-इत्युक्तेन व्यस्तत्रैराशिकेन वोपपन्नम् । निरक्षपरिधिना यथा भूगोलस्य दक्षिणोत्तर-शकले कृते तथा लङ्कामेरुवइत्र्यासिद्धपुरस्पृष्टवृत्तरूपतादृशपरिधिना भूगो-लस्य पूर्वपश्चिमशकले स्तः । अयं याम्योत्तरवृत्ते परिधिर्भूगोलस्य मध्ये रेखारूपः सिद्धोऽपि लङ्कामेर्वन्तरावच्छिन्नभूप्रदेशे मनुष्यसञ्चारात् परिधि-चतुर्थांशरूपैव मध्यरेखोक्ता । अत एव निगदितेत्यनेनागम एवात्र प्रमाण-मित्यपि सूचितम् ॥ २ ॥

इदानीं देशान्तरमाह ।

यत्र रेखापुरे स्वाक्षतुल्यः पल-
स्तन्निजस्थानमध्यस्थितैर्योजनैः ।
खेटभुक्तिर्हता स्पष्टभूवेष्टने-
नोद्धृता प्रागृणं स्वं तु पश्चाद्ग्रहे ॥ ३ ॥

वा. भा.—अत्रोपपत्तिस्त्रैराशिकेन गोलेऽभिहिता च ॥ ३ ॥

मरीचिः—अथ यदर्थमयमुद्योगस्तदेव स्रग्विण्याऽऽह यत्रेति । लङ्कातो मेरुपर्यन्तगतरेखयाऽवच्छिन्नं च यत् पुरं भूप्रदेशस्तत्र जात्यभिप्रायेणैकवच-नम् । तेन रेखीयभूप्रदेशेष्वित्यर्थः । यत्र यस्मिन् भूप्रदेशे विद्यमानः पलो विषुवद्दिनमध्याह्ने खस्वस्तिकात् सूर्यस्य याम्योत्तरवृत्ते यैरंशैर्नतिस्तन्मान-रूपः स्वाक्षतुल्यः स्वदेशीयाक्षांशतुल्यो भवति । तत् तादृग्रेखाभूप्रदेशो निजस्थानतत्पूर्वापरविभागस्थिततादृशस्वेष्टभूप्रदेशः । तयोर्मध्येऽन्तरे स्थितैर्विद्यमानैर्योजनैरुक्तमानगणितज्ञातयोजनसंख्याभिर्ग्रहगतिः प्रागुक्ता गुणिता साधितस्पष्टभूपरिधियोजनमानेन भक्ता । फलं यदाद्या गति-स्तदादिकं देशान्तराख्यं ग्रहेऽहर्गणानीते प्रागुक्ते । प्राक् रेखातः पूर्वविभागे देशे हीनं पश्चिमविभागे युतं कार्यम् ।

अत्रोपपत्तिः । अहर्गणोत्पन्नग्रहाणां लङ्कामध्यमार्कोदयकालावच्छ-कालिकानां स्वनिरक्षभूगर्भतात्कालिककरणार्थं यत् फलं तद्देशान्तरं पूर्वा-

परमित्युच्यते । स्वेष्टदेशस्य लङ्कादिनिरक्षदेशेषु यन्निरक्षभूप्रदेशेन लङ्कारेखादेशयोरिव पूर्वापरान्तराभावः स स्वनिरक्षदेशश्च । तत्र तत्फलज्ञानार्थं लङ्कास्वदेशनिरक्षयोरन्तरयोजनानि निरक्षदेशपरिधिस्थानि ग्राह्याणि । अस्मादृशां तत्र संचाराभावाद्येषां ज्ञानार्थं लङ्कातः पूर्वापरान्तराभावावच्छिन्नस्वस्पष्टपरिधिसंलग्नरेखाभूप्रदेशात् स्वदेशपर्यन्तं स्पष्टपरिधिस्थान्यन्तरयोजनानि ज्ञातव्यानि । तत्रैतादृशरेखाभूप्रदेशज्ञानं त्वक्षांशसमत्वेन विषुवद्दिनमध्याह्ने सूर्यस्य स्वमध्याद्याम्योत्तरवृत्ते तुल्यांशैस्तद्देशयोर्नतत्वात् । लङ्कातद्रेखाप्रदेशान्तरयोजनानामिव स्वनिरक्षस्वदेशयोरन्तरत्वान्निरक्षभूपरिधितुल्यतद्याम्योत्तरभूवृत्तपरिधियोजनैर्भगणांशास्तदाऽन्तरयोजनैः केऽंशा इत्यनुपातेनागताक्षांशतुल्यत्वाच्च । अन्यथा स्पष्टपरिधिस्थत्वं रेखास्वदेशयोर्न स्यात् । अत एवाक्षांशतुल्यमात्रोक्तेनातिप्रसङ्गभयाद्रेखापुरमित्युक्तम् । सिद्धान्तशेखरे तु पञ्चसहस्रमितभूपरिध्यङ्गीकारेण ।

"तिर्यक्स्थितं स्वपुटभेदनतोऽक्षमित्या
रेखास्वपत्तनमवेत्य जनप्रसिद्ध्या ।
स्वस्थानतत्फलवियोगलवाः शरार्कैः
क्षुण्णा हृता नवभिराप्तकृतिर्विशोध्या ॥
विज्ञातयोजनकृतेः पदमात्मधाम-
रेखान्तरालतनुयोजनकर्णमाहुः" ॥

इत्यनेन देशान्तरयोजनज्ञानं युक्तियुक्तमुक्तम् । अथैभ्यः स्पष्टपरिधिप्रमाणेनैतानि तद्रेखादेशस्वदेशान्तरयोजनानि तदा निरक्षदेशपरिधिप्रमाणेन कानीत्यनुपातेन लङ्कास्वनिरक्षदेशान्तरयोजनानि भवन्ति । ततो निरक्षभूवृत्तपरिधिभ्रमणेनोदयसंभवादेकसावनदिनीयतद्योजनैर्गतिकलास्तदा लङ्कास्वनिरक्षदेशान्तरपूर्वसिद्धयोजनैः का इत्यनुपातेन निरक्षदेशपरिधेस्तुल्यगुणहरत्वेन नाशात् तादृशरेखादेशस्वदेशान्तरयोजनसंख्यागुणिता गतिः स्पष्टभूपरिधिमानभक्तेति सिद्धम् । अथेदं

लङ्कादेशात् स्वनिरक्षदेशस्य पूर्वभागे स्थितत्वेन पश्चिमाभिमुखप्रवहा-निलसंचलितसूर्यस्योदयो लङ्कोदयात् पूर्वकाल इति तत्कालीनकरणार्थं फलं ग्रहे हीनम् । एवं पश्चिमविभागेऽग्रिमकाल इति युक्तम् । अहर्गणोत्पन्नग्रहाणां तदुदयासन्नकालिकत्वात् स्वनिरक्षदेशोदयासन्नकाल एव सिद्ध्यन्ति । यथा लङ्कापरेखादेशात् स्वदेशस्य पूर्वपश्चिमविभा-गयोः स्थितिः तथा स्वनिरक्षदेशस्य लङ्कात इति सर्वमुपप-न्नम् ॥ ३ ॥

इदानीं देशान्तरघटिका आह ।

प्राग्भूविभागे गणितोत्थकाला-
दनन्तरं प्रग्रहणं विधोः स्यात् ।
आदौ हि पश्चाद्विवरे तयोर्या
भवन्ति देशान्तरनाडिकास्ताः ॥ ४ ॥
तद्घ्नं स्फुटं षष्टिहृतं कुवृत्तं
भवन्ति देशान्तरयोजनानि ।
घटीगुणा षष्टिहृता द्युभुक्तिः
स्वर्णं ग्रहे चोक्तवदेव कार्यम् ॥ ५ ॥
अर्कोदयादूर्ध्वमधश्च ताभिः
प्राच्यां प्रतीच्यां दिनपप्रवृत्तिः ।
ऊर्ध्वं तथाऽधश्चरनाडिकाभी
रवावुदग्दक्षिणगोलयाते ॥ ६ ॥

वा.भा.—यः किल मध्यरेखाया अपरिज्ञानात् ततः प्राक् पश्चाद्वा स्थितोऽस्मीति न वेत्ति तेनैवं ज्ञातव्यम् । विधुग्रहणदिने घटिकायन्त्रेण स्पर्शकाले रात्रिगतं ज्ञेयम् । अथ च गणितेन स्पर्शकालो ज्ञेयः । गणितो-त्थकालादनन्तरं प्रग्रहणं यदि दृष्टं तदा द्रष्टा रेखातः प्राग्भूविभागे । यतो द्रष्टा यथा यथा रेखातः प्रागव्रजति तथा तथा रेखोदयात् प्रागेवार्कोदयं

पश्यति । इतोऽन्यथा चेत् तदा पश्चाद् दृष्टा । दृग्ग्रहणग्रहणकालयो-रन्तरं देशान्तरघटिकास्ताभिर्गुणितं षष्ट्या हृतं स्पष्टभूवेष्टनम् । एवमनुपा-ताद्देशान्तरयोजनानि । अथ वा किं योजनैः । यदि घटीप्रमाणा गतिर्लभ्यते तदा देशान्तरघटीभिः किमित्येवं यत् फलमुत्पद्यते तत् प्राग्वत् पश्चादृणमिति युक्तमुक्तम् । तथा प्राच्यां ताभिर्घटीभिर्दिनवारप्रवृत्तिर-र्कोदयादूर्ध्वं भवति । प्रतीच्यां तु तस्मादधः । यतो लङ्कोदये वारादिः । अत एव च रवावुत्तरगोलस्थे चरार्धघटिकाभिरूर्ध्वम् । यतस्तदोन्मण्डलं क्षितिजादूर्ध्वम् । दक्षिणे त्वधोऽतस्तत्रोदयादधो वारप्रवृत्तिरिति सर्वं निरवद्यम् ॥ ४ ॥

मरीचिः—ननूच्चावचभूमौ तादृशयोजनानां सूक्ष्मत्वेन ज्ञानासंभवादस्मा-दृशां देशान्तरगणनाया अशक्यत्वाच्च कथं तदुपजीव्यफलज्ञानं तत्संस्का-रार्थं च रेखापूर्वापरयोः स्वदेशे स्पष्टत्वं च कथं ज्ञेयमत उपजातिकाभ्यामाह प्राग्भूविभाग इति । गणितोत्थकालात् देशान्तरयोजनफलसंस्कारं विना वक्ष्यमाणप्रक्रियानीतस्पर्शमध्यमोक्षकालीनभूपृष्ठरात्रिगतघटिकामितेश्चन्द्र-स्य ग्रहणं स्पर्शमध्यमोक्षरूपं यथायोग्यमुत्तरकाले स्यात् । दृष्टं चेत् स्यात् तदा स्वदेशो रेखातः पूर्वभूमिप्रदेशेऽस्तीति ज्ञेयम् । इत्यसंश-यम् । आदौ पूर्वकाले चेद्दृष्टं तदा स्वदेशः पश्चिमप्रदेशे । ननु रेखा-पूर्वापरयोरवस्थितिज्ञानेऽपि योजनज्ञानाभावात् तत्फलज्ञानं न स्यादत आह विवर इति । तयोर्गणितागतभूपृष्ठरात्रिस्पर्शादिघटिकास्वपूर्णा-स्तगणितप्रत्यक्षस्पर्शादिघटिकयोरित्यर्थः । अन्तरे मध्ये या यत्संख्याकाः । ता घट्यो देशान्तरघटिकाः प्रत्येकं समा भवन्ति । ननु तथाऽप्युपजीव्या-ज्ञानमत आह तद्घ्नमिति । कुवृत्तं भूपरिधियोजनमानं पूर्वानीतं स्पष्टम् । तद्घ्नं देशान्तरघटीभिर्गुणितं षष्टिभक्तं फलं स्वरेखास्वदेशयोर्मध्यस्थानि योजनानि भवन्ति । अथ लाघवाद् देशान्तरफलस्य तद्व्यतिरेकेणैव सिद्धत्वाद्योजनैरपि किं प्रयोजनमित्याह घटीत्यादि स्पष्टम् । ननु योऽ-

नानीतफलस्य ग्रहे उक्तरीत्या संस्कारस्योचितत्वाद्देशान्तरघटीसाधित-फलं कथं ग्रहे संस्कार्यम् । प्रकारभेदेन भिन्नत्वादत आह स्वर्णमित्यादि । चो वाऽर्थे । उक्तवद्योजनानीतफलसंस्काररीत्या । एवकारस्तदन्यरीति-व्यवच्छेदार्थः । उभयप्रकारेण फलमानस्य तुल्यत्वादभेद इति भावः ।

अत्रोपपत्तिः । देशान्तरसंस्कारं विना चरसंस्कारेण ग्रहस्य वक्ष्य-माणयुक्त्या स्वरेखादेशे सिद्धत्वेन तत्साधितस्पर्शादिघटिका रेखादेशे भवन्ति । प्रत्यक्षस्पर्शादिकाले स्वार्कास्तकालाद्घट्यादियन्त्रेण ज्ञातघ-टिकाः स्वदेशे प्रत्यक्षसिद्धाः । चन्द्रस्पर्शादिग्रहणस्य सर्वदेशे एककालीन-त्वाद्रेखातः पूर्वदेशे प्रथममुदयास्तयोः प्रतिपादनात् । स्पर्शादिकाले गणि-तस्वरेखादेशघटिकाभ्यः स्वदेशघटिका अधिका एव भवन्ति । एवं पश्चि-मदेशे तदुत्तरकाले उदयास्तयोः सिद्धत्वेन गणितागतस्वरेखाघटीभ्यो न्यूनाः स्वदेशघटिका भवन्ति । तद्घट्योरन्तरं प्रत्येकं तदुदयास्तयोरन्त-रघटिका इति देशान्तरघटिकाः सिद्धाः । सूर्यस्पर्शादिरूपग्रहणस्य सर्वदेशे एककालीनत्वाभावादनियमाच्च विधेरिति सूर्योदयद्वयान्तररूपसावनष-ष्टिघटीभिः स्पष्टभूपरिधियोजनानि तदा देशान्तरघटीभिः कानीत्यनुपा-तेन रेखास्वदेशयोरन्तरयोजनानि । एतद्रीत्यैव षष्टिघटीभिरेकदिनीयग-तिभोगस्तदा देशान्तरघटीभिः क इत्यनुपातेन योजनानुपजीव्येन देशान्त-रफलानयनं युक्तम् । अस्य पूर्वानीतफलरूपत्वादभेदेनोक्तवत् संस्कारः । अतः प्राग्भूविभाग इत्यादिश्लोकद्वयमुपपन्नम् ॥ ४-५ ॥

मरीचिः—ननु देशान्तरफलसंस्कारेण ग्रहाणां स्वनिरक्षोदयासन्नकाली-नानां संभवात् तत्कालान्तरघटिका देशान्तरघटिका भवन्तु युक्ताः परन्तु तयोर्या भवन्ति देशान्तरनाडिकास्ता इत्यनेन कथं युक्ता इत्युपप-त्तिज्ञानहीनानां शङ्कापरिहारमुपजातिकया वारप्रवृत्तिनिरूपणव्याजेनाह अर्कोदयादिति । ताभिर्विवरे तयोर्या भवन्तीत्यनेन ज्ञातघटिकाभिः । अर्कोदयात् सूर्यमण्डलकेन्द्रस्वक्षितिजप्राक्प्रदेशसंयोगकालादूर्ध्वमपि-

मकालेऽधः पूर्वकाले । क्रमेण प्राच्यां प्रतीच्यां रेखादेशात् पूर्वपश्चिमविभागस्थितदेशयोर्दिनपप्रवृत्तिर्वारस्यादिर्भवति न तु दिनारम्भरूपस्वसूर्योदये । विशेषान्तरमाह ऊर्ध्वमिति । तथा यथा प्राक्पश्चिमयोर्देशान्तरघटीभिः स्वसूर्योदयाद्वारप्रवृत्तिस्तथेत्यर्थः । उदग्दक्षिणगोलयाते "*स सौम्यगोलो भदलं यदाद्यं याम्योऽपरम्"-इति वक्ष्यमाणमेषादिषड्भतुलादिषड्भरूपोत्तरदक्षिणगोलयोर्याते गते प्राप्ते रवौ सायनादेव गोलप्रवृत्तेः सायनसूर्ये उत्तरदक्षिणगोलयोरित्यर्थः । चरनाडिकाभिर्वक्ष्यमाणचरघटीभिः क्रमेण । स्वसूर्योदयादूर्ध्वमधश्च वारप्रवृत्तिः । तथा च स्वदेशे पूर्वस्थे देशान्तरघटीभिरूर्ध्वं वारप्रवृत्तिरिति सिद्धेऽपि सव्योत्तरगोले चरघटीभिरप्यूर्ध्वमिति चरदेशान्तरघटीयोगघटीभिरूर्ध्वं वारप्रवृत्तिः स्वसूर्योदयावधि वारप्रवृत्तिः सिद्धा । दक्षिणगोले चरघटीभिरध इति तदन्तरेणोर्ध्वाधः शेषवशात् स्वार्कोदयादग्रिमपूर्वकालयोः । एवं स्वदेशे पश्चिमस्थे दक्षिणगोले चरदेशान्तरघटीयोगतुल्येन स्वसूर्योदयात् पूर्वम् । उत्तरगोले तदन्तरेणोर्ध्वाधः शेषवशादग्रिमपूर्वकालयोः स्वसूर्योदयादिति निर्गलितार्थः ।

"लङ्कोदग्याम्यसूत्रात् प्रथममपरतः पूर्वदेशे च पश्चा-
दूर्ध्वस्थाभिर्घटीभिः सवितुरुदयतो वासरेशप्रवृत्तिः ।
ज्ञया सूर्योदयात् प्राक् चरशकलभवैश्चासुभिर्याम्यगोले
पश्चात् तैः सौम्यगोले युतिवियुतिवशाच्चोभयोः स्पष्टकालः" ॥
इति सिद्धान्तशेखरोक्तेश्च ।

एवं च निरक्षदेशे चराभावात् पूर्वार्धेनैव वारप्रवृतिज्ञानाद्देशान्तरघटीनां वक्ष्यमाणयुक्त्या स्वनिरक्षलङ्कादेशयोः सूर्योदयकालान्तरत्वप्रतिपादनात् तद्ग्रहाधिकरणकालान्तरत्वमर्थसिद्धमिति देशान्तरघटीनां तद्रूपत्वमेवेति न क्षतिरिति भावः ।

* ग्रहगणिते त्रिप्रश्नाधिकारे ३१ श्लो० ।

अत्रोपपत्तिः । सृष्ट्यादौ लङ्कासूर्योदयादेव सर्वत्र प्रथमं वारप्रवृत्तेः "लङ्कानगर्यामुदयाच्च"इत्यनेन प्रतिपादनात् तदनुरोधेन प्रतिदिनमपि सर्वत्र लङ्कासूर्योदयकाले वारप्रवृत्तिः ।

तथा च ब्रह्मगुप्तः ।

"जगति तमोभूतेऽस्मिन् सृष्ट्यादौ भास्करादिभिः सृष्टैः ।
यस्माद्दिनप्रवृत्तिर्दिनवारोऽर्कोदयात् तस्मात्"—इति ॥

इति ।

सिद्धान्तशेखरेऽपि ।

"सृष्टेर्मुखे ध्वान्तमये हि विश्वे ग्रहेषु सृष्टेष्विनपूर्वकेषु ।
दिनप्रवृत्तिस्तदधीश्वरस्य वारस्य तस्मादुदयात् प्रवृत्तिः"-इति ॥

नन्वेवम् ।

"केचिद्वारं सवितुरुदयात् प्राहुरन्ये दिनार्धाद्
भानोरर्धास्तमयसमयादूचिरे केचिदेवम् ।
वारस्यादिं यवननृपतिर्दिङ्मुहूर्त्ते निशायां
लाटाचार्यः कथयति पुनश्चार्धरात्रे स्वतन्त्रे" ॥

इत्युक्तेन वारप्रवृत्तेरनेककालप्रतिपादनाल्लङ्कासूर्योदयकाल एव कथमुक्त इति चेन्न । लङ्कासूर्योदयकालं विना मध्याह्नादिषु वारप्रवृत्तिः । व्यवहारस्य लोकेऽभावादेतद्वचनस्यार्षमूलकत्वाभावेनोपेक्षणीयत्वाल्लङ्कासूर्योदयकाले यद्देशेषु मध्याह्नाद्युक्तकाला भवन्ति तद्देशपरत्वेन तस्योक्तत्वाद्वा । अथ यद्यपि मध्याह्नास्तमनरात्रिदिङ्मुहूर्त्तकालानामार्षमूलकत्वाभावेन भवदभिमतार्थसिद्धिस्तथाऽपि लङ्कार्धरात्रस्य वारप्रवृत्तिरूपस्य समूलत्वाद्विरोधः ।

"वारप्रवृत्तिः प्राग्देशे क्षपार्धेऽऽभ्यधिके भवेत् ।
तद्देशान्तरनाडीभिः पश्चादूने विनिर्दिशेत्* ॥"

* सूर्यसिद्धान्ते मध्यमाधिकारे ६६ श्लो॰ ।

"वारप्रवृत्तिर्लङ्कायां मध्यरात्रे भवेत् ततः ।
ऊर्ध्वमर्वाक् प्राक् प्रतीचीं तद्देशान्तरसंज्ञकैः" ॥
इति सूर्यरोमशवचनयोः प्रसिद्धत्वात् ।
अत एव—
"सूर्याद्यो वासराधीशो लङ्कायामार्धरात्रिकः ॥
सिद्धपूर्यां तु मध्याह्ने यमकोट्यामिनोदये ।
वारप्रवृत्तिः संध्यायां रोमकायामिति स्थितिः" ॥

इति सोमसिद्धान्तोक्तं युक्तम् । लङ्कार्धरात्रकाले सिद्धपुरयमकोटिरोमकदेशेषु मध्याह्नसूर्योदयास्तकालानां क्रमेण संभवादिति चेन्न । एतन्मते लङ्कार्धरात्रे वारप्रवृत्ते"र्लङ्कायामार्धरात्रिकः सावनो द्युगणः"-इत्यनेनाङ्गीकारादहर्गणस्य शुद्धाशुद्धज्ञानार्थं मध्यरात्रादेव वारप्रवृत्तेरुपजीव्यत्वेनाभिधानात् ।

"सप्तभिः क्षयितः शेषः सूर्याद्यो वासरेश्वरः"* ।
इति स्फुटमुक्तेश्च ।
"सावनो द्युगणः सूर्यादित्थं योऽसौ नगैर्हृतः" ।

इति सोमसिद्धान्ताच्च । यथा मूलकारेणाहर्गणानीतग्रहाधिकरणकालो वारप्रवृत्तिकथनेन स्वदेशे उक्तस्तथा सूर्यादिभिरपि स्वाभिमतार्धरात्रिकालः पूर्वापरदेशान्तरपलैरेव साधयित्वा वारप्रवृत्तिसंज्ञ उक्तो न तु वस्तुभूतवारप्रवृत्तिरूपेण । तत्र तदभिज्ञानामपि तथाविधव्यवहाराभावादबहुसंमतत्वाच्च । न च लङ्कासूर्योदयकालोऽप्युक्तरीत्या तथेति वाच्यम् ।

"वारप्रवृत्तिः सर्वेषां लङ्कायां भास्करोदयः" ।
"प्रभाकरस्योद्गमनात् पुरे स्याद्वारप्रवृत्तिर्दशकन्धरस्य" ।

* सूर्यसिद्धान्ते मध्यमाधिकारे ५१ श्लो॰ ।

KARIKAVALI WITH SIDDHANT MUKTAVALI, Text with explanatory notes, a full English Translation of the Text with an original English commentary by Pt. Rasik Lal Bhuttacharya, M. A. ... 9-16

NYAYA SIDDHANT DIP by Pt. Shasadhar with commentary Prabha by Pt. Sheshanant, edited by Mahamahopadhyaya Pandit Vindhyeshwari Prasad Divivedin, Librarian, Government Sanskrit College, Benares. 89-96

JAINENDRA VYAKARAN of Devanandi Muni with the exhaustive commentary of Abbyanandi Muni, edited by Mahamahopadhyaya Pt. Vindhyeshwari Prasad Divivedin, Librarian Sanskrit College, Benares. 327-350

SHAKATAYANA VYAKARAN, with Laghu Vritti, edited by Pt. Munna Lal Jaina, Kavyatirth, Benares. Sutra path 131-162

ADVAITADIPIKA, by Shri Nrisinhasharma with a commentary called Advaitadipika Vivarana by Shri Narayana Sharma, edited by Pt. Gopal Shastri. Vol. II 71-94

BHAGAVADGITA, with the Commentary Githarthadipika, edited by Pandit Dhundraja Shastri, Nayaopadhyaya Benares. 263-286

SIDDHANTSHIROMANI, with Vasanabhashya, Vasnavartika and Marichi, edited with foot-notes by Pandit Muralidhar Jha, Professor, Sanskrit College Benares. ... 305-320

काशीविद्यासुधानिधिः

श्रीगणेशाय नमः ।

श्रीमद्विजयिनीदेवीपाठशालादयोदितः ।
प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्करश्मिः स्फुटयतु काशीविद्यासुधानिधिः
प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

THE PANDIT.

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE

DEVOTED TO

SANSKRIT LITERATURE

NEW SERIES.

Nos. 7-9] July-September [1917.

Vol. XXXIX.

BENARES:

Printed and published by Bhagavati Prasad B. A.
for E. J. Lazarus & Co., at the Medical Hall Press.
Benares Cant.

Price, Rs 9 per annum

person engaged in making the परिशेषानुमान, as the only possible object of desire of a person going to begin to write a book, for he has only this one desire at that time, viz. "May the work I am going to begin, be completed without any obstruction".

समाप्तिरेव फलम्—completion is the only end.

कल्प्यते—अनुमीयते, is inferred.

Safe completion is inferred to be the end of Maṅgala, since it is improper to ascribe an imperceptible end to a cause, when a perceptible one is available, and since safe completion presents itself as the only perceptible end that can be inferred by the process of परिशेषानुमान, *as it is invariably present in the mind of every one, when going to begin a work.*

The परिशेषानुमान argument here, in its logical form, should stand thus:

प्र। मंगलं समाप्तिफलकम्—मंगल (is such as) has completion for its fruit or end.

हे। समाप्तन्याफलकत्वे सति सफलत्वात्—On account of its being fruitful, while having no other fruit or end than completion.

Observe that the हेतु here consists of two elements:

1. The certain knowledge of the agreement of the पक्ष (subject) मङ्गल with the सामान्यसाध्य (general predicate) सफलत्व;

2. The certain knowledge of its disagreement with all particulars constituting the सामान्य except one, viz. समाप्तिफलकत्व. [The process of arriving at this certainty is indicated by सम्भवति…अन्याद्ययत्वात्, and उपस्थितत्वात् in the text. It is the process of Elimination or Trial and Error. We try the class of particular fruits known as

अदृष्टफल like स्वर्ग &c., and reject it on the ground that it is improper to ascribe an imperceptible fruit to a cause, when a दृष्ट, or perceptible one is available; then we try the other दृष्ट fruits, and reject them on the ground that they are not उपस्थित as objects aimed at by the doer of the मङ्गल, when he is going to begin to write a book].

An inference made from such a हेतु is called परिशेषानुमान, lit. the inference of the remnant (defined as: यदितरविशेषाभावकत्वे सति सामान्यवत्त्वरूपो हेतुस्तद्विशेषानुमानं परिशेषानुमानम्).

—o—

इत्थं च यत्र मंगलं न दृश्यते तत्रापि जन्मान्तरीयं तत्कल्प्यते ।

इत्थं च i. e. मंगलस्य समाप्तिफलकत्वे च—मङ्गल being thus proved to be productive of समाप्ति ।

तत्रापि i. e. नास्तिकादीनां ग्रन्थेऽपि—in the books of heretics &c also.

तत् i. e. मंगलं, कल्प्यते i. e. अनुमीयते (कार्यरूपसमाप्त्या इति शेषः)—is infered (from the effect, completion, as the हेतु) ।

Now that Maṅgala has been logically proved to be the cause of completion, we (have got rid of the व्यभिचारसन्देह, *and can justly) infer the existence of Maṅgala done in a previous life (as the cause), in (the cases of) books of heretics &c., where no Maṅgala is to be found, (from their Completion, the effect, as the* हेतु *).*

—:o:—

यत्र च सत्यपि मंगले समाप्तिर्न दृश्यते तत्र बलवत्तरो विघ्नो विघ्नप्राचुर्यं वा बोध्यम् ।

तत्र—कादम्बर्यादौ—in books like Kādambarī.

बलवत्तरो विजातीय:—stronger, of a peculiar kind (i. e. not to be destroyed by the kind of मङ्गल done).

विघ्नप्राचुर्यं—abundance of obstacles.

In books like Kádambarī, where completeness is wanting, although there is Mangala, it is to be understood that the obstacle (to be destroyed or removed) is either greater in strength (i. e. different in kind from the विघ्न that can be destroyed by the kind of Mangala done there), or greater in number.

Observe that difference in degree is taken as difference in quality.

—:o:—

प्रचुरस्यास्यैव बलवत्तरविघ्ननिवारणे कारणत्वम् ।

प्रचुरस्य (qualifying अस्य) has to be taken as प्रचुरादेः, (आदि standing to include बलवत्तर)–sufficiently great in number and strength.

अस्य *i. e* मंगलस्य—of मङ्गल.

बलवत्तरविघ्ननिवारणे is बलवत्तरादिविघ्न etc., आदि standing for प्रचुर.

(For,) the causality in regard to the removal or destruction of very strong or numerous obstacles, rests on the sufficiency (in strength and number) of Mangala.

This is how the author meets the objection against the causality of मङ्गल based on the अन्वयव्यभिचार. The cause, मङ्गल, is present in कादम्बरी, and yet there is no समाप्ति, this is अन्वय व्यभिचार. The author meets the objection by saying that the real cause is not present: for, the मङ्गल, to be an efficient cause, must be sufficient (in strength and number), and an insufficient मङ्गल is as good as no मङ्गल at all; hence there is no व्यभिचार here.

But मङ्गल, it may be urged, has been established as the cause of समाप्ति, so, what matters it if the obstacles are too strong or too many for it, it should still produce

its effect, समाप्ति. In answer to this, he says: विघ्नध्वंसस्तु etc.

—:o:—

विघ्नध्वंसस्तु मंगलस्य द्वारमित्याहुः प्राञ्चः।

द्वारम्—technically व्यापारः, which is defined as the cause of an effect of its own cause (तज्जन्यत्वे सति तज्जन्यजनकत्वं व्यापारत्वम्). For instance in a case like दात्रेण धान्यं लुनाति (he reaps corn with a sickle), the दात्र is the cause of the effect, cutting, through दात्रस्पन्द or movement of the sickle. Now this स्पन्द is an effect of the cause दात्र, and at the same time the cause of cutting which is also an effect of the same दात्र; so this स्पन्द is the व्यापार of the दात्र.

इत्याहुःप्राञ्चः—So say the ancients. According to the ancients, the removal of obstacles is the व्यापार of मङ्गल (through which alone, मङ्गल can produce the effect समाप्ति).

The author mentions the ancients here, to throw the responsibility of the opinion on them, and to indicate that he does not agree with them.

The following are the principal objections against the doctrine of the ancients that मङ्गल is the cause of समाप्ति through विघ्नध्वंस (its व्यापार):—

(1) जन्मान्तरीयमंगलस्य जन्मान्तरीयसमाप्तिफलकत्वे जन्मान्तरीयसमाप्तिमुद्दिश्य जन्मान्तरे मंगलकरणापत्तिः i. e. If मङ्गल done in one life be admitted as productive of completion of an undertaking in another life (as has been done to explain समाप्ति without any मङ्गल in the books of heretics etc.), we shall have to make the absurd supposition of a man doing मङ्गल in this life for the completion of a book in his next life, although he does not know, whether he will write it at all.

(2) एवं मंगलस्य समाप्तिजनकविघ्नध्वंसजनकतया कुलालपित्रादिवदन्यथासिद्धत्वम् । Further, मङ्गल being the cause of विघ्नध्वंस, which is the cause of समाप्ति, it is really the cause of the cause of समाप्ति, and as such, should be set aside as अन्यथासिद्ध (or deemed unnecessary for the production of समाप्ति), for if the cause of a cause were admitted as a cause of the effect, the potter's father (and even his grandfather and great grandfather) would have to be admitted as a cause of the effect घट (the jar), and thus we should have an infinite number of causes, not knowing where to stop. Hence, we admit the causality of that only which immediately precedes the effect, and whose presence is found necessary at its production. Thus विघ्नध्वंस (or want of obstacles) being necessary for the production of समाप्ति, we admit it as a cause of समाप्ति, but मंगल has no immediate connection with its production, and should therefore be rejected as unnecessary.

It may however be urged from the side of the ancients, that a व्यापार, intervening between the व्यापारी (the cause having a व्यापार) and the effect, does not make it (the व्यापारी) अन्यथासिद्ध; for instance, a याग is admitted as cause of स्वर्ग, though स्वर्ग does not immediately follow the याग, but अदृष्ट, the effect of the याग and the immediate cause of the स्वर्ग, intervenes as the व्यापार. Why then should not मङ्गल be admitted in the same way as the cause of समाप्ति, taking the intervening विघ्नध्वंस (the immediate cause) as the व्यापार?

The immediate cause, the modern Naiyāyika would answer, is taken as a व्यापार, only when there is some necessity, which compels us to admit its cause (the व्यापारी) as the cause of its effect. In the case of the

याग, for instance, we are compelled to admit its causality in regard to स्वर्ग, by the authority of the S'ruti, स्वर्गकामो यजेत etc., and therefore we have to take अदृष्ट, which intervenes between it and its effect, as its व्यापार. But in the case of मङ्गल there is no such necessity to compel us to admit its causality in regard to समाप्ति.

The author implies his partiality for the opinion of the moderns, by presenting it after that of the ancients, by way of contrast as नव्यास्तु etc.

—:o:—

नव्यास्तु मंगलस्य विघ्नध्वंस एव फलं समाप्तिस्तु बुद्धिप्रतिभादिकारणकलापात् ।

नव्यास्तु—but the moderns, such as Gangeśopādhyāya, the Chintāmaṇikāra etc. (at the end of the passage, understand the predicate इत्याहुः, of which नव्याः is the subject.)

विघ्नध्वंस एव—removal of obstacles only (and not completion).

फलं *i. e.* प्रवृत्त्युद्देश्यं—the end aimed at.

बुद्धिः is ज्ञानं—knowledge. प्रतिभा—genius, or creative intelligence (imagination). आदि is for including विघ्नसंसर्गाभाव i. e. want of obstacles.

But the modern Naiyāyikas hold that removal of obstacles alone is the end of Mangala, while completion is due to a combination of causes, such as knowledge, genius, and want of obstacles.

न चैवं स्वतःसिद्धविघ्नविरहवता कृतस्य मंगलस्य निष्फलत्वापत्तिरिति वाच्यम् । इष्टापत्तेः ।

एवं—*i. e.* मंगलस्य विघ्नध्वंसं प्रति जनकत्वे—मङ्गल being taken as the cause of विघ्नध्वंस (and not of समाप्ति). स्वतःसिद्धविघ्नविरहवता—*i. e.* कारणाभावप्रयुक्तविघ्नात्यंताभाववता. by one starting with the absolute (*i. e.* uncaused) want of विघ्न, *i. e.* having no विघ्न to require मङ्गल for its destruction.

इष्टापत्तेः—take इष्ट as not undesirable or not disagreeable or injurious.

Thus, Maṅgala being taken as the cause of the removal of obstacles, and not of Completion, it might be objected (from the side of the ancients) that Maṅgala, done by one starting with no obstacles to thwart him, would be fruitless, since it would not cause the destruction of any obstacle there.

But it is useless, we say, to put forth this objection, for it is not at all injurious to our position.

Observe that the above objection has two issues:—

1. ननु निष्फले प्रवृत्तिरेव कथम्—*i. e.* since knowledge of an end to be gained must be present as a cause, to incline a person, not willing to waste time and energy, to the adoption of a means, what is to cause this inclination, where विघ्न and all knowledge of its existence may be totally absent?

2. ननु निर्विघ्नपुरुषानुष्ठितमङ्गलस्थले अन्वयव्यभिचारेण मंगलस्य कारणता बाधिता, तथा च बाधितार्थबोधकत्वाद्वेदस्याप्रामाण्यम्—*i. e.* In the case of मङ्गल done by a person having no obstacles to thwart him in his undertaking, it produces no effect, and hence there is अन्वयव्यभिचार, to disprove the causality of मङ्गल, and thus to render the श्रुति, enjoining it as a means to be adopted for विघ्न ध्वंस, untrustworthy.

The author answers the first objection by विघ्नशंकया etc., and the second by सति विघ्ने etc.

——:o:——

विघ्नशंकया तदाचरणात् तथैव शिष्टाचारात् ।

For it (Mangala) is done on the suspicion of there being obstacles, and it (Mangala) is always used by the Sishtas on similar occasions.

In other words, Suspicion (where certain knowledge is wanting) of the existence of विघ्न, and the knowledge that the शिष्ट's always use it on similar occasions are sufficient to cause the inclination of one going to begin a work, to do मंगल.

——:o:——

न च तस्य निष्फलत्वे तद्बोधकवेदाप्रामाण्यापत्तिरिति वाच्यम् । सति विघ्ने तन्नाशस्यैव वेदबोधितत्वात् ।

तद्बोधक = मङ्गलविघ्नध्वंसयोः कार्यकारणभावबोधकेत्यर्थः *i. e.* indicating the relation of cause and effect between मङ्गल and विघ्नध्वंस.

It should not be objected, that Mangala, proving fruitless in this case, will render the authority of the Sruti untrustworthy as indicating the relation of cause and effect where it is found not to exist, for the Sruti means that Mangala will cause the destruction or removal of obstacles where some obstacles, to be destroyed thereby, exist.

Observe, that the author here avoids the अन्वयव्यभिचारदोष imputed by the objector, by the usual method of shewing the absence of some other cause neccessary for the production of the desired effect, as a good reason

ॐ नमः परमात्मने ।

न्यायसूत्रम् ।

महर्षि-गोतम-प्रणीतम् ।

श्रीविश्वनाथन्यायपञ्चाननविरचित-
वृत्तिसहितम् ।

वपुर्लीलालक्ष्मीजितमदनकोटिर्व्रजवधू-
जनानामानन्दं कमपि कमनीयं विरचयन् ।
स कोऽपि प्रेमाणं प्रथयतु मनोमन्दिरचर-
स्त्रिलोकीलोकानां सजलजलदश्यामलतनुः ॥ १ ॥
संयुक्तां युक्तरूपामभिनवनिहितालक्तकारक्तभासाम्
सन्ध्यापीयूषभानोरतिरुचिरतरां चूर्णयन्तीमभिख्याम् ।
मानव्यामोकनम्रत्रिपुरहरशिरोरम्यभूषाविशेषाम्
भूयो भव्यं विधातुं चरणनखरुचं भावयामो भवान्याः ॥२॥
यदीयतर्ककिरणैरान्तरध्वान्तसन्ततिम् ।
सन्तस्तरन्ति भास्वन्तमक्षपादं नमामि तम् ॥ ३ ॥
अद्वैतं गुरुधर्मयोरिव लसद्धमामण्डलीमण्डनम्
रूपं किञ्चन पौरुषं गिर इव प्रागल्भ्यसम्पादकम् ।
दाने कर्णमिवावतीर्णमपरं दीने दयादक्षिणम्
तातं विश्वविसारिचारुयशसं विद्यानिवासं नुमः ॥ ४ ॥
अलसमतिरपीदं विस्तृतं न्यायशास्त्रम्
विरहितबहुयत्नो लीलया वेत्तु विज्ञः ।
इति विनिहितचेताः कौशलं कर्तुकामो
गुरुचरणरजोऽहं कर्णधारीकरोमि ॥ ५ ॥

विद्यानिवाससूनोः कृतिरेषा विश्वनाथस्य ।
विदुषामतिसूक्ष्मधियाममत्सराणां मुदे भवतु ॥ ६ ॥

प्रयोजनमनभिसन्धाय प्रेक्षावन्तो न प्रवर्तन्ते ऽतः प्रथमं प्रयोजनमभिधानीयं तथा चाहुः ।

सिद्धार्थं सिद्धसम्बन्धं श्रोतुं श्रोता प्रवर्तते ।
शास्त्रादौ तेन वक्तव्यः सम्बन्धः सप्रयोजनः ॥ इति ।

सिद्धो ज्ञातोऽर्थः प्रयोजनम् यस्य तत्तथा एवं सिद्धसम्बन्धमित्यपि अतस्तत्प्रतिपादनाय भगवानक्षपादः प्रथमं सूत्रयति ॥

प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः ॥ १ ॥

अत्र तत्त्वज्ञाननिःश्रेयसयोः शास्त्रतत्त्वज्ञानयोश्च हेतुहेतुमद्भावः प्रमाणादितत्त्वज्ञानयोर्विषयविषयीभावः प्रमाणादिशास्त्रयोः प्रतिपाद्यप्रतिपादकभावः शास्त्रनिःश्रेयसयोश्च प्रयोज्यप्रयोजकभावः सबन्धः । तत्त्वं ज्ञायते ऽनेनेति व्युत्पत्त्या तत्त्वज्ञानं शास्त्रं तथा च शास्त्रनिःश्रेयसयोरपि तत्त्वज्ञानद्वारकहेतुहेतुमद्भाव एव सम्बन्ध इति सम्प्रदायविदः । अत्र च सर्वपदार्थप्रधानो द्वन्द्वः समासः । यद्यपि भेदे द्वन्द्वविधानादत्र च बहूनां पदार्थानामभेदान्न द्वन्द्वसम्भवस्तथापि पदार्थतावच्छेदकभेदादेव द्वन्द्व इति न दोष इत्यन्यत्र विस्तरः । तत्र च निर्देशो यथावचनं विग्रह इति यथाश्रुतभाष्यानुसारिणः प्रमाणानि च प्रमेयं च संशयश्च प्रयोजनं च दृष्टान्तश्च सिद्धान्तश्च अवयवाश्च तर्कश्च निर्णयश्च वादश्च जल्पश्च वितण्डा च हेत्वाभासाश्च छलं च जातयश्च निग्रहस्थानानि चेति विग्रहं वर्णयन्ति । सम्प्रदायविदस्तु भाष्यस्थवचनपदेन क्वचित्सौत्रं क्वचिदार्थं च वचनं गृह्यते तत्र प्रमाणे प्रमेये च सौत्रं वचनं गृह्यते सप्रयोजनत्वात् तच्च वक्ष्यते न तु दृष्टान्तादावेकवचनं सप्रयोजनं तथा च दृष्टान्ते द्विवचनम् अन्वयिव्यतिरेकिभेदेन दृष्टान्तद्वैविध्यस्य वक्ष्यमाणत्वात् संशये सिद्धान्ते छले च बहुवचनं संशये छले च त्रैविध्यस्य सिद्धान्ते चातुर्विध्यस्य वक्ष्यमाणत्वात् अन्यथा जातिनिग्रहस्थानयोर्बहुवचनं तत्रापि व्याहन्येत एकवचनस्यैव लक्षणसूत्रे सत्त्वादिति वदन्ति । नव्यास्तु सर्वत्र प्रथमोपस्थितैकवचनेनैव विग्रहः न ह्यत्र

बहुवचनेनैव प्रमाणादीनां चतुष्टयं परिच्छिद्यते किन्नामाग्रिमाविभागेन न ह्येकद्वित्रिधवखदिरादौ धवश्च खादिरश्च पलाशश्चेति न विगृह्यते अत एव प्रयोजनस्यैकवचनान्तत्वे तद्विभागाकरणेपि सुखदुःखाभावतत्साधनभेदेन तस्य बहुत्वं न विरुध्यत इति प्राहुः । अत्र च निःश्रेयसे सिद्धे पदादिवत्तत्प्राप्तये न प्रयत्नान्तरमपेक्षितमिति प्रतिपादनायाधिगमपदम् । ननु प्रमाणादयः पदार्था इति शब्दात् प्रथमसूत्रादेव वा तत्त्वज्ञानं स्यादिति चेन्न तेषां विशिष्य ज्ञानं हि तत्त्वज्ञानं तच्चोद्देशलक्षणपरीक्षाप्रकाशकाच्छास्त्रादेव । शास्त्रं हि विशिष्टानुपूर्वीका पञ्चाध्यायी अध्यायस्त्वाह्निकसमूहः आह्निकं तु तादृशप्रकरणसमूहः प्रकरणं तु तादृशसूत्रसमूहः सूत्रं तु तादृशवाक्यसमूहः वाक्यं तु तादृशपदसमूह इति वदन्ति । अत्र समूहशब्देनानेकत्वं विवक्षितं तेनाध्यायादेराह्निकाद्विद्वयाद्यात्मकत्वे पि न क्षतिः । अत्र च यद्यपि मोक्षजनकज्ञानविषयत्वेन प्रमेयमेवादौ निरूपयितुमर्हं तथापि प्रमाणस्य सकलपदार्थव्यवस्थापकत्वेन प्राधान्यात् प्रथममुद्देशः ततोऽवसरतो बुभुत्सितप्रमेयस्य ततश्च पदार्थव्यवस्थापनस्य न्यायाधीनतया न्याये निरूपणीये ऽभ्यर्हितयोर्न्यायपूर्वाङ्गयोः संशयप्रयोजनयोस्तत्रापि अभ्यर्हिततया संशयस्य प्रथमम् । न च निर्णीते पि मननविधानान्न संशयस्य न्यायाङ्गत्वमिति वाच्यम् । आहार्यसंशयोपगमात् । यद्यपि प्रयोजनं न न्यायाङ्गमपि तु तज्ज्ञानं तथापि तदेव निरूपणीयं न तु ज्ञाननिरूपणापेक्षेति परप्रत्यायने दृष्टान्तस्य मूलत्वादनन्तरं दृष्टान्तस्य दृष्टान्तमूलको न्यायः सिद्धान्तविषय इत्यतोनन्तरं सिद्धान्तस्य ततश्चावसरतः सिद्धान्ताधीनस्य पञ्चावयवरूपस्य न्यायस्य ततश्चैककार्यतया न्यायसहकारिणस्तर्कस्य ततश्च तर्कजन्यतया निर्णयस्य ततश्च निर्णयानुकूलत्वाद्वादस्य जल्पस्यापि वादकार्यकारित्वादनन्तरं जल्पस्य ततश्च विजयरूपैककार्यानुकूलतया वितण्डायाः कथात्रयस्यापि दूषणसापेक्षतयाऽनन्तरं दूषणेषु निरूपणीयेषु वादे देशनीयत्वरूपोत्कर्षवत्त्वाद्धेतुवदाभासमानत्वाच्चादौ हेत्वाभासानां ततश्च हेत्वाभासोपजीवनेन छलस्य स्वव्याघातकत्वेनात्यन्तासदुत्तरत्वात् ततो जातेः कथावसानत्वेनार्थादनन्तरं निग्रहस्थानानामिति । अत्र च प्रमेयान्तःपातिबुद्धिरूपस्यापि संशयादेर्निरनुयोज्यानुयोगरूपानिग्रहस्थानान्तःपातिनोः छलजात्योश्च प्रकारभेदेन प्रतिपादनं शिष्यबुद्धिवैशद्यार्थमस्तु निग्रहस्थानान्तःपातिनां हेत्वाभासानां पृथगभिधानप्रयोजनं तु जानाति भगवानक्षपाद

एव। भाष्ये तु वादे देशनीयतया हेत्वाभासानां पृथगुपन्यास इत्युक्तम्। अत्र वार्त्तिकं यदि वादे देशनीयत्वात्पृथगभिधानं तदा न्यूनाधिकापसिद्धान्तानां वादे देशनीयत्वात् पृथगभिधानं स्यात् यदि पृथगभिधानाद्वादे देशनीयत्वं तदा संशयादीनामपि वादे देशनीयत्वं स्यात्। तस्मादान्वीक्षिकीत्रयीवार्तादण्डनीतिरूपविद्याप्रस्थानप्रभेदज्ञापनार्थं संशयादेर्हेत्वाभासस्य पृथग्वचनमिति तदप्यसत् निग्रहस्थानान्तर्गतत्वेनैव तन्निरूपणेन प्रस्थानभेदसंभवात्। वयं तु हेत्वाभासानां न निग्रहस्थानत्वं तथा सति सर्वत्र हेत्वाभासत्वात् सर्वस्यैव निगृहीतत्वापत्तेः तस्माद्धेत्वाभासप्रयोगो निग्रहस्थाने तद्विभाजकसूत्रस्थहेत्वाभासपदं च तत्प्रयोगपरं तत्र च प्रयोगस्य न लक्षणमपेक्षणीयमपितु हेत्वाभासानामित्यत उक्तं हेत्वाभासाश्च यथोक्ता इति चरमसूत्रम्। न च हेत्वाभासस्यावच्छेदकप्रवेशादेव न पृथङ्निरूपणापेक्षेति वाच्यम्। तथा सति प्रमाणतर्कसाधनोपालम्भ इति वादाद्यवच्छेदकप्रमाणादेरपि पृथङ्निरूपणानापत्तेरिति युक्तमुत्पश्यामः। अत्र केचित्सूत्रादौ मङ्गलाकरणेन मङ्गलं न प्रामाणिकमित्यत्र सूत्रकृतां तात्पर्यं वर्णयन्ति। तदसत् कृतस्याप्यनिबन्धनसंभवात् विघ्नाभावनिर्णयेनाकरणसंभवात्। वयं तु प्रमाणं प्राणानिलय इति भगवन्नामगणान्तःपातिप्रमाणशब्दस्योच्चारणमेव मङ्गलमिति ब्रूमः। अत्र चोद्देशलक्षणपरीक्षाणां पूर्वपूर्वसापेक्षतया प्रथममुद्देशोऽनन्तरं लक्षणं प्रसङ्गाच्छलपरीक्षेति सोद्देशपदार्थलक्षणच्छलपरीक्षा प्रथमाध्यायार्थः। तत्र च सपरिकरन्यायलक्षणं प्रथमाह्निकार्थः। तत्र च सप्रयोजनाभिधेयप्रतिपादकं प्रथमद्वितीयसूत्राभ्यामेकं प्रकरणम्। ततः प्रमाणलक्षणं ततः प्रमेयलक्षणप्रकरणं ततो न्यायपूर्वाङ्गप्रकरणं ततो न्यायाश्रयसिद्धान्तप्रकरणं ततो न्यायस्वरूपप्रकरणं ततो न्यायोत्तराङ्गप्रकरणमिति प्रथमाह्निके सप्तप्रकरणानि। श्रवणादनु पश्चादीक्षा अन्वीक्षा मननं तन्निर्वाहिका सेयमान्वीक्षिकी न्यायतर्कादिशब्दैरपि व्यवह्रियते तथा च न्यायो मीमांसा धर्मशास्त्राणीति श्रुतिः। पुराणन्यायमीमांसेत्यादिस्मृतिः। मीमांसा न्यायतर्कश्च उपाङ्गः परिकीर्तित इति पुराणम्। त्रैविद्येभ्यस्त्रयीं विद्यां दण्डनीतिं च शाश्वतीम्‌ आन्वीक्षिकीं चात्मविद्यां वार्त्तारम्भांश्च लोकत इति मनुः। तथा यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतर इत्यादिमोक्षधर्मे तत्रोपनिषदं तावत् परिशेषं च पार्थिव मथ्नामि मनसा तात दृष्ट्वा चान्वीक्षिकीं परामित्युपनिषदर्थ आन्वीक्षि-

क्यनुसारी ग्राह्य इत्युक्तमिति । ननु न तत्त्वज्ञानस्य साक्षादेव निःश्रेयसहेतुत्वं तत्त्वज्ञानिनामप्यनवस्थितिदर्शनादतः क्रमाकाङ्क्षायामाह ।

दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः ॥ २ ॥

अत्र वार्त्तिकं निःश्रेयसं तावद् द्विविधं परापरभेदात् तत्रापरं जीवन्मुक्तिलक्षणं तत्त्वज्ञानानन्तरमेव तदप्यवधारितात्मतत्त्वस्य नैरन्तर्याभ्यासापहृतमिथ्याज्ञानस्य प्रारब्धं कर्म उपभुञ्जानस्य परन्तु क्रमेण तत्र क्रमप्रतिपादनायेदं सूत्रमिति । दुःखादीनां मध्ये यदुत्तरोत्तरं तेषामपाये तदनन्तरस्य तत्सन्निहितस्य पूर्वपूर्वस्यापायादपवर्गः । प्रयोजकत्वं प्रयोज्यत्वं वा पञ्चम्यर्थः दण्डाभावाद् घटाभाव इतिवत्स्वरूपसम्बन्धविशेष एव तत् तदयमर्थः तत्त्वज्ञानेन विरोधितयापहृते मिथ्याज्ञाने कारणाभावाच्च निवृत्ते रागद्वेषात्मकदोषे तदभावाच्च प्रवृत्तेर्धर्माधर्मात्मिकाया अनुत्पत्तौ तदभावाच्च जन्मनो विशिष्टशरीरसम्बन्धस्याभावाद्दुःखाभावादपवर्गः । यद्यपि ज्ञानिनोऽपि रागादयस्तिष्ठन्ति तथाप्युत्कटरागाद्यभावे तात्पर्यम् । यद्यपि दोषाणां न धर्मादिजनकत्वं तथापि तत्तद्दोषाणां तत्तद्धर्मादिहेतुत्वाद्दोषापाये धर्माद्यपायः । वस्तुतो विनापीच्छां गङ्गाजलसंयोगादितो धर्मादिसंभवाद्व्यभिचारस्तस्मान्मिथ्याज्ञानवासनैवात्र दोषः तस्याश्च मिथ्याज्ञाननाशात् तत्कालीनतत्त्वज्ञानवासनातो वा नाश इत्यपि वदन्ति । यद्यपि दुःखापायान्नापवर्गः किन्तु स एव सः तथाप्यभेद एव तत्र पञ्चम्यर्थः । अपवर्गपदं वा तद्व्यवहारपरम् अनन्तरपदेन जन्मान्तरमेव परामृश्यत इति तु न व्याख्यानं दुःखपदवैयर्थ्यापत्तेः दुःखानुत्पत्तेश्चरमदुःखध्वंसप्रयोजकत्वं कल्प्यत इत्याशयेनेदमित्यपि कश्चित् । इति न्यायसूत्रवृत्तौ सप्रयोजनाभिधेयप्रकरणम् ।

अथ यथोद्देशं लक्षणस्यापेक्षितत्वात् प्रथमोद्दिष्टं प्रमाणं लक्षयति विभजते च ।

प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि॥ ३ ॥

अत्र तद्वति तत्प्रकारकत्वरूपप्रकर्षविशिष्टज्ञानं प्रशब्दविशिष्टेन माधातुना प्रत्याय्यते तत्करणत्वं प्रमाणत्वं ज्ञानं चात्रानुभवो विवक्षितस्तेन स्मृतिकरणे नातिव्याप्तिः लक्षितानां प्रमाणानां विभागः प्रत्यक्षानुमानोपमानशब्दा इति विभागस्योद्देश एवान्तर्भूतत्वादयं विशेषोद्देशः । प्रत्येकलक्षणं तु वक्ष्यते ॥

इति त्रिसूत्रीवृत्तिः समाप्ता ॥

अथ विभक्तानि यथाक्रमं लक्षयितुमारभते ।

इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षम् ॥ ४ ॥

अत्र प्रतिगतमक्षं प्रत्यक्षमिति योगादिन्द्रियवाचकत्वात् प्रत्यक्षशब्दस्य प्रस्तुतत्वाच्च करणलक्षणस्य प्रमितिलक्षणं यद्यप्यनुचितं तथापि यत इत्यध्याहारेण प्रत्यक्षप्रमाकरणलक्षणे वाच्ये तदेकदेशप्रमास्वरूपे ज्ञाते तत्करणत्वं सुज्ञेयमित्याशयेन वा सङ्गमनीयम् । आत्ममनःसंयोगजन्यसुखादिवारणाय ज्ञानमिति यद्यपि तज्जन्यत्वाज्ज्ञानमात्रेऽतिव्याप्तिरीश्वरप्रत्यक्षे चाव्याप्तिस्तथापि साक्षात्करोमीत्यनुव्यवसायसिद्धसाक्षात्त्वजात्यवच्छिन्ने ज्ञानमित्यन्तस्य तात्पर्यं यद्वा इन्द्रियार्थसन्निकर्षोत्पन्नमिति सावधारणमिन्द्रियार्थसन्निकर्षातिरिक्तादुत्पन्नम् अतिरिक्तं चात्र ज्ञानं तेन ज्ञानाकरणमित्यर्थः । भ्रमवारकमव्यभिचारि भ्रमभिन्नमित्यर्थः । इदं चांशिकभ्रमस्यालक्ष्यत्वे तल्लक्ष्यत्वे तु तद्वति तत्प्रकारत्वं निर्विकल्पस्य लक्ष्यत्वे तदभाववति तदप्रकारकत्वमित्यर्थः । तस्य विभागः अव्यपदेश्यं व्यवसायात्मकमिति निर्विकल्पकं सविकल्पकं चेति द्विविधं प्रत्यक्षमित्यर्थः । सविकल्पकं च संस्कारोद्भवत्वतदनुद्भवत्त्वाभ्यां विभजते ।

संस्कारोद्भवा प्रत्यभिज्ञा ॥ ५ ॥

अनुमानं लक्षयति विभजते च ।

अथ तत्पूर्वकं त्रिविधमनुमानं पूर्ववच्छेषवत्सामान्यतोदृष्टं च ॥ ६ ॥

आनन्तर्यवाचकोऽथशब्दो हेतुहेतुमद्भावसङ्गतिसूचनाय तत्पूर्वकं प्रत्यक्षं प्रत्यक्षविशेषो व्याप्त्यादिविषयकस्तेन व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यत्वं लभ्यते अनुमानमनुमितिः यत इत्यध्याहारेण च करणलक्षणम् अथवा करणमेवेदं तत्रानुमानमिति करणल्युटा अनुमितिकरणमिति समाख्याबलादेव लब्धं तच्च व्याप्तिज्ञानं प्रत्यक्षपूर्वकं सहचारप्रत्यक्षपूर्वकं विभजते त्रिविधमिति पूर्वं कारणं तद्वत् तल्लिङ्गकं यथा मेघोन्नतिविशेषेण वृष्ट्यनुमानं शेषः कार्यं तल्लिङ्गकं शेषवत् यथा नदीवृद्ध्या वृष्ट्यनुमानं सामान्यतोदृष्टं कार्यकारणभिन्नलिङ्गकं यथा पृथिवीत्वेन द्रव्यत्वानुमानम् अथवा

पूर्वमन्वयस्तद्वत्केवलान्वयीत्यर्थः यथा अभिधेयं प्रमेयत्वादित्यादि शेषो व्यतिरेकी यथा वह्निमान् धूमादित्यादि ।

उपमानं लक्षयति ॥

प्रसिद्धसाधर्म्यात् साध्यसाधनमुपमानम् ॥ ७ ॥

प्रसिद्धस्य पूर्वप्रमितस्य गवादेः साधर्म्यात् सादृश्यात् तज्ज्ञानात् साध्यस्य गवयादिपदवाच्यत्वस्य साधनं सिद्धिरुपमानमुपमितिर्यत इत्यध्याहारेण च करणलक्षणम् । अथवा साध्यसाधनमिति करणल्युटा करणलक्षणमेवेदम् अत्र च वैधर्म्योपमितिमपि मन्यन्ते टीकाकृतः यथाऽतिदीर्घग्रीवत्वादिपश्वन्तरवैधर्म्यज्ञानादुष्ट्रे करभपदवाच्यताग्रहः एवमन्योऽप्युपमानस्य विषय इति भाष्यम् तथा च मुद्गपर्णीसदृशी ओषधी विषहन्त्रीत्यतिदेशवाक्यार्थे ज्ञाते मुद्गपर्णीसादृश्यज्ञाने जाते इयमोषधी विषहरणीति उपमित्या विषयीक्रियत इत्यादि ।

शब्दं लक्षयति ।

आप्तोपदेशः शब्दः ॥ ८ ॥

शब्द इति लक्ष्यकथनं तदर्थः प्रमाणशब्द इति आप्तोपदेश इति लक्षणम् आप्तः प्रकृतवाक्यार्थयथार्थज्ञानवान् तस्योपदेश इत्यर्थः । प्रकृतवाक्यार्थयथार्थज्ञानप्रयुक्तः शब्दः इति फलितार्थः अथवा आप्तो यथार्थ उपदेशः शाब्दबोधो यस्माच्छाब्दत्वं च जातिविशेषः तथा च यथार्थशाब्दज्ञानकरणत्वमर्थः अत्र च विशेष्यावृत्त्यप्रकारकत्वतद्वतितत्प्रकारकत्वादिप्रमालक्षणानामेकं लक्षणे परं च लक्ष्यतावच्छेदके निवेशनीयमतो नाभेदः ।

विभजते ॥

स द्विविधो दृष्टादृष्टार्थत्वात् ॥ ९ ॥

शब्दपूर्वक उपनीतभानादिस प्रमाणशब्दः शब्दतदुपजीविप्रमाणातिरिक्तप्रमाणगम्यार्थको दृष्टार्थकः शब्दतदुपजीविप्रमाणमात्रगम्यार्थकोऽदृष्टार्थकः तथा च दृष्टार्थकत्वादृष्टार्थकत्वभेदात्प्रमाणशब्दस्य द्वैविध्यमित्यर्थः ।

प्रमाणलक्षणप्रकरणं समाप्तम् ॥ २ ॥

प्रमेयं विभजते लक्षयति च ।

आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयम् ॥ १० ॥

अत्र तुशब्दः पुनरर्थे तथा चैतेषां पुनः प्रमेयत्वं न तु प्रमाविषयत्वेन संयोगादीनामपि, प्रमेयशब्दो हि वादादिशब्दवत् परिभाषाविशेषेण द्वादशसु प्रवर्त्तते तत्र च प्रकृष्टं मेयं प्रमेयम् इति योगार्थः प्रकर्षश्च संसारहेतुमिथ्याज्ञानविषयत्वं मोक्षहेतुधीविषयत्वं वा रूढ्या च तावदन्यान्यत्वमर्थः लक्षणमपि तदेव प्रमेयं किमित्याकाङ्क्षायाम् आत्मादयो दर्शिता इत्यतो वचनभेदे ऽपि नानन्वयः वेदाः प्रमाणमित्यादावप्येवम्। अन्यथा आत्मसूत्रे विगतिः स्यात् तथा च वक्ष्यते प्रमेयत्वेनैक्यमिति प्रतिपादनाय अन्यतमाज्ञाने ऽपि नापवर्ग इति प्रतिपादनाय वा प्रमेयमित्येकवचनमित्यन्ये तच्चिन्त्यम्। अत्रापि आत्मा च शरीरं च इन्द्रियाणि चार्थाश्च बुद्धिश्च मनश्च प्रवृत्तिश्च दोषाश्च प्रेत्यभावश्च फलं च दुःखं चापवर्गश्चेति यथावचनं विग्रहं वर्णयन्ति। अत्र प्राधान्यात्कारणरूपप्रमेयषट्कमभिधाय कार्यरूपप्रमेयषट्कमभिहितम् तत्रतत्र पूर्वपूर्वस्य प्राधान्यात् प्रथममुद्देश इति वदन्ति।

तत्र प्रथमोद्दिष्टमात्मानं लक्षयति।

इच्छाद्वेषप्रयत्नसुखदुःखज्ञानान्यात्मनो लिङ्गम् ॥ ११ ॥

अत्र चात्मनः प्रत्यक्षत्वाल्लिङ्गकथनमसङ्गतम्। न च शरीरातिरिक्तिव्युत्पादनार्थं तदिति वाच्यम् अग्रिमपरीक्षावैयर्थ्यापत्तेः। लक्षणाकथनेन न्यूनत्वं चेति चेन्न लिङ्गपदस्य लक्षणार्थत्वात्। न च लिङ्गमित्येकवचनेन मिलितानां लक्षणत्वं प्रतीयते तच्चायुक्तं वैयर्थ्यादिति वाच्यं किं लक्षणमित्याकाङ्क्षायामिच्छादीनामभिधानान्मिलितं लक्षणमिति प्रत्यायकाभावात्। तथा च प्रत्येकमेव लक्षणम् अत्र ज्ञानेच्छाप्रयत्नानामात्ममात्रस्य लक्षणत्वं न तु सुखदुःखद्वेषाणां संसारिणो लक्षणत्वादिति।

क्रमप्राप्तं शरीरं लक्षयति ॥

चेष्टेन्द्रियार्थाश्रयः शरीरम् ॥ १२ ॥

अत्र चेष्टादिमिलिताश्रयत्वं न लक्षणं वैयर्थ्यादपित्वाश्रयपदस्य प्रत्येकमन्वयश्चेष्टाश्रयत्वादिलक्षणत्रये तात्पर्यं चेष्टात्वं च प्रयत्नजन्यतावच्छेदको जातिविशेषः न च शरीरावयवे ऽतिव्याप्तिः अन्त्यावयवित्वेन विशेषणात् न च निष्क्रियविनष्टशरीरे ऽव्याप्तिस्तादृशे मानाभावात् अत एवाहं इति इन्द्रियाश्रयत्वं च अवच्छेदकताख्यस्वरूपसम्बन्धः

भावत्वं च गन्धानाधारसमयानाधाराभावत्वादि-

न्वयव्यतिरेकौ तदुपजीवनेन यस्य दण्डरूपत्वस्यान्वयव्यतिरेकौ तदवच्छिन्नान्वयव्यतिरेकप्रतियोगिदण्डरूपमनन्यथासिद्धं स्यादिति चेन्न स्वानुपजीव्यन्वयव्यतिरेकप्रतियोग्यनवच्छिन्नान्वयप्रतियोगित्वस्य विवक्षितत्वात् । रूपान्वयव्यतिरेकयोश्च स्वानुपजीव्यन्वयव्यतिरेकप्रतियोगिदण्डावच्छिन्नत्वात् । विषयतन्निष्ठोद्भूतरूपयोश्च नैकेनापरस्यान्यथासिद्धिर्द्वयोरपि स्वोपजीव्यन्वयव्यतिरेकप्रतियोग्यपरावच्छिन्नान्वयव्यतिरेकप्रतियोगित्वात् । एतेन विनिगमनाविरहस्थलं सर्वं संगृहीतं भवति । ननु यागविशेषापूर्वत्वेनापूर्वस्य स्वर्गान्वयव्यतिरेकग्रहाद्यागेनापूर्वान्यथासिद्धिप्रसङ्गः । न च यागो नापूर्वानुपजीव्यन्वयव्यतिरेकः केवलस्य तस्याशुतरविनाशित्वेन तद्व्यतिरेकेपि स्वर्गोपपत्तेः व्यतिरेकनियमभङ्गप्रसङ्गेनापूर्वरूपसमवधानस्यैव पुरस्करणीयत्वादिति वाच्यम् । अपूर्वस्य यागकारणताग्रहोत्तरकल्प्यत्वेन तद्ग्रहकाले तदुपस्थितेरसम्भवादिति चेत् । न प्रथमान्वयव्यतिरेकयोः साक्षात्त्वेन विशेषणादिति वदन्ति । ननु पूर्ववर्त्तित्वं प्रागभावावच्छिन्नसमयवृत्तित्वं प्रागभावश्च प्रतियोगिजनकाभाव इति आत्माश्रयः । यदि च विनाश्यभावः तदा विनाशस्य प्रागभावगर्भतयान्योन्याश्रय इत्यत आह । प्रागभावत्वं च गंधेति । गंधस्यानाधारः समयो महाप्रलयसमयस्तदवृत्तिरभावः प्रागभाव इत्यर्थः । घटादिव्यवच्छेदायाभावपदं । तच्चाभावैकस्वभावाभावपरम्

अन्यथा वैयर्थ्यात् । न च प्रतियोगिस्वरूपे ध्वंसप्रागभावेऽव्याप्तिः । भावभिन्नस्यैव लक्ष्यत्वात् । ननु गन्धानाधारसमयानाधारत्वे प्रागभावस्य न तावत्प्रत्यक्षमागमो वा मानम् अनुमानं सम्भवदपि प्रागभावसिद्ध्युत्तरकालं पक्षसाध्यान्यतरस्य प्रागभावगर्भतावश्यम्भावात् । तथा चानुमानप्रवृत्तौ गन्धानाधारसमयानाधाराभावरूपप्रागभावसिद्धिस्तत्सिद्धौ च गन्धानाधारसमयानाधारत्वसिद्धिस्तस्येत्यन्योन्याश्रयः । अपि च ध्वंसप्रागभावेऽव्याप्तिः । न चालक्ष्यत्वान्निस्तारः । तथा सति कारणलक्षणस्यापि ध्वंसहेतुषु ध्वंसप्रतियोगिकगन्धानाधारसमयानाधाराभावावच्छिन्नसमयवृत्तित्वाभावेनाव्याप्तेः । न च प्रतियोगिरूपं प्रागभावमादाय निर्वाहः प्रागभावलक्षणे अभावपदस्य भावभिन्नार्थकत्वात् । अन्यथा वैयर्थ्यस्योक्तत्वात् । किञ्च गन्धान्तमात्रप्रलये मानाभावेन सकलगन्धध्वंसोत्तरभाविसम्भावितकार्यप्रागभावेऽव्याप्तिसंदेहः । रूपानाधारेत्यादिरीत्यापि निर्वचनसम्भवेनानेकप्रागभावत्वगर्भकरणभेदेन प्रवृत्त्यननुगमापत्तेश्च । कथं चास्य प्रागभावत्वे मीमांसकादेर्भविष्यद्व्यवहारः विद्यमानप्रागभावप्रतियोगित्वस्यैव भविष्यत्पदार्थत्वात् । तस्य च महाप्रलयगर्भस्य तेनानङ्गीकारादिति चेत् । अत्र वदन्ति यथाकाशादिपदैः शब्दाश्रयत्वाद्युपलक्षितः प्रमाणान्तरसिद्धो व्यक्तिविशेषः प्रतिपाद्यते तथेहापि गन्धानाधारत्वेन समयोपाधिविशेषः प्रमाणान्तरसिद्धः प्रतिपाद्यते तथा तत्समयविशेषानधिकरणाभावत्वमपि तस्य

कमूह्यम् । यद्वा सहकारिवैकल्यप्रयुक्तकार्याभाव-
वत्त्वमेव कारणत्वम् । अस्यार्थः इतरव्यतिरेका-
वच्छिन्नकार्यानुत्पादव्याप्यत्वम् अनुत्पादश्च उ-

घटो भविष्यतीत्यादिविलक्षणबुद्धिप्रमाणकस्योपलक्ष-
णीभूयैवानुगमकमात्रं न तु घटो भविष्यतीत्यादिप्रतीतौ
प्रकारः पूर्वोक्तदोषात् । उत्तरसमयासन्नघटाभाव इदानी-
मित्यस्यैव तद्विषयत्वात् । न चोत्तरत्वस्य ध्वंसगर्भतया
पुनरन्योन्याश्रयः । उत्तरत्वेन समयविशेषस्यैवोपलक्षणात् ।
एवं च वस्तुतो विनाश्यभावविद्यमानतैव भविष्यतीति
प्रतीतिविषयः न चान्योन्याश्रयः । समयविशेषे नास्ती-
त्येव प्रतीयमानस्य विनाशित्वेन प्रतीतेः । अत एव
न प्रवृत्त्यननुगमोऽपि शब्दाश्रयत्वादिभिरिवानेकैरप्यनुग-
मकैरुपलक्ष्यस्याभावविशेषस्यैकरूपत्वात्समयविशेषावृ-
त्त्यभावावच्छिन्नसमयत्वज्ञानस्यैवानुगतस्य हेतुत्वात् ।
यद्यपि युगपन्नाशे मानाभावाद् गन्धनाशोत्तरभाविप्राग-
भावेऽव्याप्तिसंदेह इति । तन्न । सकलगन्धनाशो ह्यद्रु-
नाशादेव अन्यथा संयोगविभागयोरन्योन्यनाश्यतया ना-
शकत्वाभिमतान्यतरस्थितौ क्व सर्वमुक्तिः तस्मात्सर्वाद्रू-
घृनाशादेव यावत्कार्यनाशे वाच्ये बीजप्रयोजनयोरभावा-
त्कार्यान्तरानुत्पत्तेर्न प्रागभावावस्थानमिति क्वाव्याप्ति-
रिति सर्वं सुस्थमिति । आदिपदेन विनाश्यभावत्व-
संग्रहः । उक्तदोषोद्दिधीर्षया लक्षणान्तरमपि सिद्धान्त-
यति । यद्वेति । ननु सहकार्यादिविकल्पकवलितत्वान्नेदं
युक्तमत आह अस्यार्थः इतरविरहेति । अवच्छिन्नत्वं
व्याप्यत्वविशेषणं धरणिधामादिसमवधानासमवधा-

नाभ्यां बीजाद्यग्रिमक्षणेऽङ्कुराद्युत्पादानुत्पाददर्शनेनेतरा-
समवधानस्यैव बीजादावनुत्पादव्याप्यत्वावच्छेदकत्वं ।
न त्वेवं शिलाशकलादौ सहकारिसमवहितादपि ततस्त-
दनुत्पादेन शिलाशकलत्वस्यैव तद्व्याप्यतावच्छेदकत्व-
सम्भवात् इति भावः । न च ज्ञानादीनां ज्ञानत्वादि-
नैव घटाद्यनुत्पादव्याप्यतावच्छिद्यते नाव्यभिचारिणे-
तरविरहेणेति तत्र तेषामकारणत्वापत्तिरिति वाच्यम् ।
येन हि सम्बन्धेन यस्य यत्र कार्ये जनकत्वं तत्पुरस्का-
रेण तस्य तत्कार्याऽनुत्पादव्याप्यत्वे इतरविरहाव-
च्छिन्नत्वं विवक्षितम् । ज्ञानादीनां च विषयता-
सम्बन्धेनैव घटादौ जनकत्वं तत्पुरस्कारेण च कपा-
लादौ ज्ञाते सति कदाचित्तत्र घटोत्पादः कदा-
चिन्नेति इतरविरहस्यावच्छेदकताव्ययसम्भावात् । न च
कार्योत्पादस्थलीयज्ञानसाधारणत्वान्नेतरविरहोऽवच्छे-
दक इति वाच्यम् । विरहपदेनासमवधानस्यैवोक्तत्वात् ।
ननु शिलाशकलादेरपि इतरासमवहितशिलाशकलत्वा-
दिनैवाङ्कुराद्यनुत्पादव्याप्यतावच्छिद्यते न शिलाशक-
लत्वादिनैवेतरसमवहिते तस्मिन्नङ्कुराद्युत्पादादिति
तस्यापि तत्र हेतुतापत्तिरिति चेत् । न स्वासमवधाना-
वच्छिन्नकार्यानुत्पादव्याप्यताकस्यैवेतरपदेन विवक्षित-
त्वात् । बीजादेश्च कार्यानुत्पादव्याप्यतायाः शिलाश-
कलासमवधानानवच्छेद्यत्वेनेतरपदार्थत्वाभावात् । त-
समवधानेपि दृष्टान्वयव्यतिरेकधरण्याद्यसमवधानेऽङ्कु-
रानुत्पादात्। तत्समवधाने चैतदसमवहितादपि बीजादे-

त्पत्त्यवच्छिन्नप्रतियोगिकोत्यन्ताभावः । स चोत्पत्तिप्रत्यासत्तिविरोधिप्रत्यासत्तिकोऽतो नातिप्र-

रङ्कुरोत्पादेन धरण्याद्यसमवधानस्यैवावच्छेदकत्वसंभवे वैयर्थ्येन शिलाशकलासमवधानस्यानवच्छेदकत्वादिति । न च वृत्तिकारणेऽव्याप्तिस्तेषां कालतो देशतो वा कार्यानुत्पादव्याप्यत्वासम्भवात् । सम्भवे वा तदसमवधानाप्रसिद्ध्या स्वासमवधानावच्छिन्नकार्यानुत्पादव्याप्यताकासमवधानावच्छिन्नत्वस्य कार्यानुत्पादव्याप्यत्वेसंभवादिति चेन्न । अव्यापककारणताया एवात्र लक्ष्यत्वादिति वदन्ति । न च कार्योत्पाददशायामनुत्पादव्याप्यत्वाभावादव्याप्तिः । तज्जातीयत्वस्यैव लक्षणत्वात् । ननु दण्डादेर्नतरासमवधानावच्छेद्यकार्यानुत्पादव्याप्यत्वं घटोत्पत्त्यनन्तरमितरासमवहितदंडत्वेप्यनुत्पादपदाभिधेयप्रागभावाभावात् इत्यव्याप्तिरित्याशंक्याहानुत्पादश्चेति । तथाचोत्तरकालेपि उत्पत्त्यवच्छिन्नकार्यात्यन्ताभावसत्त्वाद्व्याप्यत्वमक्षतमिति भावः । नन्वेवं सुतरामव्याप्तिः । अत्यन्ताभावस्य नित्यत्वेन प्रागिव कार्योत्पत्तिकालेपि तत्र सत्त्वावश्यम्भावाद्यत्र दण्डस्तत्र घटानुत्पाद इत्येव व्याप्तेः सम्भवेनेतरेतरासमवधानस्य तदनवच्छेदकत्वादत आह । स चेति । उत्पत्तिकालेन समं कार्यस्य या प्रत्यासत्तिः स्वरूपसम्बन्धविशेषरूपा तदधिकरणभिन्नाधिकरणप्रत्यासत्तिक इत्यर्थः । नित्यत्वेन सदातनत्वेपि कार्योत्पत्तिदेशे सदा सत्त्वे मानाभावात् । उत्पत्तिस्थले दण्डमात्रस्योत्पत्त्यवच्छिन्नकार्यात्य-

सङ्गः । एवं सहकारिविरहप्रयुक्तत्वादिदूषण(४)-गणानवकाशः ॥

इति कारणतावादः ।

न्ताभावव्याप्यताभङ्गादितरासमवधानस्य तदवच्छेदकतावश्यंभावान्नातिव्याप्तिरिति भावः । अतिप्रसङ्गः कार्योत्पत्तिकालेऽनुत्पादप्रसंग इत्यर्थः ॥

इति सकलसामन्तचक्रचूडामणिमरीचिमञ्जरीपरागपिञ्जरितचरणकमलप्रतापराजोद्योजितशेषानन्तविरचितसिद्धान्तप्रदीपप्रभायां कारणताप्रकरणम् ॥

---

(४) प्रयुक्तत्वादिप्रयुक्तदूषणेति पा० १ पु० ।

गवादिपदानां जातावेव शक्तिरिति तौतातिताः । व्यक्त्याकृतिषु जातिषु शक्तिरिति गौतममततत्त्ववेदिनः । तत्रैवं विप्रतिपत्तिजः संशयः । गवादिपदनिरूपितशक्यत्वं जातिमात्रवृत्ति न वा । जातिवाचकपदशक्यत्वं जातिव्यतिरि-

अभिधाविचारानुकूलसंशयजननीं विप्रतिपत्तिमाह । गवादिपदानामिति । गवादिपदं जातिमात्रजातिवाचकं न वेति न संशयः कोट्यप्रसिद्धेरिति अन्यथा संशयमाह । गवादिपदेति । विधिनिषेधकोटिप्रसिद्धिर्जातित्वघटादौ आदिपदेन समूहालम्बनप्रत्येकधर्म्मिताभिधानेनैव पुरुषाश्रयपर्यवसानप्रसङ्ग इत्यनुगतधर्मिकं संशयान्तरमाह । जातिवाचकपदशक्यत्वमिति । पूर्वव्यत्ययेन विधिनिषेधकोटिप्रसिद्धिः । ननु जातिवाचकत्वं किं यथाश्रुतमेवोत जातिप्रवृत्तिनिमित्तकत्वं । नाद्यः । जात्यादिपदशक्यत्वांशे सिद्धसाधनात् । तस्या नित्यानेकसमवेतत्वादितत्प्रवृत्तिनिमित्तवृत्तित्वात् । न द्वितीयः । जातिमात्रशक्तिपक्षे व्यक्तेरशक्यतया शक्यवृत्तित्वगर्भस्य प्रवृत्तिनिमित्तत्वस्य गवादिपदशक्यजातावभावेन जातिप्रवृत्तिनिमित्तकत्वासिद्धेः । किञ्च वृत्तिर्न समवायः अनभ्युपगमात् । न सम्बन्धमात्रं कालादिसम्बन्धितया बाधसिद्धसाधनप्रसङ्गादिति चेत् । न उभयवादिसम्प्रतिपन्नजातिवाचकपदशक्तिर्जात्यतिरिक्तविषया न वेति विवक्षितत्वात् । जात्यादिपदानां गवादिपदतुल्यन्यायतया नित्यानेकसमवेतत्वादिवा-

क्तवृत्ति न वा । अभिधेयत्वं नित्यमात्रवृत्ति न वेत्यपि कश्चित् । तत्र तौतातितानामयमाशयः । वाक्यार्थप्रतिपत्त्यनुकूलपदार्थस्मरणजनकपदपदार्थयोस्सम्बन्धस्तावत् वाचकत्वं नाम सकलवादिप्रसिद्धं। तत्सङ्केतो वा पदार्थान्तरं वेत्यन्यदेतत् ॥ स च सम्बन्धः कुत्र कल्प्यतां जातिमात्रे वा जातिव्यक्त्योर्वेति विमर्शेऽपि जायमाने जाता-

चकताया एव पराभ्युपेतत्वात् । अभिधेयत्वमिति । जातिमात्रशक्यतापक्षे विशेष्यान्तरानभिधानेन जातेरप्रकारतया गवादिपदाभिधाया नित्यप्रकारमात्रवृत्तित्वे बाधक इत्यरुचिं कश्चिदित्यनेनासूचयत् । शक्त्यसिद्ध्या तद्धर्मिकवक्ष्यमाणविमर्शानुपपत्तिं परिहरिष्यन्नुपोद्घातेन प्रमाणमाह । वक्यार्थप्रतिपत्तीति। शक्त्याकारेण सकलवाद्यप्रसिद्धेराह । वाचकत्वं नामेति । सिध्यतूद्बोधकान्तराहेतुकस्मरणहेतुत्वात्सम्बन्धमात्रं हस्तिहस्तिपकादिवद्वाचकत्वं तु कुत इत्यत आह । वाक्यार्थेत्यादि । घटपदाश्रयतया स्मृतस्य गगनादेर्घटमानयेत्यादौ कर्मत्वान्वयप्रतिपत्त्यदर्शनान्न सम्बन्धमात्रं किन्तु सम्बन्धविशेषः कल्प्यते सैव शक्तिरिति नासिद्धिरिति भावः । एवमपि सा यदि पदार्थान्तरं तदा न्यायनयेऽसिद्धिः अथेश्वरेच्छा ततो भट्टनय इत्यत आह । तत्संकेत इति । संकेतत्वादेधर्मितानवच्छेदकत्वात्तेन रूपेण तद्व्यवस्थापनमिदानीमनुपयुक्तमिति भावः । आकृतेरसार्वत्रिकत्वेनाह । जातिव्यक्त्योर्वेति । विशि-

वेव तत्कल्पना ज्यायसी नागृहीतविशेषणान्यायेन न तु व्यक्तौ अनन्ताभिर्व्यक्तिभिः(१) सह संबन्धग्रहणस्याशक्यत्वात् । सामान्यलक्षणायाः प्रत्यासत्तेः प्रमाणाभावेनानङ्गीकारात् । तथात्वे वा

ष्टयोरिति शेषः । अत एवाह नागृहीतेति । न खलु केवला व्यक्तिः शक्या गोपदाद्व्यक्तिमात्रबुद्धिप्रसङ्गात् । नापि जात्युपलक्षिता जात्यन्योपलक्ष्यतावच्छेदकरूपेण व्यक्तेरप्रतीतेः । किन्तु विशिष्टा । तथाच संकेतकग्राहकप्रमाणापेक्षितविशिष्टोपस्थितेर्विशेषणीभूतजातिज्ञानपूर्वकतया प्रथमोपस्थिता लाघवेन सैव शक्येत्यर्थः । न तु व्यक्ताविति । केवलायां विशिष्टायां वेति शेषः । सा हि न तावदेका काचिच्छक्या गां दद्यादित्यादावनध्यवसायप्रसङ्गात् । सर्वापि न सर्वत्वेन तत्रैवानुष्ठानप्रसङ्गात् । अपि तु प्रत्येकरूपेणेति वाच्यं तत्राह । अनन्ताभिरिति । केवलाभिरिव विशेष्यभेदादनन्ताभिर्विशिष्टाभिरपि व्यक्तिभिर्दूशकालविप्रकृष्टाभिः प्रत्येकसर्वज्ञेन दुर्विज्ञानतयानुपस्थिताभिः संकेतस्य ग्रहीतुमशक्यत्वादिति भावः । ननु न ब्रूमः प्रत्येकमुपस्थितास्विति येनानंत्यबाधकमाशंक्येत किन्तु सामान्येनोपस्थितासु प्रत्येकं सङ्केतग्रह इति तत्राह । सामान्यलक्षणेति । शक्त्यनुभवपदार्थस्मरणवाक्यार्थानुभवानां ज्ञानेच्छाकृतीनां वा व्याप्तिपक्षधर्मताज्ञानयोर्वा समानप्रकारकत्वेन कार्यकारणभावाभ्युपगमेनैवा-

(१) व्यक्तिभिरिति पा० १ पु० नास्ति ।

व्यक्तेरन्यथा लाभसम्भवेन तत्र शक्तिकल्पनस्य गौरवपराहतत्वात् । तदिदमुक्तम् ।

विशेष्यं नाभिधा गच्छेत् क्षीणशक्तिर्विशेषणे इति । व्यक्तेः कथं लाभ इति चेत् । न आक्षेपात् । ननु व्यक्तिं विना किमनुपपन्नं । न ताव-

तिप्रसङ्गवारणात् न समानविषयकत्वनिर्वाहकतया तत्सिद्धिरिति भावः । अनुकूलतर्कानवतारदशायां धूमो वन्हिव्यभिचारी नवेति संशय एव तत्र प्रमाणमित्यत आह । तथात्वे वेति । अन्यथेति । आक्षेपादिनेत्यर्थः । ननूपायस्यानुपायतादोषः न नूपायान्तरसत्त्वमित्यत आह । गौरवेति । अन्यथा लक्षणोच्छेदापत्तेरिति भावः । अत्रैवाभियुक्तसंमतिमाह । तदिदमिति । विशेषणे जातौ क्षीणशक्तिस्तामभिधाय पर्यवसितेत्यर्थः । अन्यथा लाभसम्भवेनेत्युक्तमाक्षिपति । व्यक्तेः कथं लाभ इति । पृष्टं सत्त्वोत्तरमाहाक्षेपादिति । आक्षेप्ता स्वाशयमुद्घाटयति । ननु व्यक्तिं विनेति । न ह्यव्याप्यस्याव्यापकेन विनाऽनुपपत्तिः । न वानयोर्व्याप्तिर्दशतो गव्येव कालतश्च महाप्रलये व्यभिचारादित्याह । व्यक्तिं विनापीति । जातेर्नित्यत्वादिति भावः ॥ न च तज्ज्ञप्तेरनुपपत्तिः । आक्षेपवादिना केवलजातिप्रतीतेरवश्यवाच्यत्वादन्यथाक्षेपानुपपत्तेरिति । या जातिः सा व्यक्तिवृत्तिरित्यत्र न व्यभिचारः । प्रलयकालीनाया

ज्जातिः । व्यक्तिं विना जातिस्वरूपावस्थाना-
दिति । मैवं । जातेर्हि(१) व्यक्तिवृत्तिता नियतेति
कथमाक्षेपानुपपत्तिः । न च जातिव्यक्त्योर्युग-
पत्प्रतीतिदर्शनादाक्षेप्याक्षेपकभावानुपपत्तिरिति
वाच्यम् । गौरवप्रसङ्गबाधकबलेन युगपत्प्रती-
तेर्भ्रान्तत्वकल्पनस्योचितत्वात् । न च जातिभा-
नसामग्री व्यक्तिभानसामग्री(२)नियतेति तदैव

अपि जातेः प्राग्व्यक्तिवृत्तित्वादित्याक्षेपोपपत्तिमाह जातेर्हीति । अन्येतु महाप्रलयानङ्गीकाराभिप्रायमेतत् । नचैवमपि चैत्रत्वादिजातौ कालतो व्यभिचारः भाट्टैस्तज्जात्यनङ्गीकारादित्याहुः । ननु जातिव्यक्त्योर्युगपत्प्रतीयमानत्वात्कथमाक्षेप इत्यत आह । न चेति । गौरवेति । व्यक्तिशक्तिकल्पनालक्षणगौरवप्रसङ्गेनेत्यर्थः । ननु यत्र पदाज्जातिभानसामग्री तया तत्र तद्व्यक्तिभानसामग्रीति जातिसाक्षात्कारे नियमावधारणात् एकदा ज्ञानद्वयानुपपत्तेश्च समूहालम्बनन्यायेनोभयज्ञानमेकमेवोत्पद्यत इति क्व क्रमकल्पना भेदगर्भेत्याशंक्य निराचष्टे । जातिभानेति । योग्यव्यक्तिगर्भजातीन्द्रियसन्निकर्षजन्ये जातिसाक्षात्कारे व्यक्तिसाक्षात्कारसामग्रीनियमस्यार्थसमाजसिद्धावपि लाघवनियंत्रितशक्त्युद्बोधितसंस्कारपरा-

(१) जातिर्हीति पा० १ पु० ।

(२) ज्ञानसामग्रीति उभयत्र पा० २ पु० ।

व्यक्तेर्भान(१)नियमात्कथमाक्षेप इति वाच्यं। जातिसाक्षात्कारे ह्ययं नियमो न तु तत्स्मरणेपि । ननु जातिमात्रज्ञानाद्व्यक्तिमात्रमाक्षेप्तव्यं तथाच न व्यक्तिविशेषलाभः(२) । जातिविशेषप्रतिसन्धानाद्व्यक्तिविशेषाक्षेप इति यद्यभिमतं तदा जातौ विशेषो व्यक्तिरेव। तस्याश्च भानं जातिज्ञाने वृत्तमेवेति किं केनाक्षेप्तव्यमिति । मैवं । किंचिद्धि वस्तु स्वत एव विलक्षणमिति न्यायेन जातेः स्वत एव विलक्षणत्वात् । अन्यथाऽन्योन्याश्र-

धीनायां स्मृतौ नायं नियम इत्याह । जातिसाक्षात्कारे हीति । आक्षेपकं जातिमात्रज्ञानं जातिविशेषज्ञानं वेति विकल्प्याद्ये दोषमाह । तथाचेति । द्वितीयमनुवदति जातिविशेषेति । दूषयति । तदेति । ममेतराव्यावृत्तित्वेति । गोवृत्तित्वादेरपि व्यक्तिगर्भतया विवक्षितविवेके व्यक्तिरेव व्यावर्तिकेत्याक्षेपज्ञानकाले आक्षेप्यं ज्ञातमेवेत्याक्षेपानुपपत्तिरित्यर्थः। अंत्यविशेषेषु भवद्भिरिव जातावस्माभिस्तुल्यन्यायतया स्वतोव्यावृत्तत्वाङ्गीकाराज्ञ व्यक्त्यपेक्षेति समाधत्ते मैवमित्यादिना । तदेव विपक्षबाधकेन द्रढयति । अन्यथेति । व्यावर्त्तकान्तरापेक्षायां परस्परव्यावर्त्तितयोर्व्यावर्त्तकत्वेऽन्योन्याश्रयाद्व्यावर्तकपरम्परानुसरणेऽनवस्थेति

(१) ज्ञानेति पा० २ पु०।

(२) कथमित्यधिकः पा० २ पु०।

यावस्थानप्रसङ्गात्(१)। व्यक्तेः प्राधान्यानुभवाल्लक्षणा व्यक्तौ आक्षेपे तु उपसर्जनतां स्यादिति भाट्टैकदेशिनः । तदाहुः ।

जातावस्तित्वनास्तित्वे न हि कश्चिद्विवक्षति ।
नित्यत्वाल्लक्षणीयायास्ते हि व्यक्तेर्विशेषणे इति ॥

भावः । मंडनमत माह । व्यक्तेरिति । गौर्गच्छति गामानयेत्यादौ न हि व्यक्तिगतं गोत्वमित्यनुभवोऽपि तु गोत्ववती व्यक्तिरित्याक्षेपे तु गोत्वं व्यक्त्याश्रितमिति धीः स्यान्न तु प्रवर्त्तकशब्दोत्पिपादयिषता यथा च पूर्वं तथा च गवि प्रवृत्त्यनुपपत्तिः । जात्युपसर्जनतया प्रतीयमानाया व्यक्तेरन्यान्वये निराकांक्षत्वाद्राजपुरुषमानयेत्यत्र राज्ञ इव कर्मत्वाद्यन्वयानुपपत्तिश्चेति भावः। अत्रैवाभियुक्तसम्मतिमाह । तदाहुरिति । अविवक्षायां हेतुर्नित्यत्वादिति । व्यभिचाराभावाद्बाधाच्चेति भावः। व्यक्तेस्ते हीति । ते नित्यत्वानित्यत्वे व्यक्तेर्विशेषणे अनित्यत्वादिति भावः। गामानयेत्यादिस्थले विभक्त्युपनीतकर्मत्वादेर्व्यक्त्यन्वयानुपपत्त्या कल्पितां जरत्प्राभाकराणां अर्द्धजरतीमुपन्यस्यति । विशिष्टेति ॥ शक्तिर्हि शक्यकार्यापेक्षा कार्यं चात्र विशिष्टज्ञानमेकमेवेत्येकैव सा तस्याश्च विशिष्टगोचरता विशिष्टज्ञानविषयतयैवेति भावः । सिद्धान्तप्रवादविरोधं परिहरति ।

(१) अनवस्थाप्रसङ्गादिति पा० १ पु० ।

विशिष्टगोचरा एकैव शक्तिः किन्तु जातिनिष्ठतया ज्ञातोपयुज्यते। व्यक्तौ तु सा स्वरूपसती। समानसंवित्संवेद्यतया च व्यक्तेरपि भानमिति गुरुमततत्त्ववेदिनः। व्यक्तेरन्वयप्रकारतया भानमिति गुरुमतैकदेशिनः। अनुमानं

किंत्विति। स्वरूपसतीति। अन्यथा गौरवादिति भावः। कथं तर्हि व्यक्तेर्लाभ इत्यत आह। समानेति। अयमाशयः। यद्विषयत्वेन शक्तिज्ञानं पदसहकारि तदेव तत्पदशक्यमन्यथा पदजन्यज्ञानविषयत्वादन्वयस्यापि शक्यतापत्तेर्लक्षणोच्छेदापत्तेश्च। न चेह जातिशक्तत्वेन पदज्ञाने सति व्यक्तिशक्तिज्ञानविलम्बाद्व्यक्तिज्ञानविलम्बो येन तद्विषयत्वेनापि शक्तिज्ञानं सहकारि कल्प्येत। न च व्यक्तिशक्तिज्ञानेपीतरशक्तिज्ञानविलम्बेन जातिज्ञानविलम्बादर्शनादविनिगमः जातिज्ञापकसामग्र्या व्यक्तिबोधाविनाभूतत्वेनैकत एवोभयज्ञानोपपत्तेर्लाघवाद्व्यक्तिज्ञापकसामग्र्या जातिबोधकत्वं क्लृप्तमिति तदर्थं सामग्रीद्वयकल्पनागौरवात्। एवं च जातिज्ञापकतया सहकारिकल्पितं जातिशक्तिज्ञानं यदि व्यक्तिं न बोधयेत्समानसंवित्संवेद्यां जातिमपि न बोधयेदिति वृथैव तत्कल्पना स्यादतो धर्मिग्राहकमानसिद्धं जातिशक्तिज्ञानस्य व्यक्तिबोधकत्वमिति गुर्वेकदेशिमतमाह। व्यक्तेरिति। केवलजातेरानयनाद्यन्वयायोग्य-

त्वत्र गोव्यक्त्याकृती न गोशब्दवाच्ये गोत्व-भिन्नत्वात् पटवदिति ॥

अत्रोच्यते ॥ गामानयेति वाक्यश्रवणा-नन्तरं प्रयोज्यवृद्धस्य गवानयने प्रवृत्तिर्दृश्यते तावत् । सा च गवानयनज्ञानसाध्या । तच्च

तया तद्योग्यताघटकत्वेन घटपदे छिद्रेतरत्ववद्व्यक्तिः प्रतीयत इत्यर्थः। पूर्वोक्तलाघवादितर्कोपकार्यमनुमान-माह । गोव्यक्त्याकृतीति । महिष्यादिव्यक्त्याकृत्यंशे सिद्धसाधनभयादाद्यङ्गोपदं । व्यक्त्याकृतिपदवाच्यतया बाधकवारणाय द्वितीयम् । गोत्वभिन्नत्वादीति । गोपदप्रवृत्तिनिमित्तभिन्नत्वादित्यर्थः ॥ पशुविशेषवृत्ति-जातिविशेषान्यत्वे तु जलत्वादौ व्यभिचारप्रसङ्गादिति द्रष्टव्यम् ।

सिद्धान्ताभिधानं प्रतिजानीते । अत्रोच्यत इति । प्रवृत्तिपरवाक्यश्रवणानन्तरोपजायमानव्यक्तिप्रवृत्त्यनुरो-ध्यतद्बोधाधीनकल्पना शक्तिः समानविषयतालाघवेन व्यक्तौ कल्प्यते जातिधीस्त्वन्यथैव वन्ह्यनुमापकसा-मग्रीमहिम्नैव वन्हिप्रतीतिरिति युक्तं तत्र कः प्रसंगो जातौ शक्तिकल्पनस्य अथान्यथाभवतो जाति-ज्ञानस्य शाब्दज्ञानस्य निर्विकल्पकतापत्त्या जातौ शक्तिकल्पनमस्तु तर्हि तत्रापि न तु प्रथमप्रतीत-व्यक्तिशक्तित्याग इत्याशयेनाह । गामानयेत्या-

ज्ञानं गामानयेति वाक्यजन्यं वाक्यजे ज्ञाने पदोपस्थापित एवाऽर्थोऽन्वयप्रतियोगितया भासत इति व्यवस्थापितं योगरूढस्थले । तथाच गोपदात् गोव्यक्तेरनुपस्थितौ कथमन्वयप्रत्ययः । आक्षेपोपस्थितस्य वाक्यज(१)प्रत्ययान्वयप्रतिगित्वाभावात् । अन्यथा घटमानयेति वाक्यं रूप-

दिना । पदोपस्थापित इति । वृत्त्येति शेषः । अन्यथा घटपदोपस्थापिते कुलालादौ व्यभिचारात् । व्यवस्थापितमिति । आशंसायां भूतवच्चेति क्तः । वस्तुतो रूढिवादस्योर्ध्वलेखनमविदितग्रन्थकृदभिप्रेतप्रकरणानुपूर्वीकलेखकप्रमाद एव कथमन्यथात्रैवाग्रे वक्ष्यति न हि तात्पर्यज्ञानं वाक्यार्थज्ञानजनकमिति प्रतिपादितमधस्तादिति । सिद्धां व्यक्तौ शक्तिमुपसंहरति । तथाचेति गोपदादिति । वृत्त्येति शेषः । अन्यलभ्यत्वान्न व्यक्तिः शक्या गच्छ गच्छसि चेत्कान्त इत्यादावगमनवदित्यत आह । आक्षेपेति । उपलक्षणं चैतद्वृत्तीतरस्य गच्छ गच्छसि चेदित्यादावप्यस्ति गमननिषेधयोरन्वयप्रत्ययो न त्वसौ वाक्यज इति भावः । नन्वन्वयप्रतियोगित्वे योग्यतादिमदुपस्थितिमात्रं तन्त्रं न त्वपरप्रतियोग्युपस्थापकसजातीयजन्योपस्थितिरपि गौरवादित्यत आह । अन्यथेति । आक्षिप्येति । तस्येति शेषः । आनयनान्वयप्रतियोगिनो घटस्य रूपादिव्याप्तत्वादिति भावः ।

संख्यापरिमाणपृथक्त्वादिकमाक्षिप्याऽन्वयबोधं विदध्यात्। न चैवं तथानुभवाभावात्। किञ्चा-क्षेपे व्यक्तेः प्राधान्येन भानं(१) न स्यात्। न च लक्षणया तदुपस्थितिरिति वाच्यं। शक्यार्था-न्वयव्यवहितव्यक्तिबुद्धे(२)रत्रासिद्धेः। किञ्च

इष्टापत्त्या तर्काभासत्वशङ्कां परिहरति। तथानुभवा-भावादिति। मंडनोक्तदोषमनुवदति। किञ्चाक्षेप इति। जातिविशेषतयोपस्थितेरिति भावः। अस्तु तर्हि तन्म-तमेव(३) तत्राह। न च लक्षणयेति। लक्षणास्थले हि शक्यान्वयानुपपत्तिव्यवहितशक्तिलक्षणाधीने धियौ भ-वतः। शक्त्यधीनधीकाले व्यक्त्युपस्थापकलक्षणानव-तारात्। लाक्षणिककाले शक्त्या शक्योपस्थितौ युगपद्वृत्तिद्वयविरोधप्रसङ्गात्। लक्षणयैव विशिष्टोप-स्थितौ तु व्यवधानाविघातात्। न चेह शक्यजात्युप-स्थितिर्व्यक्तिं विना शक्यतावच्छेदकान्तरस्य तत्राभा-वात्। निरवच्छेदकतत्प्रतीतेश्चानुभवबाधितत्वात्। संबन्धितावच्छेदकाप्रकारत्वेन लक्ष्यास्मारकत्वप्रसंगाच्च। न वा लाक्षणिकव्यक्तिप्रतीतिः। शक्यजातिं विना व्यक्तौ लक्ष्यतावच्छेदकान्तराप्रतीतेः। गोपदाद्गोत्व-विशिष्टप्रतीतेश्चेति भावः। अपि च किमिह व्यक्ति-लक्षणायां बीजमभिमतमायुष्मतः अन्वयानुपपत्तिर्वा

(१) ज्ञानमिति पा० २ पु०।
(२) वाक्यार्थव्यवहितव्यक्तिबुद्धेरिति पा० १ पु०।
(३) मन्मतमेवेति पा० २ पु०।

यत्र जात्यन्वयानुपपत्तिर्नास्ति गां पश्य घटं पश्येत्यादौ तत्र कथं व्यक्तिलाभः । लक्षणाया अभावात् । व्यक्तितात्पर्यव्यतिरेकेणापि व्यक्तेरन्वयबोधदर्शनाच्च । न हि तात्पर्यज्ञानं वाक्यार्थप्रतिपत्तिजनकमिति प्रतिपादितमधस्तात् । न हि जातिप्रत्ययानन्तरमत्र व्यक्तिप्रतीतिः । किन्तु युगपदेव । न च गौरवभयेन क्रमकल्पनम् ।

तात्पर्यानुपपत्तिर्वा । नाद्य इत्याह । यत्र जात्यन्वयेति । न द्वितीय इत्याह । व्यक्तितात्पर्येति । ननु प्रवृत्तिनिवृत्त्यन्यतरपरवाक्यस्य तद्विषयव्यक्तौ तात्पर्यमौत्सर्गिकमिति तद्विरहोऽसिद्ध इत्यत आह । न हि तात्पर्यज्ञानमिति । अस्तु वस्तुतो वक्तुर्व्यक्तौ तात्पर्यं न तु मुख्यार्थताबाधाद्यप्रतिसन्धाने श्रोतुस्तद्ज्ञानं । न च तदज्ञाने व्यक्त्यन्वयस्याप्यज्ञानं शुकादिवाक्ये व्यभिचारेण तस्य वाक्यार्थबाधानङ्गत्वादिति भावः । अधस्तादिति योगरूढिवादस्य पूर्वलेख्यताभिप्रायेण । प्रतीतिभेदाभावादपि न जातिव्यक्त्योः शक्तिलक्षणाव्यवस्थेत्यत आह । न च जातीति । शक्तिलक्षणासाध्यधियो भिन्नयोरनुपपत्तिप्रतिसन्धानव्यवधानं सर्वत्र दृष्टमिह च तन्नास्ति इति व्यवधानाभावपरशक्यार्थेत्यादिग्रन्थः । अयं तु युगपदेवेति स्वरसाद्भेदाभावमात्र इत्यपौनरुक्त्यं वक्ष्यमाणक्रमकल्पनातद्दूषणयोरवतारायोक्तमेव पुनरुत्थापितमिति वा । किन्तु युगपदेवेति । न च तदुपपादकं युगपद्वृत्तिद्वयं सम्भवतीति भावः । क्वचिन्मुख्यं हि क्वचिल्लाक्ष-

प्रमाणवतो गौरवस्यापि न्याय्यत्वात् । किञ्च जातौ निर्विकल्पकोपस्थितायां न शक्तिग्रहः । किन्तु सविकल्पकोपस्थितायां जातौ च विशेषणं व्यक्तिरेव । अन्यद्विशेषणान्यायस्य वैपरीत्यमापतितम् । एवं च जातेः स्मरणमपि सविकल्पकतया विशेषणसापेक्षं । विशेषणं च तत्र व्यक्तिरेवेति समानसंवित्संवेद्यतया कथमाक्षेपः । न चान्वयप्रकारतया व्यक्तेर्ज्ञानमपि तु प्राधान्येन । किञ्च पदार्थोपस्थितावन्वयप्रकारता

णिकं भवति । न च जातौ क्वचिन्मुख्यः प्रयोगः व्यक्तिमनादाय क्वचिदपि पदाज्जातेर्व्यवहाराभावा दिति तत्त्वम् । एवं शक्तिसाध्योपस्थितिपर्यालोचनया व्यक्तेः शक्यतामुपपाद्य शक्तिग्राहकोपस्थितिवशादपि तामुपपादयति किञ्च जाताविति । उक्तयुक्तिं स्मृतावतिदिशन् सिंहावलोकनेनाक्षेपपक्षे दोषान्तरमाह । एवमित्यादिना । न केवलं शक्तिग्राहकव्यवहारकालीनोपस्थितिरित्यपि शब्दार्थः । सूचीकटाहन्यायेन गुर्वेकदेशिपक्षं प्रतिक्षिपति । न चान्वयेति । अन्वयप्रकारस्य छिद्रेतरत्वादेरशक्यस्यापि शाब्दबोधविषयत्वमभ्युपगम्येदं वस्तुतस्तदेव न स्यादिति द्रष्टव्यम् । अपि च सम्बन्धिविशेषान्वयधीकाले खल्वन्वयप्रकारविशेषोपस्थितिर्न तु पदार्थोपस्थितिकाले न चेह तथा जात्युपस्थितेर्व्यक्तिविषयतानियमादित्याह । किञ्च पदार्थोपस्थि-

स्यात् । व्यक्त्या विना जात्युपस्थितिरेव नास्तीति कस्यान्वये व्यक्तिः प्रकारः स्यात् । समानसंवित्संवेद्यतानियमेऽपि जातौ शक्तिर्न व्यक्ताविति चेत् । न शक्तिर्हि सामर्थ्यं । तच्च कार्यापेक्षं । कार्यं ज्ञानात्मकमेवेति कथं गौरवं । न च जातिविषयतया ज्ञानं कार्यं न तु व्यक्तिविषयतयेति वाच्यम् । उभयविषयकं ज्ञानं पदजन्यमित्यस्यैव तदर्थत्वात् । किञ्चास्मन्नये पदानां

तावितिं । सत्यामिति शेषः । नास्तीत्नि । समानसंवित्संवेद्यत्वादिति भावः । समानसंवित्संवेद्यतानियमाज्जातिशक्तपदजन्यज्ञानस्य व्यक्तिविषयतावश्यम्भाव एव सिद्धो न तूभयत्र तुल्या शक्तिरिति गूढाशयगुरोर्मतमाशङ्कते । समानेति । न व्यक्ताविति । गौरवादिति शेषः । जातावपि न शक्तिः । किन्तु तज्ज्ञाने तद्विषयतया तस्याः शक्यत्वं तत्समानवित्तिवेद्यतया व्यक्तेरपि तदापत्तिरिति तत्र निषेधे व्याघातो गौरवासिद्धिश्चेत्याशयेन परिहरति । शक्तिर्हीति । गुरोराशयमुद्घाट्य दूषयति । न च जातिविषयतयेति । जन्यज्ञाने विषयतया कार्यतावच्छेदकत्वस्यैव शक्यत्वादिति भावः । माभूद्व्यक्तिविषयतया जन्यत्वं तथापि तद्विषयकज्ञानस्य पदजन्यतामात्रेण व्यक्तेः,शक्यता अन्यस्य परिभाषामात्रत्वेनाप्रयोजकत्वादित्याह । उभयविषय इति । अन्वयस्य शक्यतापत्तेरपरितुष्यन्नाह । किञ्चेति । सङ्केत इति । अस्मा-

शक्तिस्सङ्केतो न तु पदार्थान्तरं । स च व्यवहारबलेन जातिवद्व्यक्तावपि गृह्यते । न हि गोपदाज्जातिमात्रं व्यवह्रियते न च व्यक्तिरिति युक्तिमत् । तस्मात्सङ्केतग्राहकस्य जातिव्यक्तिसाधारणस्य प्रमाणसिद्धत्वादुभयत्रापि सङ्केतरूपा शक्तिरिति न किंचिदनुपपन्नम् । एतेन गुरूणामर्द्धजरती निरस्ता । स्वरूपसत्याः शक्तेः पदार्थोपस्थित्यनङ्गत्वात् । तदर्थमेव तस्याः कल्पनात् ।

च्छब्दादयमर्थो बोध्य इतीश्वरेच्छात्मक इत्यर्थः । न त्विति मानाभावादिति भावः । स्वरूपकथनं चैतत् । उभयथा व्यवहारबलेनैव तत्कल्पनादनन्यलभ्यमात्रविषयत्वाविशेषाच्च । व्यवहारस्य शक्त्यंशे असिद्धिमाशंक्याह । न हीति । उपसंहरति तस्मादिति । इति न किंचिदिति । अन्यथा तु शाब्दी ह्याकांक्षा शब्देनैव शाम्यतीति न्यायाद्व्यक्तेः शाब्दान्वयबोधानुप्रवेशो विभक्तीनां प्रकृत्यर्थान्वितस्वार्थबोधकत्वव्युत्पत्तिविरोधाद्विभक्त्युपनीतसंख्याकर्मत्वाद्यन्वयश्चानुपपन्न इति भावः । गुरूणामर्द्धजरतीन्यायं निराचष्टे । एतेनेति । वक्ष्यमाणेनेत्यर्थः । किमसौ शक्तिः पदार्थोपस्थितये स्वीक्रियते उताप्रकृत्यर्थे विभक्त्यर्थान्वयानुपपत्तेर्विभक्त्यर्थान्वयायेति विकल्प्य नाद्य इत्याह । स्वरूपसत्या इति । अपभ्रंशादर्थप्रत्ययादिति भावः । न द्वितीय इत्याह तदर्थमेवेति । तदर्थोपस्थित्यर्थमेवेत्यर्थः ।

अन्यथा जातावपि स्वरूपसत्तैवास्तामिति वाचालवचसोऽवकाशप्रसङ्गात्। तस्माज्जातिवत् व्यक्तिरपि यथासम्भवमाकृतिरपि पदार्था इति निर्द्धार्य सूत्रितमक्षपादेन "व्यक्त्याकृतिजातयस्तु पदार्थाः" इति तदेव युक्तमिति समञ्जसम् ॥ ॥

॥ इति पदशक्तिवादः ॥

शब्दतदनुपस्थितौ विभक्त्यर्थान्वयस्याप्यनुपपत्तिः। शाब्दीत्यादिन्यायविरोधादिति भावः। ननु क एवमाह स्वरूपसती शक्तमिति येनापभ्रंशादर्थप्रत्ययो न स्यात्किन्तु जातिविषयतया ज्ञातेत्यत आह। अन्यथेति। अपिरवधारणे। समुच्चयेनोभयत्र स्वरूपसत्ताङ्गीकारे शक्तिभ्रमादर्थप्रत्ययाभावप्रसङ्गात्। एतावता पूर्वपक्षानुमानेऽभावरूपसाध्यप्रतियोगिग्राहकोपजीव्यप्रमाणबाधमुपपाद्य गोव्यक्तिर्गोपदशक्या गोत्वसमानवित्तिवेद्यत्वात् गोत्ववदिति विवक्षितमनुमानं निगमयति। तस्मादिति। ननु प्रत्येकं शक्यत्वे गोगोत्वे इति प्रत्ययोत्पत्तिर्विशिष्टशक्यत्वे गौर्नित्यो गौरनित्य इत्यत्रानन्वयप्रसङ्गः। विशिष्टानामानंत्येन व्यक्तिपक्षोक्तदोषानुवृत्तिश्चेति चेन्न। विशिष्टशक्तस्य विशेषणपरत्वे लक्षणास्वीकारात्। विशिष्टानामानंत्येपि सामान्यलक्षणयोपस्थितेषु विशिष्टेषु सामान्यावच्छेदेन एकशक्तिस्वीकाराददोषात्। आकृतिव्यंग्यजातिप्रवृत्तिनि-

मित्तकपदेषु आकृतिरपि शक्येत्याह । यथासंभवमिति । अत्र रूपरसगंधादिव्यंग्यजातिप्रवृत्तिनिमित्तकेषु पदेषु रूपादिवत् आकृतिव्यंग्यजातिप्रवृत्तिनिमित्तकेष्वप्याकृतेः शक्यत्वे मानाभावः । तत्प्रतीतेस्तद्व्यंग्यजातिलिङ्गक-त्वेन रूपादिप्रतीतिवदेव शाब्दत्वासंप्रतिपत्तेरिति चिंत्य-मेतत् । सूत्रे पदार्थ इत्येकवचनं विशिष्टगोचरा एकैव शक्तिरिति सूचनाय ॥

इति सकलसामन्तप्रतापराजोद्योजितशेषान्तविरचितायां न्यायसिद्धान्तदीपप्रभायां पदशक्तिप्रकरणं समाप्तम् ।

अथ सहजशक्तिः । तत्र विप्रतिपत्तिः । वह्निर्दाहानुकूलातीन्द्रियाद्विष्ठधर्मसमवायी न वा ।

पदशक्तिसिद्धान्ते शक्तिः सङ्केतो न पदार्थान्तरमित्युपक्षिप्तं तत्र दाहादाहव्यवस्थानुरोधेन शक्तेः पदार्थत्वान्तरत्वस्या(१)वश्यकत्वादियमपि पदार्थान्तरं शक्तित्वात् वन्हिशक्तिवत् । इति परप्रत्यवस्थानसंभवान्निराकरणस्यावसरप्राप्ततामर्थशब्देन दर्शयन्नेव प्रतिजानीते । अथ शक्तिरिति ॥ चिन्त्यत इति शेषः । चिन्तानुकूलसंशयमाह । तत्रेति । वन्हिद्व्यणुके अतीन्द्रियस्पर्शेन सिद्धसाधनतानिवृत्त्यै अयमिति । प्रत्यक्ष इत्यर्थः ॥ वह्नौ स्थितिस्थापकपक्षे तद्वारणाय दाहानुकूलेति । पक्षान्तरे तूद्दिश्यसिद्ध्यर्थं तत् ॥ उष्णस्पर्शनिवृत्त्यै अतीन्द्रियेति । अदृष्टवदात्मसंयोगनिराशायाद्विष्ठेति । तन्नानेकासमवेतत्वमिति नाग्निसमवायिपदवैयर्थ्यम् । अनेकवृत्तेरप्यभावस्य तेष्वसमवेतत्वेनाद्विष्ठपदादव्यावृत्तेः । ननु दाहस्य व्यधिकरणगुणादृष्टनिमित्तकतया तदुभयसमानाधिकरणदाह्यादृष्टवदात्मसंयोगजन्यत्वं युक्तं न तु वन्ह्यदृष्टवदात्मसंयोगजन्यत्वं तत्कथं तेनार्थान्तरवारणायाद्विष्ठपदं । न । उष्णस्पर्शस्यापि वन्हिनिष्ठस्य व्यधिकरणादृष्टनिमित्तकतया तत्समानाधिकरणसंयोगजन्यत्वानुमानाद्वन्ह्यदृष्टवदात्मसंयोगस्यापि दाहप्रयोजकत्वात् । बाह्यद्व्यणुकसंयोगवारणार्थं वा तद्द्रष्टव्यं । समवायिपदमतीन्द्रियादृष्टादिप्रतिबंधकाभावनिरासाय । अनुपलब्धिगम्याभाववादिमते तु प्रतिबंधकाभावमात्र-

(१) वाक्यजन्येति पा० २ पु० ।

अनुकूलत्वं च कार्याभावनियताभावप्रतियोगित्वं तच्च कारणतदवच्छेदकोभयसाधारणम् । अतीन्द्रियत्वं च साक्षात्कारनियामकप्रत्यासत्त्यनाश्रयत्वं ।

निरासाय । यद्यपि गुरुमते नाभावोऽतिरिक्तस्तथापि प्रतिवादिमतेऽर्थान्तरतानिरासाय तदुपादानं समवायपदं चायुतसिद्धसंबन्धपरं स च भाट्टानुमतोपीति न कोप्यप्रसिद्धिः । नन्वनुकूलत्वं कारणत्वं तदवच्छेदकत्वं वा । नाद्यः । अपसिद्धान्तात् । न द्वितीयः । शक्त्यतिरिक्तस्य कारणतावच्छेदकस्यानङ्गीकारेण साध्याप्रसिद्धेरित्यत आहानुकूलत्वं चेति । कार्याव्यवहितपूर्वत्वाभावनियताभावकसमवधानप्रतियोगिकत्वमित्यर्थः । यथाश्रुते कार्यकालेपि कारणाभावेन व्यभिचारात् पूर्वत्वेति । न च उत्पत्त्यवच्छिन्नत्वविशेषणमास्तां । ध्वंसोत्पत्तिक्षणे प्रतियोग्यात्मककारणाभावे सत्यपि उत्पत्त्यवच्छिन्नध्वंसाभावाभावेन व्यभिचाराद्धारात् । एवमपि कारणानुत्पत्तिदशायां कार्यपूर्वत्वाभावाभावेन व्यभिचारात् अव्यवहितेति । स्वर्गाव्यवहितपूर्वकाले यागाभावेपि स्वर्गाव्यवहितपूर्वत्वाभावाभावेन व्यभिचारः स्यात्तन्निवृत्तये समवधानेति । नन्वतीन्द्रियत्वं न साक्षात्काराविषयत्वं जन्यसाक्षात्काराविषयत्वं वा । न्यायेन तदप्रसिद्धेः । नाप्यनागतगोचरसाक्षात्कारजनकप्रत्यासत्त्यजन्यजन्यसाक्षात्काराविषयत्वं तादृशप्रत्यासत्तेः शक्तिवादिनामप्रसिद्धेः इत्यत आह

यद्वा वह्निनिष्ठदाहकारणत्वमतीन्द्रियधर्मावच्छेद्यं न वा। तत्र परेषामयमाशयः। यादृशादेव करतलानलसंयोगाद्दाहो जायते तादृशादेव सति प्रतिबन्धके न जायते। प्रतिबन्धकत्वं च किञ्चित्कार्या-

---

प्रतीन्द्रियत्वं चेति। साक्षात्कारनियामकप्रत्यासत्तयः संयोगादयः तदनाश्रयत्वमित्यर्थः। नन्विन्द्रियेष्वव्याप्तिः। तेषु घटादिसाक्षात्कारजनकप्रत्यासत्तिसत्त्वात्। किञ्च साक्षात्कारनियामकत्वं तदुपहितत्वं तत्स्वरूपयोग्यत्वं वा। नाद्यः। घटादिसाधारण्यात्। न द्वितीयः परमाण्वाद्यव्यापनात्। तेषामपि साक्षात्कारजननस्वरूपयोग्यसंयोगप्रत्यासत्त्याश्रयत्वात्। न च साक्षात्कारापत्तिः। कारणान्तरवैकल्यादिति चेन्न। विषयतया साक्षात्काराजनकत्वस्यैवातीन्द्रियपदार्थत्वात्। वन्हिनिष्ठदाहकारणत्वमिति। अदृष्टवदात्मसंयोगनिष्ठदाहकारणत्वे सिद्धसाधनवारणाय वन्हिनिष्ठेति। अदृष्टवृत्तिकारणत्वे विधिकोटिप्रसिद्धिः। संशयजननीं स्वाभिमतविपरीतकोट्युपस्थितिमाह। तत्र परेषामिति। प्रतिबन्धकसमवधानकालीनदाहाभावप्रतिबन्धकत्वान्यथानुपपत्तिभ्यां धर्मान्तरं साधयितुमन्यथोपपत्तिं निरस्यन्नेव वस्तुस्थितिमाह। यादृशादेवेति। उभयसंप्रतिपन्नसकलदाहसहकारिसमवहितादेवेत्यर्थः। अतो न तद्व्यतिरेकेणान्यथोपपत्तिरिति भावः। पृथगन्यथोपपत्तिनिरासे प्रयासगौरवप्रसङ्गात् आद्यामनुपपाद्यैव द्वितीयामप्यर्थापत्तिमुपन्यस्यति। प्रतिबन्धकत्वं चेति। धर्मपदं स्व-

कूलविघटकत्वमेव । तत्र न प्रतिबन्धकस्य दृष्टविघटकत्वं । दृष्टस्य पूर्ववत्प्रमाणसिद्धत्वात् । न चादृष्टविलम्बात्तत्र कार्यविलम्ब इति वाच्यम् दृष्टकारणकलापे सत्यदृष्टविलम्बस्यासिद्धत्वात् । अन्यथा सत्यन्ततन्तुसंयोगे कदाचित्पटानुत्पाद-

रूपकथनाय । इदं च शक्तिवाद्यभिमतं प्रतिबन्धकत्वं घटानुकूलदंडविघटके तदवयवकर्मादाविष्टमेवेति नातिव्याप्तिरिति ध्येयम् । सूचितमुभयत्रान्यथासिद्धिनिरासं स्पष्टयति । तत्रेति । यद्विघटनाद्दाहाभावः प्रतिबन्धकत्वं चोपपद्येतेति भावः । अस्तु तर्हि तथैवेत्यत आहादृष्टस्येति । उभयसंप्रतिपन्नस्येत्यर्थः । तथा पुरुषान्तरेणोष्णत्वाद्युपलम्भादिति भावः । यत्तर्हि तदा नोपलभ्यते अदृष्टतद्विघटकत्वमस्तु तावतापि दाहाभावप्रतिबन्धकत्वयोरुपपत्तेरित्याशंक्याह । न चादृष्टविलम्बादिति । विलंबो व्यतिरेकः । उपलक्षणं चैतत् अदृष्टविघटनात्प्रतिबंधकत्वं चेत्यपि द्रष्टव्यम् । अदृष्टविलंबस्य साक्षात्कार्यविलंबप्रयोजकत्वे दण्डाभावकालीनघटाभावस्यापि सिद्धसर्वोत्पत्तिमत्कारणाभावादृष्टविलंबादेवोपपत्तौ दण्डव्यतिरेकस्य घटव्यतिरेकप्रयोजकतापत्त्या दृष्टकारणोच्छेदप्रसङ्गाद् दृष्टोपसंहारेणैव तस्य कारणतेति तत्सिद्धौ तद्विलंबासिद्धिरित्याशयेनाह । दृष्टकारणेति । विपक्षे बाधकान्तरमाह । अन्यथेति । कर्मणीति । अवि-

प्रसङ्गात् । सत्यपि कर्मणि कदाचिद्विभागानुत्पादप्रसङ्गात् । तस्मादतीन्द्रियकिंचिद्दाहानुकूलविघटकत्वं मण्यादेः प्रतिबन्धकस्यान्यथा(१)नुपपत्त्या कल्पनीयमिति अर्थापत्तिरेव शक्तौ प्रमाणं । न च प्रतिबन्धकाभावेनान्यथासिद्धिः । अभावस्यातिरिक्तस्य मयानङ्गीकारात् । अङ्गीकारे वा कारणत्वस्य भावत्वव्याप्तत्वात् भावत्वस्याभावे निवृ-

नत्वयदवस्थकर्मणीत्यर्थः । यद्यपि परंपराकारणस्य तत्त्वानुरोधात्क्वचित्साक्षात्कारणत्वमावश्यकमिति तत्रैव दृष्टकारणकलापेप्यदृष्टविलंबः सिद्धो यथा परमाणुकर्मादौ यत्रान्यथेत्यादि बाधकं तत्तदा शोभेत यदि दृष्टकारणकलापस्यादृष्टविलंबव्याप्तिरिष्येत न तु तथा किन्तु यत्र दृष्टकारणकलापे कार्यविलंब इति । तथाच संयोगादौ तु पटाद्युत्पत्तिरेवादृष्टसाधिकेति न तद्विलंबो न वा पटानुत्पादप्रसंगस्तथापि प्रकृतेप्यग्रे दाहदर्शनान्नादृष्टविलंबः । न चान्तरादृष्टोत्पादकान्तरमस्ति । मण्याद्यपसारणस्याविहितनिषिद्धत्वादिति भावः । प्रथमार्थापत्तिमुपसंहरति तस्मादिति । दाहाभावोपपादकाभावप्रतियोगिनोदृष्टस्यादृष्टस्य वाऽनिरूपणादित्यर्थः । द्वितीयामुपसंहरति प्रतिबंधकत्वेति । अर्थापत्तिरिति । जातावेकवचनम् । अस्मिंश्चार्थापत्तिद्वयवर्णने कुसुमांजलिप्रकाशसंवादो द्रष्टव्यः । संप्रतिपन्नाभावेनान्यथो-

(१) प्रतिबन्धकत्वान्यथेति पा० २ पु० ।

त्त्या कारणत्वस्य निवृत्तेः। किञ्च न प्रतिबन्धकाभावत्वेन कारणत्वम्। अन्योन्याश्रयातिप्रसङ्गात्(१)। प्रतिबन्धकत्वं हि कारणीभूताभावप्रतियोगित्वं। तच्च कारणत्वग्रहाधीनग्रहं। कारणत्वं च तत्-ग्रहाधीनग्रहमिति। नापि मण्याद्यभावत्वेन मणिसमवधानेपि मणितदन्योन्याभावरूपमादाय

पपत्तिं निरस्य विप्रतिपन्नप्रतिबन्धकाभावेन तां निरस्यति। न च प्रतिबन्धकेति। नन्वतिरिक्तानङ्गीकारेपि तत्स्थानाभिषिक्तमेव कारणं स्यात्। अङ्गीकारपक्षेपि कारणत्वस्य भावत्वव्याप्तिग्राहकविपक्षबाधकाभावादनुपलब्ध्यादीनामभावग्रहादिकारणत्वस्वीकाराच्च नानुपपत्तिरित्यरुचेराह किञ्चेति। कारणीभूतेति। नन्विदं दंडप्रागभावादावतिव्यापकं। न च संसर्गाभावत्वेनाभावकारणता विवक्षिता। कारणीभूतपक्षतारूपाभावप्रतियोगिनः सिद्धसाधनस्य विशेषादर्शनस्य च प्रतिबन्धकत्वाभावप्रसंगात्। ध्वंसव्यापारकत्वपक्षे यागादिप्रतिबंधकतापादनानुपपत्तेश्चेति चेन्न। भावरूपकारणीभूताभावप्रतियोगित्वस्य विवक्षितत्वात्। एवं च प्रतिबंधकाभावस्य संसर्गाभावत्वेन कारणत्वादित्यादि वर्द्धमानवचनं प्रतिबंधकविशेषाभिप्रायं द्रष्टव्यम्। कारणत्वं च तद्ग्रहाधीनग्रहमिति। यद्यपि प्रतिबंधकाभावत्वस्य कारणतावच्छेदकत्वेपि न कारणताग्रहमात्रे तदपेक्षानियमः ससंबंधिकपदार्थप्रत्यक्ष एवावच्छेदकग्रहनियमात्। अवच्छेदकवैजात्यानुपस्थितावपि शाब्दयागस्वर्ग-

(१) अन्योन्याश्रयप्रसङ्गादिति पा० १ पु०।

दाहप्रसङ्गात् । नापि मणिप्रागभावत्वेन उत्पन्नविनष्टे मणौ दाहानुत्पादप्रसङ्गात् । नापि ध्वंसत्वेन अनुत्पन्ने मणौ दाहानुत्पादप्रसङ्गात् । नापि मण्यत्यन्ताभावत्वेन उत्पन्नध्वस्ते मणौ अत्यन्ताभावाभावाद्दाहानुत्पादप्रसङ्गात् । नापि मण्यादिसंसर्गाभावत्वेन अन्योन्याभावातिरिक्तस्य संसर्गाभावस्य निर्वक्तुमशक्यत्वात् । तथा हि । किं तत्संसर्गाभावत्वं संसर्गप्रतियोगिकाभावत्वं वा । तादात्म्यातिरिक्तप्रतियोगिकाभावत्वं वा । अन्यद्वा नाद्यः । संसर्गान्योन्याभावेति(१)व्यापकत्वात् । न द्वितीयः । तादात्म्यात्यन्ताभावे अव्यापकत्वात् । नान्त्योऽसंभवात् । किञ्च । मण्यभा-

साध्यसाधनभावबोधस्वीकारात् तथापि कारणताप्रत्यक्ष एवायमन्योन्याश्रयो द्रष्टव्यः । उत्पन्नविनष्ट इति । उत्पन्ने दूरस्थे विनष्टे वेत्यर्थः(२) । अनुत्पन्न इति । दूरस्थे सत्यपीति शेषः ॥ उत्पन्ने ध्वस्ते चेति । अनुत्पन्न इत्यनुषज्यते तेनानुत्पन्ने उत्पन्ने ध्वस्ते चेति । अन्योन्याभावातिरिक्तस्येति । अन्योन्याभावव्यावृत्तस्य संसर्गाभावत्वस्य निर्वक्तुमशक्यत्वादित्यर्थः । एवं प्रथमार्थापत्तौ प्रतिबन्धकाभावेनान्यथोपपत्तिं निरस्य द्वितीयार्थापत्तावपि तां निरस्यति । किंच मण्यभावस्येति । प्रथमार्थापत्तौ प्रकारान्तरेणान्यथोपप-

(१) संसर्गाभावेति पा० १ पु० ।
(२) उत्पन्ने विनष्टे दूरस्थे वेति पाठान्तरम् ।

वस्य च कारणत्वे मणेः प्रतिबन्धकत्वं न स्यात् । प्रतिबन्धकत्वं कार्यानुकूलविघटकत्वम् न च मणिः किंचिदनुकूलं विघटयति स्वत एवानुकूलविघटनरूपत्वात् । किञ्च प्रतिबन्धकसद्भावेपि उत्तेजकसमवधाने दाहदर्शनात् कथं व्यभिचारात् प्रतिबन्धकाभावस्य कारणत्वं । न चोत्तेजकसद्भावेन प्रतिबन्धकसद्भावः । उत्तेजकाभाव(१)विशिष्टप्रतिबन्धकाभावस्तर्हि कारणं विशिष्टं च विशेषणविशेष्यतत्संबन्धातिरिक्तं नास्ति । तथा च विशेषणविशेष्यतत्सम्बन्धाभावाः प्रत्येकं कारणं मिलिता वा । नाद्यः । प्रत्येकं व्यभिचारात् ।

त्तिं निरस्यति । किञ्च प्रतिबन्धकेति । ननु मणिमात्रं न प्रतिबन्धकं किन्तूत्तेजकाभावविशिष्टतदभावश्चोत्तेजककालेपीति न व्यभिचार इत्याशंक्याह । न चोत्तेजकेति । एवमंगीकारे मण्यभावः कारणमिति प्रतिज्ञातं तावद्भग्नं न चायमपि विशिष्टानतिरेके सुनिर्वह इत्याह । उत्तेजकाभावेत्यादिना । प्रत्येकं व्यभिचारादिति । मण्युत्तेजकयोरभावे विशेषणाभावस्य मण्युत्तेजकसमवधाने विशेष्याभावस्य व्यतिरेकव्यभिचारात् । मण्युत्तेजकभावकाले तयोरतिरिक्तसंबन्धाभावेन संबन्धाभावस्याप्यन्वयव्यभिचारात् । एकोत्तेजकवत्यपरोत्तेजकशून्यमणौ सत्यपि तदुभयसंबन्धे

---

(१) उत्तेजकाभावे इति पा० २ पु० ।

न द्वितीयः अभावमेलकाभावेपि दाहदर्शनात् । न च विशिष्टाभावोतिरिक्त एवेति वाच्यं । विशिष्टस्य हि विशेषणाद्यनतिरेके विशिष्टाभावस्य विशेषणाद्यभावातिरेके का प्रत्याशा । न च विशिष्टमतिरिक्तमेव प्रतिक्षणं यत्किंचिद्विशेषणावच्छेदकत्वे क्षणभङ्गप्रसङ्गात् । प्रत्यभिज्ञानं च क्वचिदपि

दाहदर्शनाद्व्यतिरेकव्यभिचाराद्वेत्यर्थः । द्वितीये व्यतिरेकव्यभिचार इत्याह । अभावमेलकेति । स्वार्थे कः । ननु देवदत्ततत्संबन्धान्यतमाभावे दंडी देवदत्तो नास्तीति जायमानानुगतबुद्धिस्तावदतिरिक्तं अनुगतं विशिष्टाभावं कल्पयति इति स एवानुगतो हेतुः । अस्त्वित्याशंक्य निराकरोति । न च विशिष्टेति । अभावविभाजकैकोपाधिमदनेकाभावप्रतियोगित्वस्यैकत्रासंभवान्न विशेषणादिकमेव प्रत्येकाभावभिन्नानुगताभावप्रतियोगि न च विशिष्टं तस्य तदनतिरेकादित्याह विशिष्टस्य हीति । नन्वनुगतमतिरेवाभावस्येव तत्प्रतियोगिनो विशिष्टस्याप्यतिरेकं कल्पयिष्यतीत्यत आह न च विशिष्टमिति । यत्किंचिद्विशेषणेति । अन्ततस्तल्लक्षणस्यैव सत्त्वादिति भावः । नन्वीदृशक्षणभंगो न दोषायेत्यत आह । प्रत्यभिज्ञेति । ननु नष्टं विशिष्टं न प्रत्यभिज्ञाविषयः तस्या उपलक्ष्यविशेष्यमात्रविषयत्वात्तस्य चानाशादित्यस्वरसादाह विशेषणादिनेति । ननु विशेषणाद्यनतिरिक्तस्यापि विशिष्टस्यातिरिक्ता-

न स्यात्। विशेषणादिनैव विशिष्टव्यवहारोपपत्तावतिरिक्तकल्पनायोगाच्च। किञ्च मण्यादिसमवधानदशायां उत्तेजकसद्भावे(१) यो दाहो जायते स किं प्रतिबन्धकप्रागभावात्। उत प्रतिबन्धकध्वंसात्। उदत्यन्ताभावाद्वा। न तावदाद्योऽसिद्धेः। प्रागभावस्य कार्य्यैकोन्नेयत्वात्। न द्वितीयः। उत्तेजकापनयेपि दाहप्रसङ्गात् ध्वंसस्य विद्यमानत्वात्(२)। अत एव न तृतीयः। अत्यन्ताभावस्य सदातनत्वादुत्तेजकापनयेपि(३)दाहप्रसङ्गात्।

भावसंभवे इष्टापत्तिरसंभवे स एवानुगतप्रतिसिद्धस्वप्रतियोगिविशिष्टातिरेके मानमित्यस्वरसादाह। किंच मण्यादीति। मण्यादेरुत्पन्नस्य पुनरुत्पत्तेरुत्तेजकसमवधानदशायामेव मणिनाशस्थले विशिष्टस्याप्यनुत्पत्तेः प्रागभावासंभवाद्व्यतिरेकव्यभिचार इत्याह। प्रागभावस्येति। उत्तेजककालीनस्य विशिष्टध्वंसस्य तदपनयेप्यविनाशादन्वयव्यभिचारमाह। उत्तेजकेति। वस्तुतः समवाय्यसमवायिकारणनाशघटितक्लृप्तसामग्र्यभावे विशिष्टध्वंसानुपपत्तेरुत्तेजककाले व्यतिरेकव्यभिचार एवेति ध्येयम्। अत एवेत्यस्यार्थमाह। अत्यन्तेति। ननू-

---

(१) समवधाने इति पा० १ पु०।

(२) उत्तम्भकापनयेपि ध्वंसस्य विद्यमानत्वाद्दाहप्रसङ्गादिति पा० १ पु०।

(३) उत्तंभकापनयेपीति पा० १ पु०।

किञ्च मण्यादिसंसर्गाभावस्य संसर्गाभावत्वेन कारणत्वम्। तथा चेतरसमवधानेपि यत्किंचिन्मणिसंसर्गाभावमादाय मणिसमवधानेपि दाहप्रसङ्गात्। न हीतरसमवहितदंडसमवधाने(१) दंडान्तरविलम्बेन कार्यविलम्बो दृश्यते। किञ्च प्रहरं मा दहेत्यादौ मंत्रस्य प्रतिबन्धकत्वं वाच्यम्। तथा च तदभावस्य कारणत्वे प्रहराभ्यन्तर एव दाहः स्यात्। मंत्रस्य शब्दरूपतया आशुतरविनाशित्वात्। किञ्च तार्णादौ वह्निजनकताप्रयोजकं न तृणत्वादिकं व्यभिचारात्। अन्यस्यानुगतस्याभावात् तृणादीनां एकशक्तिमत्त्वं प्रयोजकं वह्निजनकत्वे स्वीकार्यम्। किञ्च पिपासोपशमनस-

त्तेजकापनयनदशायां प्रतिबन्धकात्यन्ताभावस्वरूपसत्त्वेपि न दाहापत्तिरुत्तेजकसमवधानस्य तत्सम्बन्धस्याभावादित्याह। किंचेति। यत्किंचिदिति। एककारणतावच्छेदकाक्रान्तकिंचित्समवधाने एव कार्योत्पत्तेरिति भावः। एतदेव व्यतिरेकमुखेन दृढयति। न हीति। प्रतिबन्धकाभावेनान्यथोपपत्तौ दूषणान्तरमाह। किंचेति। आशुतरेति। व्यापारस्य चानिर्वचनादिति भावः। तार्णादावेकजात्यनुपपत्तिरपि शक्तौ मानमित्याह। किञ्च तार्णादाविति। एकैकमन्तरेणाप्यपरस्मात्तदुत्पत्तेरित्यर्थः।

(१) हीतरदंडसमवधाने इति पा० २ पु०।

मर्थमिदं जलत्वादित्यत्र सामर्थ्यं तावदनुमीयते। तत्तावन्न पिपासोपशमनकारणत्वम्। तदपि पिपासोपशमनस्वरूपयोग्यत्वं वा सहकारियोग्यत्वं वा। नाद्यः। स्वरूपयोग्यत्वस्य प्रत्यक्षेणैव ग्रहणात्। न द्वितीयो व्यभिचारात्। न हि सर्वं जलं पिपासोपशमनसहकारियोग्यं भवतीति नियमः। तस्मात्कारणत्वातिरिक्तमेव सामर्थ्यमनुमेयम्। तदेव(१) शक्तिः। एवं व्यवस्थिते(२)ऽनुमानमप्युच्यते। अयं(३) वन्हिर्दाहानुकूलातीन्द्रियैकवृत्तिधर्मसमवायी दाहकारणत्वात् आत्मवत्। न चात्मत्वमुपाधिः। तेजोद्व्यणुक एव साध्याव्यापकत्वात्।

अनुगतस्येति। अनतिप्रसक्तस्य चेति शेषः। एकशक्तिमत्त्वमिति। एकजातीयशक्तिमत्त्वमित्यर्थः। अन्यथा कार्यैकजात्याऽनुपपत्तेरिति भावः। शक्तिपदापरपर्यायस्य सामर्थ्यस्य कारणतातिरेकं विना जलत्वादिलिङ्गानुमेयत्वानुपपत्तिरपि शक्तिं गमयतीत्याह। किंच पिपासेति। प्रत्यक्षेनैवेति। कारणतावच्छेदकधर्मस्यैव स्वरूपयोग्यत्वादिति भावः। व्यभिचारमेव स्पष्टयति। न हीति। स्वमतेनार्थापत्तीरभिधाय तत्प्रामाण्यपार्थक्ये विप्रतिपन्नं परं प्रत्यनुमानाभिधानं प्रतिजानीते। एवमिति। कृते कंटकोद्धार इत्यर्थः। वन्हिरिति प्रतिज्ञावि-

(१) सैव चेति पा० २ पु०।
(२) एवं स्थिते इति पा० १ पु०।
(३) अयं—नास्ति १ पु०।

तत्रापि हि दाहानुकूलस्यातीन्द्रियस्य स्पर्शस्य विद्यमानत्वात् । न चासौ न दाहहेतुः । उद्भूतोष्णस्पर्शमात्रस्यैव तत्त्वात्(१) । यद्वा करतलानलसंयोगः कार्यानुकूलातीन्द्रियधर्मसमवायी कारणत्वात् आत्मवत् । अत्रात्मत्वोपाधेः साध्याव्यापकत्वं स्फुटमेव । न च द्रव्यत्वमुपाधिः । धर्माधर्मादौ साध्याव्यापकत्वात् । अत्र धर्मत्वादेरेव तथाभूतस्य विद्यमानत्वात् । न चातीन्द्रियप्रतियोगिकसादृश्येन सिद्धसाधनम् । सादृश्यपदार्थस्याभावान्तर्भावेनासमवेतत्वात् । वन्हिः

शेषणानि विप्रतिपत्तौ दर्शितप्रयोजनानि । आकाशादौ व्यभिचारनिरासाय हेतौ दाहपदम् । नन्वात्मत्वमत्रोपाधिरित्यत आह । न चेति । साध्याव्यापकतां स्फुटयति । तत्रापीति । ननु नासौ दाहानुकूल इत्यत आह न चेति । उद्भूतेति । अनभिभूतोद्भूतोष्णस्पर्शत्वस्यैव दाहजनकतावच्छेदकत्वादित्यर्थः । अद्विष्टपदानुपादानलाघवेनानुमानान्तरमाह यद्वेति । संयोगविशेषोपादानं बुद्धिस्थतामात्रेण । कार्यानुकूलपदमुद्देश्यसिध्यर्थम् । नन्वात्मत्वमुपाधिरित्यत आह । अत्रेति । स्फुटमेवेति । गुरुत्वादिमति घटादावेवेत्यर्थः । अस्तु तर्हि द्रव्यत्वमुपाधिरित्यत आह । न चेति । धर्मेति । आदि-

(१) तथात्वात्-१ पु० ।

कार्यानुकूलातीन्द्रियैकवृत्तिधर्मसमवायी कारणत्वात् आत्मवदिति वा । एवं प्राप्तेऽभिधीयते(१) । अन्यथानुपपत्त्या शक्तिः कल्पनी-

पदेन गुरुत्वभावनादेर्ग्रहणम् । नन्वतीन्द्रियप्रतियोगिकसादृश्येन सिद्धसाधनमित्यत आह । न चातीन्द्रियेति । ऐन्द्रियकप्रतियोगिकस्यैन्द्रियकतयातीन्द्रियपदेनैव निरस्तत्वात् । अतीन्द्रियप्रतियोगित्वे(पादानं मन्मतसिद्धेन वा भवन्मतसिद्धेन वा तेन न सिद्धसाधनम् तस्यासमवेतत्वादित्यादिभंग्यन्तरेण हेतुमाह । सादृश्यस्येति । ध्वंससदृशोत्यन्ताभाव इत्यादिप्रतीतेरभावेष्वपि मध्ये परस्परसादृश्यस्य भावत्वेन तत्र च समवायासंभवेन तुल्यन्यायतया अन्यत्रापि भावरूपस्यापि तस्यासमवेतत्वादिति गुरुमतेऽर्थः । यद्यपि गुरुमतेऽभावस्यापि भावरूपत्वान्न तत्र समवायानुपपत्तिस्तथाप्यतिरिक्ताभावाभ्युपगमेनेदमुक्तम् । न्यायमते त्वभावस्यान्तर्भावः सादृश्यमध्ये प्रवेशस्तेनेत्यर्थः । असाधारणान्यतद्गतभूयोधर्मवत्त्वस्य सादृश्यस्याभावगर्भत्वेनासमवेतत्वादिति भावः । सकलवन्हिकार्यानुकूलां वन्हौ शक्तिं साधयितुमाह । वन्हिःकार्येति । अन्ये तु सादृश्येन सिद्धसाधनभयादेवाह । अयं वन्हिरिति । न चात्रापि तत्तस्य द्विष्ठत्वादित्याहुः । पूर्ववत्प्रत्यक्षो वन्हिः पक्षः कार्यं च स्वनिमित्तकं विवक्षितम् तेन वन्हौ स्थितस्थापकपक्षेऽपि

(१) प्राप्ते ब्रूमः इति पा० १ पु० ।

था । न चात्र सा । प्रतिबन्धकाभावेनोपपत्तेः । न चान्योन्याभावमादायातिप्रसङ्गः प्रागभावत्वादिनाऽननुगमो वा । संसर्गाभावत्वेनैव कारणत्वे तयोर्निरासात् । न चान्योन्याश्रयः । मण्यादिसंसर्गाभावत्वेनैवोपस्थिते कारणत्वग्रहस्य सुकरत्वात् । न चान्योन्याभावसंसर्गाभावयोरभेदः । आपाततः(१) संसर्गावच्छिन्नप्रतियोगिकाभावत्वप्रतियोग्यवृत्तिसदातनाभावत्वयोर्व्यावर्त्तकयोर्विद्यमानत्वात्(२) । न च संसर्गावच्छिन्नप्र-

न तेनार्थान्तरम् । तस्य वन्हिसमवायिकर्मकार्यानुकूलत्वात् तदभावपक्षे तु भाट्टाभिमतातीन्द्रियकर्मव्युदासार्थं तत् । अस्मिंश्च पक्षद्वये यद्यपि कारणत्वमात्रं परनयेऽभावसमवाययोर्व्यभिचारि तथापि निमित्तेतरकारणताश्रयत्वं तदर्थः । सिद्धान्ताभिधानं प्रतिजानीते । एवमिति । अर्थतो दूष्यमनुभाष्य दूषणमनुवदति । अन्ययेति । ननूक्तमतिप्रसङ्गव्यभिचाराभ्यां न प्रतिबन्धकभावेनान्यथासिद्धिरित्यत आह । न चेति । नन्वन्यथातिप्रसङ्गात्प्रतिबन्धकसंसर्गाभावत्वेन कारणता वाच्या तथा चान्योन्याश्रयः कारणीभूताभावप्रतियोगिनः प्रतिबन्धकत्वादित्याह । न चान्योन्याश्रयेति । आपा-

(१) आपाततः—नास्ति १ पु० ।

(२) भावत्वयोर्विद्यमानत्वात्—१ पु० ।

तियोगिकाभावत्वमन्योन्याभावविशेषेतिप्रसक्तम् । तथा हि गृहधृतबहुघटमध्यादेकस्मिन्बहिरानीते घटेऽधुना गृहसंसर्गिघटभिन्नोऽयं घट इति व्यवहारोस्ति । न च तद्घटवृत्त्यन्योन्याभावस्य प्रतियोगितावच्छेदकं घटत्वं घटत्वस्य तत्रापय-नुयोगिनि वृत्तेः । तस्मादवश्यं तदन्योन्या-भावस्य संसर्गः प्रतियोगितावच्छेदक इति स्वी-कर्त्तव्यमिति वाच्यम् । अभावस्थले निरसनी-यत्वात् । न च प्रतियोग्यवृत्ति सदातना-भावत्वं घटपटौ नायं घट इति व्यासज्यप्रति-योगिकान्योन्याभावत्वव्यापकमिति वाच्यम् । त-

---

तत इति । ननु भूतले घटाभाव इति न संसर्गः प्रति-योगितावच्छेदकः किन्तु घटत्वादिकमेवान्यथा सम्ब-न्धितावच्छेदकरूपेण सम्बन्धिनि भासमान एव ससम्ब-न्धिकपदार्थनिरूपणमिति नियमेन प्रतियोग्यंशे संस-र्गप्रकारतापत्तेः दण्डी नास्तीतिवदित्यव्याप्तिः । तथा नित्यत्वात्यन्ताभावस्य स्वप्रतियोगिनि नित्यत्वे वृत्तौ तदनित्यत्वापत्तेः नित्यानामनित्यताप्रसङ्गात् प्र-तियोग्यवृत्तित्वमेष्टव्यम् इत्यग्रिमलक्षणस्य तत्रातिव्या-प्तिरित्याशयेनोक्तमापातत इति । अभावविचारेन्यदपि वक्ष्यत इति भावः । संसर्गान्योन्याभावव्यावृत्त्यै अवच्छि-न्नेति । प्रतियोगीति अत्यन्ताभावव्यावृत्त्यै पूर्वं प्राग-भावध्वंसव्यावृत्त्यै चोत्तरं विशेषणम् । अत्यन्ताभावः प्र-योगिवृत्तिः अन्यथात्माश्रयात् । प्रागभावध्वंसौ तदवृत्ती

स्याप्यभावस्थले निरसनीयत्वात् । न चाभाव-
कारणत्वे मणेरकिंचित्करत्वेन प्रतिबन्धकत्वानु-
पपत्तिः मणेः प्रतिबन्धकत्वाभावात् । किन्तु
मण्यादिकमेव सामग्रीविघटनं तत्प्रयोक्ता तु

अपि न सदातनौ इति नातिप्रसक्तिरिति भावः । अव-
च्छिन्नत्वविशेषणेऽप्यतिप्रसक्तितादवस्थ्यमित्याशंकासुप-
पाद्य परिहरति । न च संसर्गावच्छिन्नेत्यादिना । अनु-
योगीति । अवच्छेद्यान्यूनातिरिक्तवृत्तेरेवावच्छेदकत्वा-
दिति भावः । अभावस्थल इति । अनुयोग्यवृत्तेरेवैतद्घ-
टत्वस्य तत्प्रतियोगितावच्छेदकत्वेन तत्र वक्ष्यमाणत्वा-
दिति भावः । अन्योन्याभावलक्षणे व्यासज्यप्रतियोगिका-
भाववादिमतेनाव्याप्तिमाशंक्य निरस्यति । न च प्रति-
योग्यवृत्तीति । तस्यापीति । प्रत्येकप्रतियोगिकाभावेनैव
व्यवहारोपपत्तावतिरिक्तस्य व्यासज्यप्रतियोगिकाभाव-
स्याप्रामाणिकत्वादित्यस्य तत्र वक्ष्यमाणत्वादिति भावः ।
द्वितीयामर्थापत्तिमनूद्य दूषयति । न चाभावकारणत्व
इति । यद्यपि कारणीभूताभावप्रतियोगित्वं प्रतिबन्ध-
कत्वमभावकारणत्व एवोपपद्यते इति मणेस्तत्त्यागोऽनुचि-
तस्तथापि ण्वुलर्थाननुसारित्वादिदमनादृत्य कार्यानुकू-
लकिंचिद्धर्मविघटकत्वं प्रतिबन्धकत्वंपराभिमतमभ्युपग-
म्येदमुक्तं यदाह । अकिंचित्करत्वेनेति । प्रतिबन्धकत्वा-
भावादिति । ण्वुलन्तप्रतिबन्धकपदार्थत्वाभावादित्यर्थः ।
ननु प्रतिबन्धकसंसर्गाभावत्वेन मण्याद्यभावकारणतायाः

पुरुषः प्रतिबन्धकः । न च विशिष्टस्यानतिरेके तदभावातिरेकानुपपत्तिः । प्रतियोगिभेदेनेवाव-च्छेदकभेदेनाप्यभावभेदस्वीकारात् । भवति हि

सिद्धान्तितत्वात् । अवश्यं मण्यादेः प्रतिबन्धकत्वमेष्टव्यमकिञ्चित्करत्वात् वानुपपन्नमिति महत्सङ्कटमित्यनुशयेन पृच्छति । किन्त्विति । कार्यानुकूलकिञ्चिद्धर्मविघटकत्वस्य प्रतिबन्धकपदार्थत्वे मणिर्न प्रतिबन्धकः किन्तु कार्यानुकूलस्वाभावविघटनरूपतयाऽप्रतिबन्धक एवेत्युत्तरमाह । मण्यादिकमिति । सामग्रीविघटनमेवेति । प्रतिबन्धः सामग्रीपदं तदेकदेशपरम् । न चैवं मण्याद्यभावस्य प्रतिबन्धकाभावतया कारणत्वानुपपत्तिरिष्टापत्तेः मण्याद्यभावत्वेनैव कारणत्वात् । कारणीभूताभावप्रतियोगिनि पदप्रयोगमात्रस्य स्वार्थिककेनाप्युपपत्तेः। न चैवमोषधी प्रतिबन्धिकेति स्त्रीलिङ्गत्वानुपपत्तिः स्वार्थिकाः क्वचित्प्रकृतितो लिङ्गवचनान्यतिवर्तन्ते इति न्यायेन चातुर्वर्ण्यवैनयिकादिवल्लिङ्गव्यत्ययोपपत्तेरिति भावः । वस्तुतस्त्वनुत्पादस्य प्रतिबन्धकपदार्थत्वे तत्प्रयोजकतया ण्वुलन्तपदप्रयोगस्यापि मण्यादौ सुवचत्वान्न विशेष्यलिङ्गतानुपपत्तिः न चानुत्पादस्यानादितया तदुत्तरसमयसम्बन्धस्यापि तदुभयाभिन्नतया मण्यादेः तत्प्रयोजकतानुपपत्तिर्योगक्षेमसाधारण्यास्तस्यास्तत्रापि प्रायश्चित्तवत्सुवचत्वादिति ध्येयम् । ननूक्तविशिष्टाभावे का प्रत्याशेत्यत आह । न च विशिष्टस्येति । अव-

केवलदण्डसद्भावे केवलपुरुषसद्भावे तदुभयाभावे च दण्डी पुरुषो नास्तीति व्यवहारः । विशिष्टाभावस्यातिरेकेपि कतमोऽसाविति चेत् । न तदनुपन्यासेप्यक्षतेः । अतिनिर्बन्धकरणेऽत्यन्ता-

---

च्छेदकेति । प्रतियोगितावच्छेदकेत्यर्थः । पृथिव्यादिप्रत्येकरूपाभावनिश्चयेपि वायौ रूपमस्ति न वेति इत्यादिसंशयदर्शनात्सामान्यावच्छिन्नप्रतियोगिकाभावभेदाभ्युपगमादिति भावः । ननूक्तसंशयानुपपत्त्याऽस्तु तत्सिद्धिर्न चेह काचिदनुपपत्तिरित्यत आह । भवति हीति । सन्तु वस्तुतो विशिष्टाभावस्थले विशेषणाद्यभावाः । न तु तद्विषयेयं प्रतीतिस्तदननुगमेप्यनुगताकारत्वात् । विशेषणादीनां प्रतियोगित्वेनानुल्लेखाच्चेति तद्बलात् त्रितयाऽनुगताभावान्तरसिद्धिरिति भावः । अत्र दण्डी पुरुषो नास्तीति व्यवहार इति विशिष्टस्यैव प्रतियोगित्वोल्लेखं वदतो नानुगतसम्बन्धाभावेनान्यथासिद्धिः विशिष्टाभावधीमात्रे सम्बन्धस्य प्रतियोगित्वानवगमात् । अन्यथा घटो नास्तीत्यत्रापि सम्बन्धाभावेनान्यथासिद्धिप्रसङ्गात् । न चात्र प्रतियोगितावच्छेदकसम्बन्धत्वप्रकारकज्ञानाभावान्न तथा संसर्गविधया दण्डदेवदत्तसम्बन्धे भासमानेपि दण्डी देवदत्तो नास्तीति प्रतीतावपि तुल्यत्वात् । सम्बन्धत्वेन तज्ज्ञानस्थलीयविशिष्टाभावप्रतीतेश्च सम्बन्धाभावविषयत्वाभ्युपगमादिति भावः । वस्त-

भाव इति गृहाण । न चात्यन्ताभावस्य सदातनत्वात् उत्तेजकापनयेपि दाहप्रसङ्ग इति वाच्यम् । विशेषणाद्यन्यतमाभावस्य विशिष्टाभावप्रत्या-

---

प्तयावद्विशेषबाधेन बाधं शङ्कते । विशिष्टाभावस्येति । अक्षतेरिति । प्रमाणबलादतिरिक्ताभावसिद्धौ तदन्तर्भावानन्तर्भावचिन्ताया अशक्तिवादत्वादिति भावः । ननु यावद्विशेषबाधादतिरिक्तस्य चानिर्वचनादतिरिक्तसिद्धेरेवासिद्धेः कथं न क्षतिरित्यत आह । अतीति । गृहाणेत्यनेन स्वस्य विशिष्टाभावसिध्यैव कृतार्थतां सूचयति । ननूक्तमुत्तेजकापनयेपि दाहः स्यादित्यत आह । न चेति। विशेषणाद्यन्यतमाभावकाले कार्यं नान्यदेति कार्यदर्शनादेव विशेषणाद्यन्यतमाभावस्य प्रत्यासत्तित्वकल्पनान्नाप्रत्यासन्नात्ततः कार्यमित्याह विशेषणेति । विशेषणतादिप्रयोजकसम्बन्धपुरस्कारेण विशेषणाद्यवच्छेदकधर्मावच्छिन्नप्रतियोगिकस्य विशेषणाभावादेरित्यर्थः । तेन समवायितया दण्डाभावो चक्रत्वावच्छिन्नदण्डाभावो वा दण्डिन्यपि इति तस्यापि विशिष्टाभावप्रत्यासत्तितापत्तिरिति निरस्तम् । न चैवमावश्यकत्वात्स एव हेतुरस्त्विति वाच्यम् । अननुगमात् । न च प्रत्यासत्तित्वेपि तुल्यता प्रत्यासत्त्यननुगमस्याकिञ्चित्करत्वात् । अननुगमो हि व्यभिचारः कारणताग्रहे विरोधी न प्रत्यासत्तित्वग्रहे । अपि च प्रत्या-

सत्त्यननुगमस्य प्रत्यासन्नकारणताग्रहविरोधित्वे चाक्षुष-त्वादिज्ञानत्वावच्छिन्ने चक्षुरादीनामकारणतापत्तिः। संयोगादिप्रत्यासत्तीनामननुगमात्। प्रत्यासत्तितावच्छेद-कानुगतधर्माभावाच्च। न चेन्द्रियनिरूपितधर्मत्वादि त-थाऽन्योन्याभावादावतिप्रसङ्गित्वात्। प्रत्यासत्तिरपि का-रणमिति चेत् अस्तु वस्तुतो यत्र येन रूपेणानुगता तत्र तथा को विरोधः। प्रत्यासत्तित्वं पुनरन्यथापीत्येतावत्। यदाहुर्गङ्गेशचरणाः प्रत्यक्षविशेषे इन्द्रियार्थसंनिकर्षविशे-षो हेतुरनुगत एवेति। तथापि प्रत्यासत्तीनां वस्तुतः कारणत्वादिहापि तत्प्रसङ्ग इति चेन्न। दाहसामा-न्ये व्यभिचारात् दाहविशेषे तूभयसमाधेयत्वादिति। ए-तदेव चास्मिन्पक्षे अनुगमकमनादृत्य कारणतापक्षे वि-शिष्टविरोध्यभावत्वमनुगमकं वक्ष्यतः शशधरस्य हृदयम्। एवं च प्रत्यासत्तितावच्छेदकानुगतधर्माभावादित्यादि-चिन्तामणिकृतो दूषणमलग्नकमिति मन्तव्यम्। ननु भिद्यतामभावः प्रतियोगितावच्छेदकभेदात् यत्र पुरुषस्य प्रतियोगिता इह तु सैव नास्ति तत्र विद्यमानस्य तत्रैवाभावविरोधात्, इति कस्यावच्छेदकं दण्डत्वं यद्भेदादभावभेदः स्यात्। प्रतियोगितावच्छेदकावच्छि-न्नेनैवाभावविरोधो न प्रतियोगिमात्रेणेति चेत्। न लाघवेन प्रतियोगित्वस्यैव देशतोऽत्यन्ताभावविरो-धितावच्छेदकत्वात्। अन्यथा घटसत्त्वे घटपटौ न स्त इति तयोः प्रतियोगित्वोल्लेखबलाद्व्यासज्यवृत्तिधर्मा-वच्छिन्नप्रतियोगिकाभावकल्पनाप्रसङ्गात्साधकबाधकयो-

सत्त्वेनेष्टत्वात् । यद्वा विशेषणाद्यभावेनैव(१) विशिष्टाभावव्यवहारोपपत्तौ नातिरिक्तविशिष्टाभावकल्पनम् । न चानुगमाभावः विशिष्टविरोध्यभावत्वेनैवानुगमात् । न च किञ्चित्प्रतिबन्धकसद्भावे प्रतिबन्धकान्तराभावमादाय दाहापत्तिरिति । प्रतिबन्धकजातीयासमानाधिकरणप्र-

---

स्तुल्यत्वात् । पाकरक्ते नायं श्याम इति प्रत्ययादन्योन्याभावस्याव्याप्यवृत्तिताप्रसङ्गात् । न चैवं सामान्याभावासिद्धिप्रसङ्गः तत्काले सामान्यावच्छिन्नप्रतियोगिमात्रासत्त्वेन तत्र प्रतियोगितावच्छेदकभेदेनाभावभेदे बाधकाभावात् । तस्मात्पुरुषाभावप्रतीतिरसिद्धैव प्रयोगस्तु सविशेषणे हीतिन्यायेनाहं स्वर्गी स्यामितिवदित्यस्वरसादाह । यद्वेति । विशिष्टविरोध्यभावत्वेनेति । विशिष्टधीविरोधिधीविषयाभावत्वेन विशिष्टधीविषयाभावत्वेनेति वार्थः । तेन सहानवस्थाननियमात्मा विरोधो न परस्परविरहरूपतया विशेषणविशेष्याभावस्य प्रत्येकविशिष्टाभावतया तत्प्रत्येकाभावस्य विशिष्टत्वापत्तेः । तदभावाभावस्य तत्त्वात् । न चोभयाभावे उभयं विशिष्टम् एवं भावद्वयं विशिष्टाभावो न तु प्रत्येकाभाव इति प्रत्येकाभावाद्विशिष्टाभावव्यवहारो न स्यात् इति गङ्गेशदूषणमलग्नकं वेदितव्यम् । आदि-

---

(१) विशेषणाद्यन्यतमाभावेनेति पा० १ पु० ।

तिबन्धकसंसर्गाभावस्य कारणत्वात्। तथैवान्वय-
व्यतिरेकाभ्यामवधारणात्। परेणापि शक्तिं प्रति
प्रतिबन्धकाभावहेतुतायाश्च व्यवस्थाप्यत्वात्। प्र-
हरं मा दहेत्यादौ तथाभूताभिप्रायविषयसमयस्यैव
प्रतिबन्धकत्वम्। तथा च नातिप्रसङ्गः। न च
तार्णादावैकजात्यप्रयोजकतया शक्तिस्वीकारः।
शक्तिं विनापि पवनादिकारणादेवोपपत्तेः। शक्ति-

पदेन सम्बन्धाभावमपि संगृह्णता यत्र सम्बन्धत्वप्रका-
रकसम्बन्धज्ञानपूर्विका विशिष्टाभावधीस्तत्र सम्बन्धा-
भावोपि विशिष्टाभावत्वेनाभ्युपगम्यत एव स एवेति परं
न संसर्गविधया सम्बन्धभानस्थले प्रतियोगितावच्छेद-
कप्रकारकतज्ज्ञानाभावादिति सूचितम्। अन्वयव्यभिचा-
रमनूद्य दूषयति। प्रतिबन्धकजातीयेति। प्रतिबन्धक-
जातीयानधिकरणाधिकरणकप्रतिबन्धकसंसर्गाभावस्ये-
त्यर्थः। परोक्तसर्वदोषेषु साधारणं परिहारमाह। परे-
णापीति। तथा च स्वव्याघातकरतया सर्वे त्वदीयहेतवो
जातय इति भावः। मंत्राभावस्यान्वयव्यभिचारं
निरस्यति प्रहरमिति। तथाभूतः कालविशेषावच्छिन्न-
दाहाभावविषयः अभिप्रायः सङ्कल्पः स च विषयविषयि-
भावेन समयविशेषस्योपलक्षको न विशेषक इति न
तन्नाशेपि प्रहराभ्यन्तरे दाहापत्तिरिति भावः।
तेन सङ्कल्पनाशे समयस्य स्वतोविशेषादित्याद्यस्व-

वादिनापि विजातीयानां कारणानामेकजातीयशक्तिमत्त्वस्यानभ्युपगन्तव्यत्वात्। अन्यथा कार्यविशेषात्कारणविशेषानुमानं कारणविशेषाभावात्कार्यविशेषाभावानुमानं च क्वचिदपि न स्यात्। तज्जातीयशक्तिमतोऽन्यस्मादपि कार्योत्पत्तिसम्भावनाया जागरूकत्वात्। तथापि तृणादीनां वन्हिं प्रति कथं कारणत्वग्रहः । तेषां दहनमात्रं प्रति व्यभिचारात्। दहनावान्तरविशेषस्य च कारणताग्रहोत्तरकल्प्यत्वात् । न चान्यतमत्वं नियामकम् । विशकलितसमवधानेपि कार्यप्रसङ्गात्।

रसपूर्वमुद्देश्यत्वज्ञानाहितसंस्कारविषयकालस्य प्रतिबन्धकत्वाभिधानं चिन्तामणिकृतः किमर्थं? कथं वा तत्रापि रोगादिना संस्कारविनाशे समयस्य स्वतो विशेषात्प्रहराभ्यन्तरे न दाहः। प्रहरादूर्ध्वमपि संस्कारानुवृत्तौ न दाहप्रतिबन्ध इत्यादि चिन्त्यम्। तृणारणिमणिभवस्याशुशुक्षणेनैकजात्यमप्यन्यथोपपत्तेर्न शक्तिगमकमित्याह । न च तार्णादाविति । पवनादीति । तदुत्कर्षेण वन्हेरुत्कर्षादिति भावः । आदिपदेन दाहकस्य स्पर्शवदवयवतत्संयोगसङ्ग्रहः । न च शक्तिकल्पनेप्यैकजात्यमुपपाद्यत इति मुधा तत्कल्पनमित्याह। शक्तिवादिनापीति। न स्यादिति । दृश्यते चेति शेषः । जागरूकत्वादिति ।

व्यक्तिविशेषान्वयव्यतिरेकयोः रासभादिसाधारणत्वादिति । मैवं । तुल्यत्वात् । तत्रापि हि नैकशक्तिमत्त्वेन कारणत्वं गृह्यते किन्तु कारणत्वग्रहानन्तरं शक्तिकल्पनं युक्तम् । अन्यथा रासभस्यापि वन्हिशक्तिकल्पनाप्रसङ्गात् । तथापि सुहृद्भावेन यदि पृच्छसि तदोच्यते । यज्जातीयमेलकात् तृणासमवधाने(१) कार्यं न जायते तज्जातीयमेलकादेव तृणसमवधाने जायत इत्येवंरूपान्व-

व्याप्तिग्रहविघटनाय प्रवर्तमानत्वादित्यर्थः । तृणादिकारणताया अन्यथानुपपत्तेरवश्यं तृणादावेकजातीयशक्तिरभ्युपगन्तव्या विजातीयेष्वेकशक्तिकत्वानभ्युपगमस्यौत्सर्गिकत्वेनाप्युपपत्तेरिति शङ्कते तथापीति । कथमिति । किञ्च वन्हिसामान्ये उत तद्विशेषे इत्यर्थः । नाद्य इत्याह तेषामिति । न द्वितीय इत्याह दहनावान्तरेति । नन्वस्तु तृणाद्यन्यतमत्वेन वन्हिसामान्य एव कारणतेत्याशंक्याह । न चान्यतमत्वमिति । विशकलितेति । निर्मन्थने तृणस्य फूत्कारेण मणेस्तरणिकिरणैश्चारणैरित्यादिरूप इत्यर्थः । यथा तृणादीनामन्यतमत्वेन वन्हिकारणत्वम् एवमेव फूत्कारादीनां तथा च फूत्कारारणिसमवधाने कारणतावच्छेदकावच्छिन्नसकलसद्भावाद्वन्ह्युत्पत्तिर्दुर्वारेति भावः । यद्यप्येकजातीयशक्ति-

(१) तृणासमवधाने— नास्ति १ पु० ।

वर्तते । एककर्तृकादिति च पूर्वकालत्वं संभवतः संबन्धनीयम् । मूलकोपदंशं भुङ्क्ते । मूलकेनोपदंशं भुङ्क्ते । वा णादीतिविभाषया वाक्यः । इत ऊर्ध्वं यानि वाक्संज्ञकानि वक्ष्यन्ते तानि आदिग्रहणेन गृह्यन्ते सर्वत्रास्मिन् प्रकरणे वेत्यनुवर्तते तेन त्कापि भवति । मूलकेनोपदंश्य भुङ्क्ते । कर्मणः साधकतमत्वविवक्षायां भा भवति । अथवा उपदंशिगुणस्य भुञ्जेरेतत्करणम् ।

हिंस्यर्थादेककर्मकात् ॥ ३४ ॥

भायामिति वर्तते । हिंसार्थेभ्यो धुभ्योऽनुप्रयोगेणैककर्मकेभ्यः भांते वाचि णम् भवति । दण्डाघातं गाः सादयति । दण्डेनाघातम् । करणे इत्यनेन हन्तेर्घः पूर्वनिर्णयेन णम् विदितस्तस्यैवानुप्रयोगो द्रष्टव्यः । हन्तेरन्यदपीहोदाहरणम् । दण्डाताडं गाः कालयति । दण्डेनाताडम् । खड्गप्रहारं शत्रुन् विजयते । खड्गेन प्रहारम् । एककर्मकादिति किम् । दण्डेनाहत्य भूमिं गोपालको गाः सादयति ।

ईपि चोपपीडरुधकर्षः ॥ ३५ ॥

व्रजोपरोधम् । व्रजे उपरोधम् । व्रजेनोपरोधम् । उपाण्युपकर्षं धानाः पिनष्टि । पाणावुपकर्षम् । पाणिनोपकर्षम् ।

प्रमाणासत्त्योः ॥ ३६ ॥

ईपि भायां चेति वर्तते । प्रमाणमायाममानम् । आसत्तिः सन्निकर्षः । ईबन्ते भान्ते वाचि धोर्णम् भवति प्रमाणासत्योर्गम्यमानयोः । द्व्यङ्गुलोत्कर्षं गंडिका च्छिनत्ति । द्व्यङ्गुलोत्कर्षम् । द्व्यङ्गुलेनोत्कर्षम् । आसत्तौ केशग्राहं युध्यन्ते । केशेषु ग्राहं केशैर्ग्राहं सन्निकृष्टं युध्यन्ते इत्यर्थः । एवं अस्यपनोदं युध्यंते असिष्वपनोदम् । असिभिरपनोदम् । हस्तग्राहम् । हस्तेषु ग्राहम् । हस्तैर्ग्राहम् ।

त्वर्यपादाने ॥ ३७ ॥

त्वरणं त्वरा त्वरीति सौत्रभात्खम् । त्वरायां गम्यमानायां अपादाने वाचि घोर्णम् भवति । शय्योत्थायं धावति । शय्याया उत्थाय । मुखप्रक्षालनाद्यवश्यकार्यं कृत्वा त्वरत इत्यर्थः । एवं स्तनरंभापकर्षं पयः पिबति । स्तनरंभादपकर्षम् । भ्राष्ट्रापकर्षं मयूरान् भक्षयति । भ्राष्ट्रादपकर्षम् । वेत्यनुवर्तनात् शय्याया उत्थाय धावति । त्वरीति किम् । आसनादुत्थाय गच्छति ।

द्विपि ॥ २८ ॥

त्वरीति वर्तते । द्विबन्ते वाचि त्वरायां गम्यमानायां घोर्णम् भवति । यष्टिग्राहं युध्यन्ते । यष्टिं ग्राहम् त्वरया युद्धप्रहरणमनपेक्ष्य यष्टिमादाय युध्यते इत्यर्थः । एवं पटापकर्षं धावति पटमपकर्षम् । त्वरीत्येव खड्गं गृहीत्वा युध्यन्ते ।

स्वाङ्गे ध्रुवे ॥ ३९ ॥

द्विपीति वर्तते । यस्मिन्छिन्ने नष्टेऽपि प्राणिनां मरणं न भवति तदध्रुवं स्वाङ्गम् । तस्मिन्निबन्ते वाचि घोर्णम् भवति । अक्षिनिकाचं जल्पति । आक्षिणी निकोचम् । भ्रूक्षेपं जल्पति । भ्रुवं क्षेपम् अंगुलिनिकोटं जल्पति । अंगुलिं निकोटं जल्पति । अध्रुव इति किम् । शिर उत्क्षिप्य जल्पति । अद्रवं मूर्तिमत्स्वांगं प्राणिस्थमविकारजम् । अतस्थं तत्र दृष्टं च तेन चेत्तत्तथा युतम् । आद्यैश्चतुर्भिर्विशेषणैर्लालाबुद्धिफलशोफादिरहितप्राणिस्थं वस्तु स्वांगमुक्तम् । अतत्स्थं तत्रदृष्टं चेत्यनेन भूमिपतितकेशादिपरिग्रहः । तेन चेत्तत्तथायुतमित्यनेन काष्ठादिप्रतिमायां स्थितं पाण्यादि संगृहीतम् ।

सप्तलेपे ॥ ४० ॥

इपीति वर्त्तते स्वांग इति वा । सह क्लेशेन दुःखेन वर्त्तते इति सक्लेशं क्लिश्यमानमित्यर्थः । इबन्ते सक्लेशे स्वाङ्गे वाचि घोर्णम् भवति । ध्रुवार्थोऽयमारम्भः । उरःप्रतिपेषं युध्यन्ते । उरांसि प्रतिपेषम् । उरांसि पीडयन्तो युध्यन्ते इत्यर्थः । एवं शिरःप्रतिपेषम् । शिरांसि प्रतिपेषम् ।

विशिपतिपदिस्कंदो व्याप्यासेव्ययोः ॥ ४१ ॥

इपीति वर्तते । विश्यादिभिः कार्त्स्न्येन व्यापनीय द्रव्यं व्याप्यम् । क्रियारूपं तात्पर्येण आसेवनीयमासेव्यम् । क्रियाधारभूतमुपचाराद्द्रव्यमप्यासेव्यम् । विशि पति पदि स्कन्द इत्येतेभ्यो धुभ्यः व्याप्ये आसेव्ये च वाचि णम् भवति । गेहानुप्रवेशमास्ते । वृत्त्या व्यापनस्यासेवनस्य वोक्तत्वात् द्वित्वं न भवति । वाक्यपक्षे व्याप्यमानस्य द्रव्यस्य द्वित्वम् । आसेव्यविवक्षायां तु मुख्यस्यासेव्यस्य क्रियारूपस्य द्वित्वम् । गेहंगेहमनुप्रवेशमास्ते । गेहमनुप्रवेशमनुप्रवेशमास्ते । गेहानुप्रपातमास्ते । गेहंगेहमनुप्रपातम् । गेहमनुप्रपातमनुप्रपातमास्ते । गेहमनुप्रपादमास्ते । गेहं गेहमनुप्रपादम् । गेहमनुप्रपादमनुप्रपादम् । गेहावस्कन्दमास्ते । गेहं गेहमवस्कंदम् । गेहमवस्कंदमवस्कंदम् । वेत्यधिकारात् गेहं गेहमनुप्रविश्य गेहमनुप्रविश्यानुप्रविश्यास्ते । वीप्सायामाभीक्ष्ण्ये च द्वित्वम् । व्याप्यासेव्ययोरिति किम् । गेहमनुप्रविश्य भुङ्क्ते । णम् चाभीक्ष्ण इति यद्यप्यासेव्ये णम् सिद्धः । तथापि वाक्यविकल्पार्थमिदम् ।

तृष्यस्वोः क्रियान्तरे काले ॥ ४२ ॥

इपीति वर्तते । इबन्ते कालवाचिनि वाचि तृषि अस इत्येताभ्यां णम् भवति क्रियान्तरार्थे यद्यनुप्रयुज्यमानक्रियापेक्षया क्रियांतरे वृत्तिरित्यर्थः द्व्यहात्यतर्षं गाः पाययति ।

द्व्यहमपतर्षम् । त्र्यहापतर्षम् । त्र्यहमपतर्षम् । द्व्यहात्यासं गाः पाययति । द्व्यहमत्यासम् । त्र्यहमत्यासम् । कालाध्वन्यविच्छेद इतीप् । तृष्यस्वो रिति किम् । द्व्यहमुपोष्य भुङ्क्ते । क्रियांतर इति किम् । अहरत्यस्य गतः । अत्रास्यतिर्न क्रियान्तरे वर्तते किंतु रानावेव । काल इति किम् । पञ्च पूलान् अत्यस्य तिलान् भक्षयति ।

नाम्न्यादिशिग्रहः ॥ ४३ ॥

इपीति वर्तते । इवन्ते नामशब्दे वाचि आदिशिग्रहिभ्यां णम् भवति । नामादेशमाचष्टे । नामान्यादेशम् । नामग्राहमाकारयति । नामानि ग्राहम् ।

भावनिष्टोक्तौ कृञः त्काणमौ ॥ ४४ ॥

क्रिसंज्ञके वाचि अनिष्टोक्तौ गम्यमानायां कृञः त्काणमौ भवतः । वेत्यधिकारात् त्कात्ये सिद्धे पुनः त्काग्रहणं त्क इत्यनेन वृत्तिविकल्पार्थम् । भादीति तत्र वर्तते तेनोत्सर्गो त्कात्ये सविकल्पो न स्यात् । ब्राह्मण पुत्रस्ते जातः किं तर्हि वृषल नीचैःकृत्याचष्टे । नीचैः कृत्वा । नीचैःकारम् । उच्चैर्नाम प्रियमाख्येयम् । नीचैराख्यायमानमनिष्टं भवति । ब्राह्मण कन्या ते गर्भिणी । तर्हि वृषल उच्चैःकृत्याचष्टे । उच्चैःकृत्वा उच्चैःकारम् । कन्यागर्भः उच्चैराख्येयमानो अनिष्टः । अनिष्टोक्ताविति किम् । उच्चैःकृत्याचष्टे पुत्रस्ते जात ।

तिरश्च्यपवर्गे ॥ ४५ ॥

अपवर्गः समाप्तिः तिर्यच्छब्दे वाचि अपवर्गे गम्यमाने कृञः त्काणमौ भवतः । तिर्यक्कृत्य गतः । तिर्यक्कृत्वा । तिर्यक्कारम् । समाप्य गत इत्यर्थः । अपवर्ग इति किम् । तिर्यक् कृत्वा काष्ठं गतः । तिरश्चीति तिर्यक्छब्दानुकरणनिर्देशः । प्रकृतिवदनुकरणं भवतीति रूपसिद्धिः ।

स्वाङ्गेतस्त्ये कृभुवः ॥ ४६ ॥

तस्त्यो यस्मात्तत्तथोक्तम् । तस्त्ये स्वाङ्गे वाचि कृ भू इत्येताभ्यां त्काणमौ भवतः । भिन्नयोगनिर्दिष्टत्वाद्यथासंख्यमत्र न भवति । मुखतःकृत्य गतः । मुखतः कृत्वा । मुखतःकारम् । पृष्ठतःकृत्य पृष्ठतः कृत्वा । पृष्ठतःकारम् । मुखतोभूय । मुखतोभूत्वा । मुखतोभावम् । पृष्ठतोभूय । पृष्ठतोभूत्वा । पृष्ठतोभावम् । अपादानेदीयरुहोरिति आदिभ्य उपसंख्यानमिति वा तसिः । स्वाङ्ग इति किम् । सर्वतःकृत्वा । तस्त्यग्रहणं किम् । मुखीकृत्य गतः । त्यग्रहणं किम् । मुख्ये तस्यति मुख्यतः अमुखतसं मुखतसं कृत्वा मुखतःकृत्य ।

नाधार्थत्ये च्व्यर्थे ॥ ४७ ॥

नार्थो धार्थश्च त्यो यस्मात्स तथोक्तः । नार्थत्ये धार्थत्ये च शब्दे च्व्यर्थे वाचि कृभू इत्येताभ्यां त्काणमौ भवतः विनाकृत्य गतः । विनाकृत्वा । विनाकारम् । विनाभूय । विना भूत्वा । विनाभावम् । अनाना नाना कृत्य गतः । नानाकृत्वा । नाना कारम् । नानाभूय । नानाभूत्वा । नाना भावम् विनञ्भ्यां नानाञौ नसह इति नानाञौ भवतः । धार्थत्ये अद्विधा द्विधा कृत्य गतः । द्विधाकृत्वा । द्विधाकारम् । द्विधाभूय । द्विधाभूत्वा । द्विधाभावम् । अद्वैधं द्वैधं कृत्य गतः । द्वैधं कृत्वा । द्वैधंकारम् । द्वैध भूय । द्वैधं भूत्वा । द्वैधं भावम् । अद्वेधा द्वेधा कृत्यगतः । द्वेधाकृत्वा । द्वेधाकारम् । द्वेधाभूय । द्वेधाभूत्वा । द्वेधाभावम् । संख्यायाविधार्थेधा । द्वित्रेमञ् । एकधा । एकच्व्यंविधातंअर्थग्रहणं स्वरूपमात्रनिरासार्थम् । त्यग्रहणं किम् । नाधार्थे वाचीत्युच्यमाने इहापि स्यात् । अहिरुक् हिरुक्कृत्वा पृथक्कृत्वा च्विर्विकल्पेन विधास्यते ।

ऽध्यर्थनात्रमत्र विवक्षितं न च्विः । अर्थ इतिकिम् । नाना कृत्वा काष्ठानि गतः ।

तूष्णीमि भुवः ॥ ४८ ॥

तूष्णीम्शब्दे वाचि भूइत्येतस्मात् क्त्वाणमौ भवतः । तूष्णींभूयास्ते । तूष्णींभूत्वा । तूष्णींभावः ।

अन्वच्यानुलोम्ये ॥ ४९ ॥

आनुलोम्यमनुकूलता । अन्वच्छब्दे वाचि आनुलोम्ये गम्यमाने भुवः क्त्वाणमौ भवतः । अन्वग्भूत्वा । अन्वग्भावम् । आनुलोम्य इति किम् । अन्वग्भूत्वा आस्ते । पश्चाद्भूत्वेत्यर्थः । अन्वचीति निर्देशः प्रकृतिवदनुकरणमिति न्यायात् ।

शकधृषज्ञाग्लाघटरभलभक्रमसहार्हास्त्यर्थे तुम् ॥ ५० ॥

शकादिषु अस्त्यर्थेषु च धुषु वाक्षु धोस्तुम् भवति । शक्नोति भोक्तुम् । धृष्णोति भोक्तुम् । जानाति भोक्तुम् । ग्लायति भोक्तुम् । घटते भोक्तुम् । आरभते भोक्तुम् । लभते भोक्तुम् । प्रक्रमते भोक्तुम् । सहते भोक्तुम् । अर्हति भोक्तुम् । अस्त्यर्थेषु अस्ति भोक्तुम् । भवति भोक्तुम् । विद्यते भोक्तुम् । क्रियायां तदर्थायां वाचि तुम् विहितः अतदर्थायामपि यथा स्यादित्यारम्भः ।

पर्याप्तिवचनेऽलमर्थे ॥ ५१ ॥

पर्याप्तिः प्रभूतत्वं सामर्थ्यं च अलमर्थेन विशेष्यमाणत्वात्सामर्थ्यमेवावतिष्ठते । पर्याप्तिवचनेष्वलमर्थे विशिष्टे वाक्षु धोस्तुम् भवति । पर्याप्तो भोक्तुम् । समर्थो भोक्तुम् । प्रभुर्भोक्तुम् । अलं भोक्तुम् । पारयति भोक्तुम् । इदमप्यस्योदाहरणं युक्तम् । पुनरिदं विचारयितुं वाभादीति षसो न भवति ।

असमेवेति तत्र वर्तते । पर्याप्तिवचन इति किम् । अलङ्कृते कन्याम् । अलं रुदित्वा । समर्थेति वक्तव्ये गुरुकरणं किम् । सामर्थ्यमात्रे मा भूत् । शक्त्या भुङ्क्ते । बलेन भुङ्क्ते । असमर्थे इति किम् । पर्याप्तं भुङ्क्ते । प्रभूतं भुङ्क्ते । अन्यूनं भुङ्क्ते । पूर्वसूत्रे शक्तिः सौकर्ये वर्तते नालमर्थे ।

कर्तरि कृत् ॥ ५२ ॥

कर्तरि कारके कृत्संज्ञास्तथा भवन्ति । अनिर्दिष्टार्था-स्तथाः स्वार्थे भावे प्राप्ताः । कारकः । कर्ता । ये कृतः कर्तरि नेष्टाः तेषां करणाधिकरणयोर्युडित्येवमादिरपवाद उक्तः ।

भव्यगेयप्रवचनीयोपस्थानीयजन्याप्लाव्यापात्या वा ॥ ५३ ॥

भव्य इत्येवमादयः शब्दाः कर्तरि वा निपात्यन्ते । तयोर्व्यक्खलार्था इत्यस्मिन् प्राप्ते पक्षे कर्तरि विधानम् । भवत्यसौ भव्यः । भव्यमनेनेति वा । गेयो माणवकः षडङ्गस्य । गेयो माणवकेन षडङ्गः । प्रवचनीयो गुरुः शास्त्रस्य । प्रवचनीयं शास्त्रं गुरुणा । उपस्थानीयः शिष्यो गुरोः । उपस्थानीयो गुरुः शिष्येण । जायते असौ जन्यः । जन्यमनेन । जनिवध्योरित्यैप् प्रतिषेधः । अथवा शकिसहश्चेति चकारेण जनेर्यः । आप्लवतेऽसौ आप्लाव्यः । आप्लाव्यमनेन । आपततीत्यापात्यः । आपात्यमनेन ।

लः कर्मणि च भावे चाधेः ॥ ५४ ॥

ल इति लडादीनां नवानामुत्सृष्टानुबन्धनां सामान्येन ग्रहणं जसा च निर्देशः । लकाराः सकर्मकेभ्यो धुभ्यः कर्मणि कर्तरि च कारके भवन्ति भावे कर्तरि च धिसंज्ञेभ्यः । कर्मणि । क्रियते कटः । गम्यते ग्रामः । कर्तरि करोति कटम् ।

गच्छति ग्रामम् । घेर्भावे । आस्यते भवता । सुप्यते । कर्तरि आस्ते भवान् । स्वपिति भवान् । लौङ्चेति वक्तव्ये प्रपञ्चेन निर्देशः क्निर्थः सकर्मकेभ्यो लो भावे मा भूवन् ।

तयोर्व्यक्तखार्थः ॥ ५५ ॥

तयोर्भावकर्मणोः व्यसंज्ञाश्च क्तश्चखार्थाश्च भवन्ति । कर्तरि कृदित्यस्यायमपवादः । कर्मणि कर्तव्यः कटो भवता । भोक्तव्यः ओदनो भवता । भावे आसितव्यं भवता । शयितव्यं भवता । क्तः कर्मणि कृतः कटो भवता । सुकरः कटो भवता । सुपानं पयो भवता । दुःपानं पयो भवता । भावे स्वासं भवता । दुरासं भवता । सुग्लानं भवता । दुग्लानं भवता । आत्मकर्मविवक्षायां व्यक्तखार्थप्रयोगविषये सकर्मकाऽप्यविवक्षितकर्मकत्वेनाकर्मकात्तः । तेन भावे व्यादयः । भेत्तव्यं कुसूलेन स्वयमेव । भावकर्मग्रहणे तु वर्तमाने तयोरिति ग्रहणं यथाविधिप्रतिपादनार्थं सकर्मकेभ्यः कर्मणि अकर्मकेभ्यो भावे इति ।

कर्तरि चारम्भे क्तः ॥ ५६ ॥

आरम्भः आद्यः क्रियाक्षणः आरम्भे यो धुर्वर्तते तस्माद्यः क्तः स कर्तरि भवति यथाप्राप्तं च भावकर्मणोः । प्रकृतो भवान् कटम् । प्रकृतः कटो भवता । प्रकृतं भवता । प्रभुक्तो भवानोदनम् । प्रभुक्तः ओदनो भवता । प्रभुक्तं भवता । धिभ्यस्तु धिगत्यर्थाच्चेति वक्ष्यति । आद्यक्रियाक्षणकाले । कटो नाभिनिर्वृत्तः तस्योपचारात् भूतकालेन प्रकृतशब्देन सामानाधिकरण्यम् ।

श्लिषशीङ्स्थासवसजनरुहजॄषश्च ॥ ५७ ॥

श्लिषादिभ्यः कर्तरि क्तो भवति यथाप्राप्तं च भावकर्मणोः ।

धिगत्यर्थाच्चेतिसिद्धे इह सकर्मकार्थमुपादानम् । इदमेव ज्ञापकम् । अकर्मका अपि भवन्ति । आश्लिष्टःकन्यां देवदत्तः । आश्लिष्टा कन्या देवदत्तेन । आश्लिष्टं देवदत्तस्य । अतिशयितो गुरुं भवान् । अतिशयितो भवता गुरुः । अतिशयितं भवतः । उपस्थितो गुरुं भवान् । उपस्थितो भवता गुरुः । उपस्थितं भवतः । उपासितो गुरुं भवान् । उपासितो भवता गुरुः । उपासित भवतः । अनूषितो गुरुं भवान् । अनूषितो भवता गुरुः । अनूषितं भवतः । अनुजातो माणवको माणविकाम् । अनुजाता माणविका माणवकेण । अनुजातं माणवकस्य । आरूढो वृक्षं देवदत्तः । आरूढो वृक्षो देवदत्तेन । आरूढं देवदत्तस्य । अनुजीर्णो वृषलीं देवदत्तः । अनुजीर्णा वृषली देवदत्तेन । अनुजीर्णं देवदत्तस्य । रुहेरगत्यर्थत्वादन्यदपि गत्यर्थकार्यं न भवति । आरोहयति वृक्षं देवदत्तेन । कर्मसंज्ञा न भवति ।

धिगत्यर्थाच्च ॥ ५८ ॥

धिसंज्ञेभ्यः गत्यर्थेभ्यश्च धुभ्यः क्तस्त्यः कर्तरि भवति यथाप्राप्तं च । आसितो भवान् । आसितं भवता । शयितो भवान् । शयितं भवता । गत्यर्थेभ्यः गतो भवान् ग्रामम् । गतो भवता ग्रामः । गतं भवता । यातो भवान् । यातो भवता ग्रामः । यातं भवता । कालभावाध्वभिः कर्मभिः सकर्मकवद्भवति ॥ वत्करणात् स्वाश्रयमपि भवति । अतस्त्रैरूप्यम् । सुप्तो भवान् मासम् । सुप्तो भवता मासः । सुप्तं भवता मासम् । ओदनपाकं सुप्तो भवान् । ओदनपाकः सुप्तो भवता । ओदनपाकं सुप्तं भवता । क्रोशं सुप्तो भवान् । क्रोशः सुप्तो भवता । क्रोशं सुप्तं भवता ।

अधिकरणे चाद्यर्थाच्च ॥ ५८ ॥

क्त इति वर्तते अद्यर्था अभ्यवहारार्थाः । अद्यर्थेभ्यो ध्रिगत्यर्थेभ्यश्च क्तोऽधिकरणे भवति कर्तरि वा कर्मणि । यथाप्राप्तं च कर्तृकर्मभावेषु अद्यर्थेभ्यः अधिकरणकर्मभावेषु क्तः अधिकरणे अस्मिन्निमे भुञ्जते स्म इदमेषां भुक्तम् । इदमेषां पीतम् । क्तस्याधिकरण इति कर्तरि ता । कर्मणि एभिर्भुक्त ओदनः । एभिः पीतं मधु । भावे भुक्तं एभिः । पीतमेभिः । ध्रिभ्यः अधिकरणकर्तृभावेषु क्तः अधिकरणे इदमेषामासितम् । आसितो भवान् । आसितं भवता । गत्यर्थेभ्यः अधिकरणकर्तृकर्मभावेषु क्तः अधिकरणे इदमेषां यातम् । यातो देवदत्तो ग्रामम् । यातो देवदत्तेन ग्रामः । यातं देवदत्तेन । इह विभुक्ताः भ्रातरः पीता गावः इति मत्वर्थीयोऽकारः ।

दासगोघ्नौ संप्रदाने ॥ ६० ॥

दासगोघ्न इत्येतौ शब्दौ निपात्येते संप्रदाने कारके दासन्ति तस्मै दासः । गां हन्ति अस्मै आगताय गोघ्नोऽतिथिः । टगत्र निपात्यः । स्त्रियां गोघ्नी देवदत्ता ।

भीमादयोऽपादाने ॥ ६१ ॥

भीमादयः शब्दाः अपादाने कारके ज्ञातव्याः । भीमादयः शब्दा अन्यत्र साधिताः कारकनियमार्थमिह तेषां पाठः । बिभेत्यस्मादिति भीमः । भीष्मः । भयानकः । चरुः । प्रस्कन्दनम् । प्रपतनम् । समुद्रवन्त्यस्मात् समुद्रः । स्रुवः । स्रुक् । भृष्टिः । रक्षः । संकसंति तस्मात् संकसुकः । खलिनः ।

उणादयोऽन्यत्राभ्याम् ॥ ६२ ॥

उणादयस्ताभ्यां संप्रदानापादानाभ्यामन्येषु कारकेषु भवन्ति । करोतीति कारुः । वृश्चति तं वृक्षः । कषितो

ऽसौ ऋषिः । ततोऽसौ तन्तुः । वृत्तं तत्र वर्त्म । चरितं तत्रेति चर्म । भक्षितं तत्रेति भस्म । ऋचन्ति तया ऋक् ।

लस्य ॥ ६३ ॥

अकार उच्चारणार्थः । लस्येत्ययमधिकारः । यदित ऊर्द्धमनुक्रमिष्यामः लस्य स्थाने तद्वेदितव्यम् । नव लकाराः पञ्च टितश्चत्वारो ङितः लट् लिट् लुट् लृट् लोट् लङ् लिङ् लुङ् लृङ् एषामनुबन्धापायेन लकारमात्रं स्थानित्वेनाधिक्रियते । त्य इति वर्तते । धोरिति च । धोर्विहितस्य त्यस्य लकारस्य ग्रहणात् लभते चूडाल इत्येवमादि परिहृतम् ।

मिब्वस्मस्सिप्थस्थतिप्तस्झीड्वहिमहियासाथांध्वंतातांझङ् ॥ ६४ ॥

लस्य स्थाने मिबादयः आदेशा भवन्ति । पकारः गोऽपिदिति विशेषणार्थः । इटष्टकारोरत्र्नज्झेट इति विशेषणार्थः । झङो ङकारः प्रत्याहारार्थः । पचामि । पचावः । पचामः । पचसि । पचथः । पचथ । पचति । पचतः । पचन्ति । टितां दविषये आदेशान्तराणि वक्ष्यन्ते । लिटो मानां णलादयः आदेशाः वक्ष्यन्ते । लुट् पक्तास्मि । पक्तास्वः । पक्तास्मः । इत्येवमादि ज्ञेयम् । लृट् पक्ष्यामि । पक्ष्यावः । पक्ष्यामः । लोट आदेशाः वक्ष्यन्ते ङितां लकाराणां मविषये च इह तानुदाहरिष्यामः । लङ् । अपचे । अपचावहि । अपचामहि । वक्ष्यते लिङ । लुङ् । अपक्षि । अपक्ष्वहि । अपक्ष्महि । लृङ् । अपक्ष्ये । अपक्ष्यावहि । अपक्ष्यामहि ।

टिद्वटेरे ॥ ६४ ॥

टितां लकाराणां ये दास्तेषां टेरेत्वं भवति । यत्र एक एवाच् तत्र व्यपदेशिवद्भावाददन्तत्वमुक्तम् । यत्र च तदादिरन्ये

नास्ति तत्रापि व्यपदेशिवद्भावात्तदादित्वम् । पचे । पचावहे । पचामहे । थासःसे इति वक्ष्यति । पचसे । पचेथे । पचध्वे । पचते । पचेते । पचन्ते । लिट् । पेचे । पेचिवहे । पेचिमहे । लुट् । पक्ताहे । पक्तास्वहे । पक्तास्महे । लृट् । पक्ष्ये । पक्ष्यावहे । पक्ष्यामहे । लोटो वक्ष्यति प्रकृतानां मिटां दस्य टेरैत्वम् । तेनेह न भवति पचान इति ।

थासः से ॥ ६५ ॥

टिद्ग्रहणमनुवर्तते । टितो लकारस्य थासः स इत्ययमादेशो भवति । पचसे । पेचिषे पक्तासे । पक्ष्यसे । एशिरेसेविधानेषु किं स्यादेत्वे प्रयोजनम् । आदेशे तु कृते मा भूत् ज्ञापकं भवितादिषु ।

लिटस्तझयोरेशिरे ॥ ६६ ॥

लिटादेशयोस्त झ इत्येतयोः एश् इरे इत्येतावादेशौ भवतः । शकारः सर्वादेशार्थः परस्यादिर्मा भूत् । पेचे । पेचिरे । नेमे । नेमिरे ।

मानां णल्वमथाथुसणलतुसुसः ॥ ६७ ॥

लिट इति वर्तते । लिटो मानां स्थाने यथासंख्यं णलादयो नव आदेशा भवन्ति । णकारः ऐवर्थः । लकारः सर्वादेशार्थः । अ इति द्वयोरकारयोः प्रश्लेषनिर्देशः सर्वादेशार्थः । अत्यस्याकारस्याकारवचने प्रयोजनाभावात् सर्वादेश इति चेत् समसंख्यत्वं प्रयोजनं संभाव्येत । अथवा थेरिति कानिर्देशात् परस्यादेः थकारस्याकारः । पपाच । पेचिव पेचिम । पपक्थ । पेचिथ । पेचथुः । पेच । पपाच । पेचतुः । पेचुः । थेचोपदेशः इत्यादिना वेट् । थेटीति एत्वं च । वमयोः क्र्यादित्तिनियमादिट् ।

विदो लटो वा ॥ ६८ ॥

मानामिति वर्तते । वेत्तेरुत्तरेषां लटो मानां स्थाने वा णलादयो भवन्ति । वेद । विद्व । विद्म । वेत्थ । विदथुः । विद । वेद । विदतुः । विदुः । न च भवन्ति । वेद्मि । विद्वः । विद्मः । वेत्सि । वित्थः । वित्थ । वेत्ति । वित्तः । विदन्ति । विदेरिति कानिर्देशात् ज्ञानार्थस्य ग्रहणं लाभार्थस्य शेन व्यवधानात् ।

ब्रुव आहश्च ॥ ६९ ॥

मानामिति वर्तते । लटो वेति वर्तते । ब्रुव उत्तरस्य लटो मानां वा णलादयो भवन्ति । तत्सन्नियोगे ब्रुव आहादेशः । अकार उच्चारणार्थः । तथास्मद इत्युत्तरत्र प्रतिषेधात् अत्र पञ्च ग्रहणम् । आत्थ । आहथुः । आह । आहतुः । आहुः । सिपस्थे कृते आहस्थ इति हकारस्य थकारः । खरीति चर्त्वम् । यद्यत्र स्थानिवद्भावात् ब्रुव ईडिति ईट् स्यात् झलादिप्रकरणे आहस्थ इति वचनमनर्थकं स्यात् । न च भवति । ब्रवीषि । ब्रूथः । ब्रवीति । ब्रूतः । ब्रुवन्ति ।

न थास्मदः ॥ ७० ॥

ब्रूञः परस्य थस्यास्मदश्च पूर्वोक्ता आदेशा न भवन्ति । ब्रूथ । ब्रवीमि । ब्रूवः । ब्रूमः ।

लोटो लङ्वत् ॥ ७१ ॥

लोटो लङ इव कार्यं भवति । लोडादेशानां लङादेशानामिव कार्यमतिदिश्यते इत्यर्थः । पचाव । पचाम । ङितः सखं सिद्धम् । पचतम् । पचत । पचताम् मिप्थस्थतसोमृतंतामेतेत सिद्धम् । एरुरिति उकारः पुरस्तादपवादन्यायेन एमुइति इखमेव बाधते न जुसादेशम् । एवं च यथा अदुः अधुरिति

भवति तथा यान्तु पान्तु इत्यत्रापि जुसादेशः प्राप्नोति नैष दोषः वक्ष्यते आत लङो वेत्यत्र लङ्ग्रहणस्य प्रयोजनं लङेव यो लङ् तस्य जुस् भवति अतिदेशेन यो लङ् तस्य मा भूत् लङ्वदिति तांताद्वत् तेनाडागमो न भवति ।

एरुः ॥ ७२ ॥

लोट इति वर्तते । मानामिति च । लोटो मानामिकारस्य उकारादेशो भवति । इत्वस्यापवादः । पचतु । पचन्तु । करोतु । कुर्वन्तु । मिप्सिपोरादेशान्तरमुत्वस्य बाधकं वक्ष्यते ।

सेर्ह्यपिच्च ॥ ७३ ॥

लोट इति वर्तते । सेर्हिरादेशो भवति अपिच्च । लुनीहि । आप्नुहि । राध्नुहि ।

मेर्निः ॥ ७४ ॥

लोटो मेर्निरित्ययमादेशो भवति । पचानि । करवाणि ।

आमेतः ॥ ७५ ॥

लोट इति वर्तते । लोडादेशस्थ एकारः तस्य आमित्ययमादेशो भवति । निर्दिश्यमानस्यादेशो भवति । पचेथाम् । पचताम् । पचेताम् । पचन्ताम् ।

स्वोवामौ ॥ ७६ ॥

लोट इति वर्तते एत इति च । सकारवकाराभ्यां परस्य एत अम् इत्येतावादेशौ भवतः । पचस्व । पचध्वम् । वयस्व । वयध्वम् ।

पिच्चाडस्मदः ॥ ७७ ॥

लोट इति वर्तते । लोटोऽस्मदः आडागमो भवति

पिच्च । करवाणि । करवाव । करवाम । करवै । करवावहै । करवामहै ।

एत ऐ ॥ ७८ ॥

लोटोऽस्मद इति वर्तते । लोटोऽस्मदः एकारस्यैकारादेशो भवति । निर्दिश्यमानस्यादेशोऽयमामोपवादः । करवै । करवावहै । करवामहै । चिनवै । चिनवावहै । चिनवामहै ।

ङितः सखम् ॥ ७९ ॥

अस्मद इत्येव । ङितो लकारस्य योऽस्मत्तस्य सखं भवति । लङ् । अपचाव । अपचाम । लिङ् । पचेव । लुङ् । अपाक्ष्व । अपाक्ष्म । लृङ् । अपक्ष्याव । अपक्ष्याम ।

इर्मे ॥ ८० ॥

ङित इति वर्तते ङिल्लकारसम्बन्धिन इकारस्य खं भवति मविषये । लङ् । अपचः । अपचत् । अपचन् । लिङ् । पचेरन् । पचेत् । लुङ् । अपाक्षीः । अपाक्षीत् । लृङ् । अपक्ष्यः । अपक्ष्यत । अपक्ष्यन् । म इति किम् । अपचावहि । अपचामहि ।

मिप्थस्थतसोऽम्तंतताम् ॥ ८१ ॥

ङितां लकाराणां मिप् थस् थ तस् इत्येतेषां यथासंख्यं अम् तं त ताम् इत्येते आदेशा भवन्ति । अपचम् । अपचतम् । अपचतम् । अपचताम् । लिङ् । पचेयम् । पचेतम् । पचेत । पचेताम् । लुङ् । अपाक्षम् । अपाक्तम् । अपाक्त । अपाक्ताम् । वद्व्रजेत्यादिनैप् । झलो झलीति सखम् । लृङ् अपक्ष्यम् । अपक्ष्यतम् अपक्ष्यत । अपक्ष्यताम् ।

लिङः सीयुट् ॥ ८२ ॥

लिङादेशानां सीयुडागमो भवति । मेयासुटो विधानाद्दे सीयुट् द्रष्टव्यः । टकारः टिदादिरिति विशेषणार्थः । उकार

उच्चारणार्थः । पचेय । पचेवहि । पचेमहि । पचेथाः । पचेयाथाम् । पचेध्वम् । पचेत । पचेयाताम् । पचेरन् । रुदादेग इति वर्तमाने लिङोऽनन्त्यसखमिति सीयुट्सकारस्य सुट्तथोरिति सुट्सकारस्य च खम् । आशिषि लिङ् । पक्षीय । पक्षीवहि । पक्षीमहि । पक्षीष्ठाः । पक्षीयास्थाम् । पक्षीध्वम् । पक्षीष्ट । पक्षीयास्ताम् । पक्षीरन् ।

यासुण् भो ङित् ॥ ८३ ॥

लिङ इति वर्तते । लिङो भविषयस्य यासुडागमो भवति ङिच्च । सीयुटो ऽपवादोऽयम् । अत्र किदाशिषीति वचनात् विध्यादिलक्षणस्य लिङ इहोदाहरणम् । कुर्याम् । कुर्याव । कुर्याम । कुर्याः । कुर्यातम् । कुर्यात । कुर्यात् । कुर्याताम् । कुर्युः । कृञो ये च इति विकरणस्य खम् । झेर्जुसीति जुस् उसीति पररूपम् । स्थानिवद्भावादेव लिङादेशस्य ङित्वे सिद्धे यासुटो ङिद्वचनं ज्ञापकं लकाराश्रयमादेशानां ङित्वं टित्वं च न भवति तेन अचिनवमित्येप् सिद्धः । पचमाना स्त्री टित इति ङीत्यो न भवति ।

किदाशिषि ॥ ८४ ॥

आशिषि लिङो यासुट् किद्भवति । ङित्वे प्राप्ते कित्वं विधीयते । ज्यर्थं जागर्तेरैवर्थं च । उह्यासम् । उह्यास्व । उह्यास्म । उह्याः । उह्यास्तम् । उह्यास्त । उह्यात् । उह्यास्ताम् । उह्यासुः । जागर्यासम् । जागर्यास्व । जागर्यास्म । जागुरविजिणलिङतीत्येस् ।

रन्नज्भेटः ॥ ८५ ॥

लिङादेशयोर्झ इट् इत्येतयोर्यथासंख्यं रन् अत इत्येतावादेशौ भवतः । पचेरन् । पक्षीरन् । झोन्तइत्यस्यायमपवादोऽयम् । पक्षीय । क्षीयाशीः प्रैषेषु मिङाकांक्षमित्येवमादिना प्राप्तस्य पस्य निवृत्त्यर्थं तपरकरणम् ।

राजदंतादौ । २ । १ । १०९ ।
राजन्वान् सुराज्ञि ।
१ । २ । १०० ।
राजन् सखेः । २ । १ । १६९ ।
राजन्यमनुष्ययोर्नोक्ते ।
२ । ३ । ८० ।
राजन्यादिभ्यो वुञ् ।
२ । ४ । १९७ ।
राजपौरुष्यं । २ । ३ । १०९ ।
राजसहात्कुञ्युधिभ्यां ।
४ । ३ । १९६ ।
रात्सः । १ । २ । ९३ ।
रात्र्यहस्संवत्सराच्च द्विगोर्वा ।
३ । २ । १०६ ।
रात्रौ वसोऽन्त्ययामास्वापेऽद्य
। ४ । ३ । २०६ ।
राधीक्ष्यौ यद्दैवे । १ । ३ । १४६ ।
राधेर्वधे । ४ । १ । ६ ।
रायः स्मिः । १ । २ । २२० ।
राल्लुक् । ४ । १ । १४३ ।
राष्ट्रराज्ञस्सरूपाद्राजापत्येऽञ्-
त्रिः । २ । ४ । ९८ ।
राष्ट्राख्यात् ब्राह्मणः ।
२ । १ । १७१ ।
राष्ट्रेभ्यः । ३ । १ । ३६ ।
राष्ट्रेऽनंगादिभ्यः ।
२ । ४ । १८८ ।

रिः । ४ । २ । १५ ।
रिङ्गुणः सदृशे वा ।
२ । ३ । १४ ।
रीमृत्वतां । ४ । १ । ९० ।
रीस्योः । १ । १ । १०८ ।
रुचलार्थादकर्मकात् ।
४ । ३ । २३६ ।
रुच्याव्यथ्यौ । ४ । ३ । ४८ ।
रुजोऽज्वरिसंताप्योः कर्तरि
भावे । १ । ३ । ११२ ।
रुद्विन्मुषिग्रहिस्वपूप्रच्छां
सनि च । ४ । १ । १५९ ।
रुधः । ४ । ३ । ४१ ।
रुधराधोऽपात् । ४ । ३ । ९१ ।
रुधां नं न्लुक् च । ४ । ३ । ३४ ।
रुवति मृगे । ३ । १ । ११० ।
रुहः पः । ४ । १ । १९६ ।
रुचिकल्टप्यर्थधारिभिः प्रेयवि
कारोत्तमर्णेषु ।
१ । ३ । १४३ ।
रूढादिभ्यः । १ । ३ । ४ ।
रूपकल्पङगोत्रमतहतचेलड्ब्रु-
वेह्रस्वश्च वोगितः ।२।२।५२।
रूपात् शस्ताहतात् । ३।३।१५९।
रूप्योत्तरपदादरण्याण्णः ।
३ । १ । १ । १६ ।
रेनूसेलवुरप्येन्याङ्ढण्फण्फि-

तत्र घटप्रतियोगिकत्वाभावरूपभेदज्ञानं, तज्ज्ञाने च तदभावरूपाभेदज्ञानमिति परस्पराश्रयान्न भेदः प्रामाणिक इत्यर्थः ।

ननु भेदस्य दुर्निरूपत्वे तदभावरूपाभेदस्यापि तथात्वापत्त्या तस्य शास्त्रप्रतिपाद्यत्वानुपपत्तिरित्यत आह-शास्त्रेति । अनिर्वचनीयभेदाधिष्ठानस्य सच्चिदानन्दात्मनः स्वरूपतो निष्प्रतियोगिकस्यैव भेदसत्ताविरोध्यभेदात्मना शास्त्रे प्रतिपाद्यमानत्वान्न तस्य दुर्निरूपत्वादिकमित्यर्थः । तादात्म्यस्य भेदप्रतियोगित्वादेरनङ्गीकारान्नोक्तदोषावकाश इति कश्चित्तार्किकंमन्यः शङ्कते—अथेति । तर्हि निष्प्रतियोगिको भेदोऽनुपपन्न इत्यत आह-किं त्विति । संसर्गाभावेऽपि घटादेरेव प्रतियोगित्वादन्योन्याभावरूपभेदस्यापि तत्प्रतियोगिकत्वे तस्य संसर्गाभावाद्भेदो न स्यादित्युक्तमपवदति—न चैवमिति । एकप्रतियोगिकत्वेऽपि लक्षणभेदाद्भेद इत्यभिप्रेत्य तयोर्लक्षणभेदमाह-अधिकरणेति । अप्रसक्तप्रतिषेधायोगात् प्रसक्तिपूर्वकप्रतिषेधो वाच्यः । तथा चाभावाधिकरणविषयको यः प्रतियोग्यारोपः, तज्जन्यं यज्ज्ञानं तद्विषयाभावत्वं संसर्गाभावस्य लक्षणम् । अभावाधिकरणविषयको यः प्रतियोगितावच्छेदकारोपः तज्जन्यं यज्ज्ञानं तद्विषयाभावत्वमन्योन्याभावस्य लक्षणमिति लक्षणभेदादभावभेद इत्यर्थः ।

एकस्यैव घटस्य चक्षुःस्पर्शन(१)जन्यज्ञानद्वयविषयत्व-

(१) स्पर्शनम्—स्पृश्यते अनेनेति व्युत्पत्त्या त्वगिन्द्रियमित्यर्थः ।

वत् त्वदुक्तारोपद्वयजन्यज्ञानद्वयविषयत्वस्यैकाभावेऽपि संभवान्न ततोऽभावभेदसिद्धिरिति दूषयति-न ग्राहकेति ।

न, ग्राहकभेदेऽपि प्रतियोगितदवच्छेदकभेदाभावेन ग्राह्यभेदाभावात् । अभावप्रतीतेस्त्वदभिमतारोपाजन्यत्वात्। तत्पूर्वं(२)तत्सत्त्वे प्रमाणाभावाच्च । न चाभावप्रतीतिवैलक्षण्यमेव पूर्वं तत्सत्त्वे प्रमाणम् । विषयवैलक्षण्यादेव ज्ञानवैलक्षण्योपपत्तेः। अन्यथा तत्र विलक्षणारोपजन्यत्वस्यैव दुर्ग्रहत्वात् ।

उक्तारोपस्याभावग्राहकत्वमभ्युपेत्यैतदुक्तं, तदेव नास्तीत्याह-अभावेति। अभावप्रतीतेः प्रतियोगिस्मरणसहकृततदनुपलम्भविशेषमात्रजन्यत्वान्न तदारोपापेक्षेत्यर्थः। नन्वप्रसक्तप्रतिषेधोऽनुपपन्न इत्युक्तं, तत्राह-तत्पूर्वमिति । शाब्दस्यैव प्रतिषेधप्रत्ययस्य श्रोतृविपर्य्यासादेर्निवृत्तिफलकस्य प्रसक्तिपूर्वकत्वनियमो, न त्वभावज्ञानमात्रस्येति भावः। ननु 'इदमिह न' 'इदमिदं न' इति ज्ञानवैलक्षण्यं विलक्षणकारणमन्तरेणानुपपद्यमानं तदुपपादकत्वेनोक्तारोपभेदमेव कारणत्वेन कल्पयति, कारणान्तरस्योभयत्रापि साधारणत्वादित्याङ्शक्यान्यथैवोपपत्त्या दूषयति-न चाभावेति । विषयवैलक्षण्यादेवेति। दुर्निरूपविषयवैलक्षण्यादेवेत्यर्थः। आरोपभेदजन्यज्ञानविषयत्वमेव विषयवैलक्षण्यं, न त्वन्यदित्यत आह-अन्यथेति ।

(२) अभावप्रतीतेः पूर्वं । तत्सत्त्वे—उक्तारोपसत्त्वे इत्यर्थः ।

आरोपभेदजन्यत्वस्य विलक्षणजन्यतावच्छेदकग्रहं विना दुर्ग्रहत्वात्। ज्ञाने च स्वतो वैलक्षण्याभावाद्विषयवैलक्षण्यप्रयुक्तमेव तद्वैलक्षण्यं वक्तव्यमित्यर्थः।

ननूक्तज्ञानवैलक्षण्यस्य विषयवैलक्षण्याधीनत्वेऽपि भूतलादौ विषयद्वयेऽसत्यपि इदमिह नेति ज्ञानकाले इदमिदं नेति ज्ञानाभावः सिद्धः। एवमिदमिदं नेतिज्ञानकाले इदमिह नेति ज्ञानाभावः। स च नियमेन कारणाभावप्रयुक्तो वक्तव्यः। तत्र च कारणान्तरस्योभयत्रापि सत्त्वादुक्तारोपाभाव एव तत्प्रयोजक इति तस्याभावधीकारणत्वसिद्धिरिति चोदयति—नन्विति।

ननु प्रतियोगिज्ञानादेरविशेषात्कदाचिद् इदमिदं न, इदमिह न इति प्रतीतिर्विचित्रारोपहेतुं कल्पयति, तदन्यस्य प्रतीतिव्यवस्थापककारणस्याभावादिति चेत्। न, प्रतियोगितावच्छेदकारोपाभ्युपगमे तदभावस्यैव ग्रहणप्रसङ्गेनान्योन्याभावधियोऽभावप्रसङ्गात्।

न च घटत्वात्यन्ताभाव एव घटभेदः। घटत्वमिह नास्ति, इदं घटो नेति विलक्षणतया भिन्नप्रतियोगितया चानुभूयमानयोरेकत्वानुपपत्तेः। संयोगात्यन्ताभाववदेकस्मिन्नपि तदत्यन्ताभावोपपत्तेश्च। अन्योन्याभावधीसामग्र्या अपि

सत्त्वात् कथं तदेकनियम इति चेत्। न, तदा घटत्वविशिष्टघटस्मरणाभावात् । सत्त्वे वा कथं कदाचिदयं घटो न, कदाचिन्नात्र घटत्वमिति प्रतीतिः ॥

प्रतियोगितावच्छेदकारोपेऽपि संसर्गाभावधीहेतुः प्रतियोग्यारोपोऽस्त्येव । अवच्छेदकस्य स्वात्यन्ताभावप्रतियोगित्वात्। तथा च तदत्यन्ताभावप्रतीतिरेव स्यान्न त्वन्योन्याभावप्रतीतिरिति दूषयति—न प्रतियोगितेति ।

ननु घटत्वात्यन्ताभावस्यैव घटान्योन्याभावत्वात् तत्प्रतीतिरेव घटान्योन्याभावप्रतीतिरित्यत आह—न चेति ।वैलक्षण्यमेवाह—भिन्नप्रतियोगितयेति। घटत्वमिह नेति घटत्वतावच्छिन्नघटत्वप्रतियोगिको ऽत्यन्ताभावोऽनुभूयते । इदं घटो नेति घटत्वावच्छिन्नघटप्रतियोगिकोऽन्योन्याभावोऽनुभूयते । तथा च प्रतियोगिभेदात्तदवच्छेदकभेदाच्च नानयोरैक्यमित्यर्थः। किंच घटत्वपटत्वाधिकरणाभेदेऽपि मूलावच्छिन्नवृक्षे कपिसंयोगाभाववत् पटत्वावच्छिन्ने घटत्वाभावसंभवान्नासौ भेदोऽभेदविरोधीत्याह—संयोगेति । नन्वधिकरणे प्रतियोगितावच्छेदकारोपस्यान्योन्याभावधियं प्रत्यपि हेतुत्वात्कथं घटत्वात्यन्ताभाव एव गृह्यते न घटान्योन्याभाव इत्युक्तमिति शङ्कते-अन्योन्याभावेति । प्रतियोगितावच्छेदकारोपेऽपि प्रतियोगिस्मरणलक्षणकारणाभावान्नान्योन्याभावधीरिति परिहरति—न तदेति । ननु घटघटत्वयोरे-

कानुभवगोचरत्वाद् घटत्वस्मरणमप्यावश्यकमित्याशङ्क्य तथात्वे सामग्रीद्वयसाहित्यनियमान्नियमेनोभयज्ञानं स्यात् न कदाचित्किंचिज्ज्ञानमिति दूषयति-सत्त्वे वेति ।

ननु घटविशेषणतया स्मृत घटत्वारोपोऽन्योन्याभावधीहेतुः, तद्विशेष्यतया स्मृतघटत्वारोपस्तु घटत्वात्यन्ताभावधीहेतुरिति नोक्तदोष इति चोदयति—ननु यत्रेति ।

ननु यत्र घटत्वविशिष्टघटस्मरणानन्तरं घटत्वारोपस्तत्रान्योन्याभावधीसामग्री बलवती । यत्र तु घटत्वस्मरणात् तदारोपः, तत्र तदभाव एव प्रतीयते इति चेत् । न, घटत्वविशिष्टस्मरणेऽपि घटत्वारोपे एकदैव घटघटत्वयोरारोपप्रसङ्गात् ।

एतेन घटघटत्वे इति स्मरणानन्तरं यत्र घटत्वारोपस्तत्रान्योन्याभावग्रह इति प्रत्युक्तम् ।

अन्योन्याभावग्रहस्थले संसर्गाभावग्रहसामग्र्याः समारोपघटिताया अपि सुलभत्वात् तदुभयाभावस्य नियमेन युगपद् ग्राह्यत्वे च त्वदुक्तसमारोपे न किंचिन्मानमस्ति ।

अत एवादृष्टादिप्रयुक्तं कदाचिद् घटत्वाभावज्ञानं कदाचिद् घटभेदज्ञानं चेति प्रत्युक्तम् । त्वदुक्तारोपं विनापि ततस्तदुपपत्तेः ।

अन्योन्याभावधीहेतुघटत्वारोपनिमित्तस्मरणे घटस्यापि विषयत्वात् तस्याप्यारोपः स्यात् । तथा च प्रतियोग्यारोपस्यात्यन्ताभावधीहेतुत्वाद् घटान्योन्याभावप्रतीतिसमये घटत्वात्यन्ताभावधीसामग्र्या भावेन तयद्भावेऽपि नियमेन घटात्यन्ताभावधीः स्यादित्यभिप्रेत्यदूषयति-न घटत्वेति ।

ननु घटविशेषणकघटत्वविशेष्यकस्मरणं घटत्वारोप एव हेतुः । तेन च घटान्योन्याभावधीरित्याशङ्क्य तदा घटस्मरणस्यापि घटारोपद्वारा तत्संसर्गाभावधीहेतोर्घटत्वाभावधीहेतोस्तदारोपस्य च सत्त्वान्नान्योन्याभावधीव्यवस्था इत्याह-एतेनेति । अस्तु तर्ह्यभावद्वयस्यापि नियमेन युगपद् ग्रहस्तत्राह-तदुभयेति । एकैकाभावस्यैव प्रतीत्यन्यथानुपपत्त्यैव ह्यारोपभेदस्त्वया कल्प्यः । प्रतीतियौगपद्ये च स एव न सिद्ध्यति । तदसिद्धौ च तद्धेतुकज्ञानविषयत्वलक्षणाभाववैलक्षण्यमपि न सिद्ध्यतीत्यर्थः । उभयज्ञानकारणारोपे सत्यप्यदृष्टेश्वरादिवशात्कदाचित्किंचित् ज्ञानमित्याशङ्क्याह—अत एवेति । अतःशब्दार्थमेवाह-त्वदुक्तेति ।

भेदाश्रयस्यापि दुर्निरूपत्वाद् भेदो मिथ्येत्यभिप्रेत्य पाठसौकर्याय श्लोकैराश्रयदूषणानि संगृह्णाति—किञ्चेत्यादिना :

किं चास्य घटभेदस्य स्थानं भेदिभिरीर्यताम् ।
यत्र सतां भिदा लब्धा ऽसंकीर्णां कुरुते जगत् ॥

यत्र प्रतीयते भेदस्तदेवास्याऽऽस्पदं यदि ।
अप्रतीतौ सुषुप्त्यादौ विश्वमेकं भवेत्तदा ॥
यदा कदाचिद्धिषणा तस्य स्थाननियामिका ।
इति चेत् पुरुषेऽपि स्यात्तद्भेदस्तत्प्रतीतितः ॥
यथार्थानुभवो यत्र भेदस्यास्पदमेव तत् ।
इति चेत् नूनमायातो दुष्टात्माऽन्योन्यसंश्रयः ॥
यत्र यस्यास्ति संज्ञा तज्ज्ञानं तस्य भवेत्प्रमा ।
प्रमाधीनार्थसत्तायां नान्योन्याश्रयता कथम् ॥
नन्वेवं कुम्भकुम्भ्यादि कुत्र वर्तत इत्यपि ।
चोद्यं नावतरीतर्ति मायावादे कथं च न ॥

भेदिभिः—भेदसत्यत्ववादिभिः । आश्रयानिरूपणेऽपि भेदसत्तायाः किमायातमित्यत आह-यत्रेति । स्वाश्रये स्वप्रतियोग्यभेदविरोधिस्वभावस्तत्तद्धर्मव्यवस्थापको जगत्यसंकीर्णव्यवहारहेतुश्च भेदस्तवाभिमतः, स चाश्रयाभावे न सिद्ध्यतीति भावः । यो भेदो यत्र प्रतीयते स एव तस्याश्रय इति शङ्कते-यत्रेति । किं भेदवत्तया प्रतीयमानत्वविशिष्टो भेदाश्रयः, तदुपलक्षितो वा? । आद्यं दूषयति- अप्रतीताविति । द्वितीयं शङ्कते- यदेति । धिषणा-भेदवत्तया ज्ञानम् । अत्रापि किं भेदवत्ताज्ञानमाश्रयत्वनियामकमुत तत्प्रमा? । आद्ये चैत्रे एव चैत्रभेदभ्रमस्य कदाचित्संभवात्सोऽपि स्वप्रतियोगिकभेदाश्रयः स्यादिति

दूषयति—पुरुषेऽपीति । द्वितीयमनूद्य दूषयति-यथार्थे-त्यादिना। अन्योन्याश्रयमेव विशदयति---यत्रेति। घटे पटभेदसत्त्वे तद्विषयज्ञानस्य प्रमात्वसिद्धिः, तत्सिद्धौ च तद्विषयघटे पटभेदसत्त्वसिद्धिरित्यन्योन्याश्रय इत्यर्थः। उक्तन्यायेन घटाद्याश्रयस्यापि दुर्निरूपत्वाद्घटादेरपि सत्त्वं न स्यादिति चोद्यमिष्टापत्त्या परिहरति—नन्वेवमित्यादिना । मायावादे घटादिकं यत्र प्रतीयते स एव तस्याश्रयः, घटभ्रान्तिविषयस्याप्यनिर्वचनीयघटाश्रयत्वाङ्गीकारादिति भावः ।

किं च भेदप्रमायाः स्थाननियामकत्वे स्थाणौ स्थाणुभेदज्ञानस्यापि प्रमात्वसंभवात् तत्रापि तद्भेदः स्यादित्यभिप्रेत्याह—स्थाणाविति ।

स्थाणौ स्थाणुभिदाज्ञानं प्रमा वा न भवेत्कथम् ।
भेदप्रमाया विषयो धर्मिभेदश्च नाधिकः ॥
सम्बन्धोऽप्यधिको भाति प्रमायामिति चेत्स कः।
संयोगादेरयुक्तत्वात्ततोऽन्यस्याप्रसिद्धितः ॥
स्वरूपयोगो ऽभावेन भावस्यास्तीति चेन्मतम् ।
न, तद्रूपात् पृथक्किं वा नान्त्ये भ्रान्तिरपि प्रमा ॥
प्रथमेऽपि स किं भावो ऽभावो वा नाग्रिमो भवेत् ।
तस्याभावेन संबन्धाभावान्नान्त्योऽनिरूपणात् ।

पुरुषे स्थाणुभेदप्रमाया यो विषयः तस्यात्राभावात्कथं प्रमात्वमित्याशङ्क्याह--भेदेति । तथा च स्थाणौ स्थाणु-

भिदाज्ञानस्यापि स्थाणुरूपो धर्मी तद्भेदश्च विषयः, तयोश्च सत्त्वात्तज्ज्ञानमपि प्रमैवेत्यर्थः । पुरुषे स्थाणुभेदस्य संबन्धोऽपि तद्विषयः, स च तत्रास्ति । स्थाणौ तु स नास्तीति कथं तज्ज्ञानं प्रमेति शङ्कते—संबन्धोऽपीति । स्थाणुभेदस्य पुरुषेण किं संयोगः संबन्धः, समवायो वा, अन्यो वेति विकल्पयति-स क इति । आद्यौ दूषयति-संयोगादेरिति । द्रव्ययोरेव संयोगाद् भावयोरेव समवायाच्चेत्यर्थः । तृतीयं दूषयति-ततोऽन्यस्येति ।

ननु ज्ञानेच्छादौ स्वविषयेण संयोगाद्यतिरिक्तः स्वरूपसंबन्धः प्रसिद्धः, स एव भेदभेदिनोरिति शङ्कते-स्वरूपेति । उक्तशङ्कां निषेधति-नेति । तत्र हेतुं वक्तुं स्वरूपसंबन्धः किं संबन्धिभ्यां भिन्नोऽभिन्नो वेति विकल्पयति—तद्रूपादिति । द्वितीये स्थाणुतद्भेदसंबन्धस्यापि तद्रूपस्य सत्त्वात् स्थाणौ तद्भेदधीः प्रमा स्याद् इत्याह-अन्त्य इति । आद्येऽपि दोषं वक्तुं विकल्पयति-प्रथमेऽपीति । प्रथमं दूषयति-नाग्रिम इति । तत्र हेतुमाह-तस्येति । भावस्याभावेन सम्बन्धाभावेन तदाश्रितत्वायोगात् तत्सबन्धत्वमप्यनुपपन्नमित्यर्थः । द्वितीये प्रतियोगिनो दुर्निरूपत्वात्तादृशाभावोऽपि दुर्निरूप इत्याह-नान्त्य इति ।

एवं भेदाभेदादिविकल्पेन स्वरूपसंबन्धं दूषयित्वा तल्लक्षणमप्यनूद्य दूषयति-विशिष्टेति ।

विशिष्टज्ञानहेतुत्वं संबन्धान्तरमन्तरा ।
स्वरूपसंबन्ध इति ब्रूषे दोषं तदा शृणु ॥
अतीन्द्रियेष्वभावस्य संबन्धी न भवेत् तदा
विषयत्वविवक्षायामप्रमाऽपि प्रमा भवेत् ॥
विशिष्टधीगोचरत्वसत्त्वात्पुरुषभेदयोः ।

अथ संबन्धान्तरमन्तरा विशिष्टप्रमागोचरत्वं स्वरूपसंबन्ध इति चेत् । न, घटे घटभेदबुद्धेरपि तव मते प्रमात्वप्रसङ्गात् । न ह्यसंबन्धभावस्वरूपद्वयविषयज्ञानं किंचित्प्रमा किंचिन्नेति व्यवस्था युक्ता । विशिष्टबुद्धेः स्वविषयत्वायोगाच्च ।

संयोगसमवाययोरतिव्याप्तिवारणाय संबन्धान्तरेत्युक्तम् । परमाण्वादावभावज्ञानस्य परोक्षत्वेन तस्य विषयाजन्यत्वात् परमाण्वादेस्तद्गताभावस्य च विशिष्टधीजनकत्वाभावात्संबन्धो न स्यादित्याह—अतीन्द्रियेष्विति । ननु हेतुत्वपदस्थाने विषयत्वपदं प्रक्षिप्यते । तथा च परमाण्वादेरपि विशिष्टधीविषयत्वान्नोक्तदोष इत्याशङ्कामनुवदति—विषयत्वेति । किमत्र विशिष्टज्ञानमात्रविषयत्वं विवक्षितमुत विशिष्टप्रमाविषयत्वम् । आद्ये चैत्रे चैत्रभेदज्ञानमपि प्रमा स्यात् विशिष्टधीगोचरत्वरूपतद्भेदसंबन्धस्य तत्रापि सत्त्वादित्याह—अप्रमाऽपीति । द्वितीयं शङ्कते-अथेति । भेदज्ञानस्य प्रमात्वे सिद्धे तद्विषयत्वरूपसंबन्धसिद्धिः, तत्सिद्धौ च भेदविशिष्टज्ञानस्य

प्रमात्वसिद्धिरिति अन्योन्याश्रयः स्पष्ट इत्यभिप्रेत्य दूषणान्तरमाह—न घट इति। भेदज्ञानोत्पत्तेः पूर्वं घटभेदस्य घटपटे च संबन्धविशेषाभावादुभयत्रापि तज्ज्ञानं प्रमा स्यादप्रमा वा स्यादित्याह—न ह्यसंबद्धेति। किं च विशेषण-विशेष्य-तत्संबन्ध-विषयज्ञानस्यैव विशिष्टज्ञानत्वात्तद्विषयभूतसंबन्धस्य विशिष्टप्रमाविषयत्वरूपत्वे स्वविषयप्रसङ्गः। वेद्यज्ञानवादे च तदनुपपन्नमित्यभिप्रेत्याह—विशिष्टबुद्धेरिति।

यस्य भेदस्य यत् प्रतियोगितावच्छेदकं तदत्यन्ताभावस्तदाश्रयतावच्छेदक इति शङ्कते—नन्विति।

ननु प्रतियोगितावच्छेदकधर्मात्यन्ताभाववति भेदस्तिष्ठतीति चेत् तर्हि तदत्यन्ताभाव एव क्व वर्तते इति निरूप्यताम्। न हि धर्मिनिरूपणमन्तरेण धर्माणां प्रामाणिकत्वं संभवति। यत्र प्रमीयते तत्रेत्युक्तौ दत्तो दोषः। प्रतियोगिदेशान्यदेशेऽत्यन्ताभावो वर्तते इति चेत्। न, तथा सति तयोरन्योन्यज्ञानाधीनज्ञानत्वेनान्यतरस्याप्यसिद्ध्यापातात्। अत एव प्रतियोगिव्यतिरिक्ते तदन्योन्याभाव इति प्रत्युक्तम्। व्यतिरेकस्यैवान्योन्याभावत्वाद्ग आत्माश्रयाद्यापत्तेः।

भेदाश्रयवदत्यन्ताभावाश्रयस्याप्यसंप्रतिपन्नत्वात्सोऽपि वक्तव्य इत्याह-तर्हीति। अत्यन्ताभावस्य प्रामाणि-

कत्वादाश्रयनिरूपणं विना किं हीयत इत्याहशङ्क्याह-न हीति। तद्वृत्तया प्रमीयमाणत्वं तदाश्रयत्वप्रयोजकमित्यङ्गीकारे सुषुप्त्यादौ तदाश्रयो न स्यादित्यादिदोषापत्तिरित्याह—यत्रेति। नन्वत्यन्ताभावस्य यः प्रतियोगी तदधिकरणप्रतियोगिकभेदवत्त्वं तदाश्रयतावच्छेदकमिति शङ्कते—प्रतियोगीति। एवं सति घटभेदे सिद्धे तदवच्छेदेन घटत्वात्यन्ताभावसिद्धिः, तत्सिद्धौ च तदवच्छेदेन घटभेदसिद्धिरिति परस्पराश्रयः स्यादित्याह-न तथा सतीति। किं च परमते आकाशाद्यत्यन्ताभावस्य प्रतियोगिदेशाप्रसिद्धया तदन्यदेशस्याप्रसिद्धत्वेनाऽनाश्रितत्वं स्यादिति द्रष्टव्यम्। ननु घटव्यतिरिक्त एव घटान्योन्याभावाश्रयः। तथा च न घटत्वात्यन्ताभावापेक्षेत्यत आह—अत एवेति। अतःशब्दार्थमेवाह—व्यतिरेकस्येति। यो घटभेदः पटाश्रितः तद्विशिष्टस्यैव पटस्य तदाश्रयत्वे आत्माश्रयः। भेदान्तरविशिष्टे स चेत्सोऽपि भेद एतद्भेदविशिष्टे वर्तते चेदन्योन्याश्रयः। भेदान्तरविशिष्टे चेच्चक्रकापत्तिः। तस्यापि भेदान्तरविशिष्टाश्रयत्वेऽनवस्था स्यादित्यर्थः॥

ननूक्तान्योन्याश्रयादिर्न दोषः। भेदस्याजन्यतया तदुत्पत्तिप्रतिबन्धकत्वाभावात् प्रतियोगिस्मरणसहकृतानुपलब्ध्यादिनैव तत्तज्ज्ञानसंभवाद् भेदज्ञाने भेदज्ञानानपेक्षणात्, ज्ञप्तिप्रतिबन्धकत्वाभावाच्च। उत्पत्त्यादिप्रतिबन्धक एव हि परस्पराश्रयत्वादिदोषः। अन्यथा प्रमेयत्वाभिधेयत्वादीनां परस्पराश्रयता न स्यादित्यभिप्रेत्य शङ्कते—नन्विति।

ननु नान्योन्याश्रयादिदोषः । न हि भेदो भेदेन जन्यते, न वा जायते । न चातदाश्रयत्वे धर्मिणस्तदपेक्षा। अनादिभेदाश्रयत्वस्याप्यनपेक्षत्वात् । न च भेदाश्रयत्वज्ञाने पूर्वभेदाश्रयत्वज्ञानमपेक्ष्यते इत्यन्योन्याश्रयादिरिति वाच्यम् । पटादेर्भेदाश्रयत्वज्ञानाभावेऽपि तन्निष्ठभेदस्य प्रमितत्वात् । न हि भेदज्ञानेपटनिष्ठतदाश्रयत्वज्ञानं हेतुरिति चेत् । न, भेदधर्मित्वस्यानिरूपणे इदमस्माद् भिन्नमिदं नेति वा व्यवस्थाया आकस्मिकत्वप्रसङ्गात् ।

ननु घटे तस्य घटभेदाश्रयत्वे तदपेक्षाऽस्तीति भेदाश्रयत्वे परस्परापेक्षेति शङ्कां निराकरोति—न चेति । आकाशादौ घटभेदाश्रयत्वस्यानादित्वान्न तत्र घटभेदापेक्षा, पटादिकार्यस्यापि स्वसत्तामात्रेण तदाश्रयत्वात्तत्रापि न तदपेक्षेति भावः । ननु घटभिन्नस्य घटभेदाश्रयत्वाभिधाने भिन्नत्वज्ञानं विना भेदाश्रयत्वज्ञानायोगात्तदाश्रयत्वज्ञप्तौ परस्पराश्रयादिर्दोष इत्यत आह—न चेति पटादेर्भेदाश्रयत्वाज्ञानेऽपि तज्ज्ञाननिरपेक्षभेदज्ञानसंभवात्तस्य प्रामाणिकत्वसिद्धिरित्याह—पटादेरिति । भेदज्ञाने तदाश्रयत्वज्ञानानपेक्षामेव दर्शयति—न हीति । भेदज्ञानस्य प्रतियोगिस्मरणसहकृतानुपलब्धिसहितप्रत्यक्षमात्रजन्यत्वादित्यर्थः ।

भेदाश्रयानिरूपणप्रयुक्तभेदज्ञानप्रमात्वविप्रतिपत्तिर्भेदाश्रयनिरूपणेन निरसनीया । तदनिरासे इदमस्माद् भिन्नमिदं नेतिव्यवस्थाऽयोगात् । तथाच प्रतियोग्यतिरिक्तः प्रतियोगितावच्छेदकात्यन्ताभावाश्रयो वा भेदाश्रयः प्रतियोगितावच्छेदकात्यन्ताभावश्च प्रतियोग्यतिरिक्ते एव वर्तत इत्युक्तौ भेदाश्रयस्य प्रतियोग्यतिरिक्तत्वनिश्चये सत्याश्रयानिरूपणाभावाद् भेदज्ञानस्य प्रमात्वनिश्चये च भेदाश्रयतया प्रतीतस्य प्रतियोग्यतिरिक्तत्वनिश्चय इति परस्पराश्रयादिप्रसङ्गान्न भेदस्य प्रामाणिकत्वसिद्धिरित्यभिप्रेत्य दूषयति—न भेदेति ।

ननुभेदाश्रयानिरूपणेऽपि तस्य न पारमार्थिकत्वक्षतिः । आत्मवत्स्वतन्त्रस्यापि तस्य सत्यतोपपत्तेरित्यत आह—एतेनेति ।

एतेन माभूद्भेदस्य केन चिदाश्रयेण सम्बन्धः, नैतावता तदभावः । अनाश्रितानामपि पदार्थानां भूयसां दर्शनादिति प्रत्युक्तम् । अनाश्रितभेदस्याप्रतीतेः, इदमिदं नेति प्रतीतेश्च अनाश्रितभेदासिद्धावपि जीवब्रह्मधर्मिकभेदस्यानात्मधर्मिकभेदस्य चासिद्धेश्च । तस्मादसौ स्वतन्त्रो नाभेदविरोधीति न भेदः । आकाशादौ द्रव्यपरिभाषेव तस्यापि भेदपरिभाषायां वा नास्माकमनिष्टम् । किं च भेदज्ञानमपि न संभवति ।

किमेतौ परस्परभिन्नाविति भेदधीः, अयमिदं न भवति अयमस्माद् भिन्न इति वा ?। सर्वथाऽप्यन्योन्याश्रयः ।

आत्मवत्स्वतन्त्रभेदे किं श्रुतिर्मानमुत प्रत्यक्षादिः ?। नाद्यः। श्रुतौ कुत्रापि स्वतन्त्रभेदाश्रवणादित्याह—अनाश्रितेति । प्रत्यक्षादिना साश्रयस्यैव भेदस्य प्रतीतेर्न स्वतन्त्रभेदस्तद्विषय इत्याह-इदमिति। ननु सत्तावत् प्रत्यक्षादिसिद्धभेदस्याश्रयानिरूपणादेव स्वातन्त्र्यसिद्धिरिति चेत्। न, तस्याश्रितत्ववत् स्वरूपस्याप्यपारमार्थिकत्वेऽपि प्रत्यक्षादितः प्रतीत्युपपत्तिः। तत्सत्त्वमङ्गीकृत्याप्याह-अनाश्रितेति । साश्रयस्यैव भेदस्य स्वाश्रये स्वप्रतियोग्यभेदविरुद्धत्वात्स्वतन्त्रासिद्धित्वात्स्वतन्त्रभेदेऽपि तादृशभेदस्य जीवब्रह्मणोरसिद्धेर्न तदभेदानुपपत्तिरित्यर्थः। किंचाभेदत्वमपीत्याह-तस्मादिति। तत्र लौकिकानां भेदव्यवहाराभावेऽपि परीक्षकाणां सोऽस्तीत्याशङ्क्य तस्य परिभाषामात्रत्वात्तावता न तस्य भेदव्यवहारविषयत्वमित्याह-आकथादाविति। भेदज्ञानस्वरूपपर्यालोचनयाऽपि भेदप्रमा न संभवतीत्याह-किं चेति । तदसंभवमेवोपपादयितुं भेदसाधकज्ञानं विकल्पयति-किमेताविति । त्रिविधज्ञानसापेक्षत्वादसंभव इत्याह—सर्वथेति ।

एतौ भिन्नावित्यत्र धर्मिविशेषणतया द्वित्वानुभवात्प्रथमं तज्ज्ञानं वक्तव्यं द्वित्वाश्रयभेदे ज्ञात एव द्वित्वज्ञानमिति परस्पराश्रयादित्याह—प्रथम इति ।

प्रथमे द्वित्वज्ञानस्य भेदज्ञानाधीनत्वात्, परस्पराभावस्यापि भेदरूपत्वात्। द्वितीये भेदज्ञानं विना परस्य तद्विशिष्टज्ञानायोगात्। एवं भेदत्वज्ञानं विना तद्विशिष्टज्ञानानुपपत्तेः। न च भेदत्वमनुपस्थितमेव प्रकारः। परमते पूर्वोपस्थितस्यैव प्रकारत्वात्। अन्यथा विशेषणज्ञानमन्यत्रापि हेतुर्न स्यात्। ततश्च त्वदभिमतं निर्विकल्पकं न स्यात्।

न च द्वित्वोत्पत्तिमात्रेण तज्ज्ञानसंभवान्न तस्य भेदज्ञानापेक्षेति वाच्यम्। भिन्नाश्रितत्वेनैकत्वद्वयज्ञानमन्तरेण द्वित्वोत्पत्तेरेवायोगात्। अन्यथा दूरस्थवनस्पत्योरपि स्वरूपेणैकत्वद्वयज्ञानात् द्वित्वोत्पत्तिप्रसङ्गात्। तत्रापि भेदभ्रमो द्वित्वोत्पत्तिप्रतिबन्धक इति चेत्तर्हि यत्संशयव्यतिरेकनिश्चयौ यत्र प्रतिबन्धकौ तन्निश्चयस्तद्धेतुरिति न्यायेन भेदनिश्चयस्य द्वित्वोत्पत्तिहेतुत्वात्तदभावे तदुत्पत्तिरेवायुक्ता। द्वित्वस्य यावद्द्रव्यभावित्वमते तु तज्ज्ञानमेवाश्रयभेदज्ञानं विनाऽनुपपन्नम्। अन्यथा दूरस्थवनस्पत्योरपि तज्ज्ञानप्रसङ्गादिति भावः। किं च परस्परं भिन्नाविति परस्परनिरूप्यो भेदः प्रतीयते। परस्परशब्दश्चान्योन्यशब्दपर्याय,: अन्यशब्दार्थश्च भेदविशिष्ट एवेति भेदज्ञाने भेदज्ञानमित्याह-परस्पराभावस्येति। द्वितीये भेदस्य विशेषणतया भानात्

भक्तोपि न भवतीत्यर्थः। "ध्यायतीव लेलायतीव सुधीरित्यादिश्रुतेः"। शरीरस्थोपि कौन्तेय न करोति न लिप्यते इति वाक्यशेषाच्च यद्यात्मा किंचिदपि स्वतो न कारयति न करोति वा तर्हि कः कारयन्कुर्वंश्च प्रवर्तते इति तत्राह स्वभावस्तु अज्ञानात्मिका दैवी माया प्रकृतिः कुर्वन्कारयन्प्रवर्तते तथा च कर्तृत्वकारयितृत्वभोक्तृत्वभोजयितृत्वेश्वरत्वानीश्वरत्वादीन्यात्मनोऽविद्याकृतान्येव न स्वतः किंचिदप्यस्तीति भावः॥

अन्ये तु नन्वात्मनो निरवयवत्वेन क्रियाश्रयत्वानुपपत्तौ स्वतः कर्तृत्वासम्भवेपि यथायस्कान्तस्यायश्चालकत्वं तथा कारयितृत्वं स्यादेवेत्याशंकायां न तथात्वे प्राणिनामात्मसान्निध्यस्य नित्यत्वात्सर्वदा सर्वेषां च प्रवृत्तिरेव स्यात्तददर्शनादात्मनः कारयितृत्वं न प्रामाणिकमित्याशयेनाह नेति। प्रकर्षेण स्वयमेव सर्वत्र भाति सर्वं भासयतीति वा, सर्वात्मना स्वयमेव भातीति वा प्रभुरात्मा स्वयं लोकस्य प्राणिनः कर्तृत्वं त्वमिदं कुर्विति कर्मणि प्रवृत्तिं न सृजति यं कंचन जन्तुं न प्रवर्त्तयतीत्यर्थः। तथा कर्माणि कर्तुरीप्सिततमं कर्मेति स्मरणात्क्रियया प्राप्तुमिष्टतमानि कर्माणीत्युच्यन्ते तानि न सृजति नोत्पादयति इष्टप्रदमनिष्टप्रदं वा क्रियया प्राप्तुं योग्यं वस्तु न सम्पादयतीत्यर्थः। कर्मफलसंयोगं च न सृजति तं प्राणिनं तत्तत्कृतपापपुण्यफलेन न संयोजयति प्राणिनः सुखदुःखानि नानुभावयति चेत्यर्थः। आत्मनः कारयितृत्वप्रापयितृत्वभोजयितृत्वाद्यभावे तर्हि कारयिता प्रापयिता भोजयिता क इत्याकांक्षायामाह स्वभाव इति। स्वयमेव सर्वं भावयति सम्भावयतीति स्वभावः प्रवृत्तिर्वासनामयी प्रवर्तयति कर्मरूपिणी प्रकृतिरिष्टानिष्टे संपाद्य सुखदुःखे चानुभावयति प्राणिनस्त्वात्मा तु प्राणिप्रकृतितच्चेष्टातत्सुखदुःखानुभूतीनां साक्ष्येव भवत्यविक्रियः सन्नित्यर्थ इत्याहुः॥ १४॥

ननु एष एव साधु कर्म कारयति सत्त्वस्यैव प्रवर्तकः ईश्वरः सर्वभूतानां सर्वाधिपत्यं कुरुते महात्मा धर्मावहः पापनुदं भगेशं वरदं देवमीशं प्रभुः प्रीणाति विश्वभुगित्यादिश्रुतिभिः स्मृतिभिश्च परमात्मनः कर्तृत्वं कारयितृत्वं धर्मावहत्वं पापनोदकत्वं समर्पितपूजादिभिः परितोष्टृत्वादिकं प्रतिपाद्यते कथं न कर्तृत्वं न कर्माणीत्यात्मनः श्रुतिस्मृत्युक्तधर्मवत्त्वाभावः प्रतिपाद्यते इत्याकांक्षायां न श्रुतिस्मृतिभिः पुराणैरप्यात्मन्युपाधिकृतं सर्वमारोप्य प्रतिपाद्यते मुमुक्षूणां सत्त्वशुद्ध्यर्थं तदुपास्तौ प्रवृत्तिसिद्धये न तु तत्त्वा-

त्विकम् । वस्तुतस्तु कूटस्थासङ्गचिद्रूपत्वादात्मा स्वयं न करोति न कारयति चेत्याह—

नादत्ते कस्यचित्पापं न चैव सुकृतं विभुः ।
अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः ॥१५॥

नादत्त इति । निरवयवत्वान्निष्क्रियत्वाच्च विभुर्व्यापकः स्वयमात्मा भक्तस्य वाप्यन्यस्य वा यस्य कस्यचित्पापं नादत्ते ब्राह्मणो हिरण्यगर्भमिव न गृह्णाति । ननु हरिर्हरति पापानि पापसंचयं हरत्यशेषं स्मृतमात्र एवेत्यादिवाक्यैर्भक्तकृतं पापं भगवानादत्त इति प्रतिपाद्यत इति चेत्सत्यं प्रतिपाद्यते तत्प्रतिपादनं नामकीर्त्तनप्रायश्चित्त्यानात्मकं तत्पापान्मोचयितुमेव भवति न तु परमात्मनो विकारित्वं सम्पाद्य तत्पापादानप्रतिपादनाय एतच्च ।

तस्य संकीर्तनं विष्णोर्जगन्मंगलमंहसाम् ।
महतामपि कौरव्य विद्ध्यैकांतिकनिष्कृतिम् ।
एषा विनिष्कृतिः शंभोः सकृदेव हि कीर्तनम् ॥

इत्यादिवचनेभ्योऽवगम्यते । अन्यथा निर्विकारत्वप्रतिपादकबहुश्रुतिविरोधप्रसङ्गात् । किञ्च यस्य कस्यापि भक्तस्यान्यस्य वा भक्त्या समर्पित श्रौतस्मार्तकर्मानुष्ठानजन्यं सुकृतं च नैवादत्ते वन्हिराहुतिमिव न किंचिद्गृह्णाति । ननु तर्हि धर्मावहं पापनुदं वरदं देवमीड्यं प्रभुः प्रीणाति, पत्रं पुष्पं फलं तोयमित्यादिश्रुतिस्मृतिवाक्यानामप्रामाण्यापात इति चेन्न मुमुक्षोः सत्त्वशुद्धिकामस्य परमेश्वरोपास्तौ तन्महत्त्वप्रतिपादनेन रुच्युत्पादनपरत्वात्तेषां वाक्यानां वायुर्वै क्षेपिष्ठा देवतेत्यादिवाक्यवत्प्रामाण्योपपत्तेः । ननु पंडिताश्चाप्यपंडिताश्च सर्वे स्नानसंध्यानुष्ठानयज्ञदानादिजं फलमीश्वरायैव समर्पयन्ति गृह्णाति चेश्वर इति तत्कथमित्याकांक्षायां ते वेदान्तविचारजन्यज्ञानाभावादेव तथा कुर्वन्तीत्याशयेनाह अज्ञानेनेति । आत्मनो देहेन्द्रियादिभ्यो भिन्नत्वाविक्रियत्वचिद्रूपत्वपारिपूर्णत्वाऽखण्डानंदैकरसत्ववेदनं ज्ञानं तद्विलक्षणमज्ञानं तेनोक्तलक्षणं ज्ञानमावृतं राहुणा रविबिम्बवत्तिरोहितं तेनैव परमात्मतत्त्वाविवेकेन जन्तवः प्राणिनः सर्वेऽप्यहं ममेत्यनेन कर्मणेश्वरः प्रीणाति मह्यमीप्सितं दास्यति भोक्ष्ये भोजयिष्यामीति मुह्यन्ति परमात्मतत्त्वमजानन्तः सन्तः संसरन्तीत्यर्थः ॥

अपरे तु इत्थं योजयन्ति । ननु यः परमेश्वरैकशरणो ब्रह्मणि संन्यस्तसर्वकर्मा यानि पुण्यपापानि करोति तानि क्व गच्छन्ति लिप्यते न स

पापेन पद्मपत्रमिवाम्भसेत्यनेन तस्य लेपाभावोक्तेस्तथाच स्वभक्तस्य पापं पुण्यं च तदनुग्रहार्थं भगवानादत्त इत्यायातमिति चेत्तत्राह नेति। विभुः परमेश्वरः कस्यचित्स्वभक्तस्यापि पापं नादत्ते न गृह्णाति तथा भक्तथा समर्पितं सुकृतं पुण्यं न चैवादत्ते पूर्णकामत्वात्। ननु वस्तुतो जीवस्यापीश्वराभिन्नत्वात्कर्तृत्वाद्यभाव ईश्वरस्य तु सुतरामतो किमर्थमीश्वरात्स्वस्य भेदं प्रकल्प्येश्वरो भजनीयोऽहं तस्य भक्तस्तदर्थं मया पूजायागदानहोमादिलक्षणं कर्म कर्तव्यमिति बुद्ध्या परमेश्वरैकशरणैरितरैश्चाहं कर्म करोमि कारयामि तस्य फलं भोक्ष्ये भोजयामीति बुद्ध्या कर्माण्यनुष्ठीयन्त इति चेत्तत्राह अज्ञानेनावरणशक्तिमता मायाख्येनावृतमाच्छादितं ज्ञानं कर्तृत्वादिविनिर्मुक्तोऽहमस्मीति विवेकज्ञानं तेनावरणेनाहमुपासक ईश्वर उपास्यस्तदर्थं कर्म करोम्यहं कर्ता कारयिता भोक्ता भोजयितेत्येवं मुह्यन्तीत्यर्थः॥

अन्ये तु "नन्वीश्वरः कारयिता जीवः कर्ता एष उ ह्येव साधु कर्म कारयति तं यमुन्निनीषते एष उ एवासाधु कर्म कारयति तं यमधो निनीषत इति" श्रुतेः। तथा च जीवेश्वरयोः कर्तृत्वकारयितृत्वाभ्यां भोक्तृत्वभोजयितृत्वाभ्यां च पापपुण्यलेपसम्भवात्कथमुक्तं स्वभावस्तु प्रवर्तते इत्याशंक्याह नेति। विभुः परमेश्वरः परमार्थतः कस्यचिज्जीवस्य पापं सुकृतं च नैवादत्ते परमार्थतो जीवस्य कर्तृत्वाभावात्परमेश्वरस्य च कारयितृत्वाभावात्। कथं तर्हि श्रुतिर्लोकव्यवहारश्चेति तत्राह अज्ञानेनावरणशक्तिमता मायाख्येनानृतेन तमसावृतमाच्छादितं ज्ञानं जीवेश्वरजगद्भेदभ्रमाधिष्ठानभूतं नित्यस्वप्रकाशं सच्चिदानन्दरूपमद्वितीयपरमार्थसत्यं तेन स्वरूपावरणेन मुह्यन्ति प्रमातृप्रमेयप्रमाणकर्तृकर्मकरणभोक्तृभोग्यभोगाख्यनवविधसंसाररूपं मोहमतस्मिंस्तदवभासरूपं विक्षेपं गच्छन्ति जन्तवो जननशीलाः संसारिणस्तथा चाकर्त्रभोक्तृपरमानन्दाद्वितीयात्मस्वरूपादर्शननिबन्धनोयज्जीवेश्वरजगद्भेदभ्रमः प्रतीयमानो वर्तते मूढानां तस्यां चावस्थायां मूढप्रत्ययानुवादिनी एष इत्यादिश्रुतिः।

अज्ञो जन्तुरनीशोयमात्मनः सुखदुःखयोः।
ईश्वरप्रेरितो गच्छेत्स्वर्गं वा श्वभ्रमेव वा॥

इति स्मृतिश्च वास्तवाद्वैतबोधिवेदवाक्यशेषभूतेति न दोष इत्याहुः॥ १५॥

तर्हि सर्वेषामनादिभावरूपाज्ञानावृतज्ञानत्वान्मोहस्य निवृत्त्यभावात्संसारनिवृत्तिः कथं स्यादिति तत्राह—

ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः ।
तेषामादित्यवज्ज्ञानं प्रकाशयति तत्परम् ॥१६॥

ज्ञानेनेति । येषां भगवदनुगृहीतानां विवेकवैराग्यादिश्रवणादिसम्पन्नानां मुमुक्षूणां तदावरणविक्षेपशक्तिमदनाद्यनिर्वाच्यमज्ञानं मायादिशब्दवाच्यं आत्मनो ज्ञानेन कर्तृत्वादिशून्यब्रह्माहमस्मीति परमात्माभेद साक्षात्कारेण नाशितं बाधितं शुक्तिज्ञानेन तदज्ञानमिव तेषां तज्ज्ञानं कर्तृ यद्वा तत् श्रुतिस्मृतिपुराणादौ प्रसिद्धं परं सत्यज्ञानानन्दानन्तरूपमेकमेकमेवाद्वितीयं परमार्थतत्त्वं प्रकाशयति तदावरणाज्ञानं निवर्तयत्कर्मतामन्तरेणैव साक्षाद्व्यक्तीकरोति आदित्यवत् यथादित्यः ह्युदयमात्रेणैवाखिलं तमो निवर्तयन्घटादिवस्तु प्रकाशयति तथेत्यर्थः । एतावांस्तु विशेषः । आदित्यवत् यथादित्यो घटादीनां तमोनिवृत्तिभानरूपोभयं करोति ब्रह्मज्ञानं तु तदज्ञानमात्रं निवर्तयति तद्भानं तु स्वप्रकाशत्वेनैवेति बोध्यम् । ब्रह्मज्ञानेपि परोक्षापरोक्षभेदेन द्वैविध्यं तत्र सत्यं ज्ञानमनन्तं ब्रह्मेति वाक्यजन्यमुक्तरूपं ब्रह्मास्तीति परोक्षं ज्ञानं तच्च ब्रह्म नास्तीत्यसत्त्वापादकावरणनिवर्तकं तत्त्वमसीतिवाक्यजन्यमहं ब्रह्मास्मीत्यपरोक्षज्ञानं तु नाहं ब्रह्मेत्यभानापादकावरणनिवर्तकमिति विशेषो बोध्यः ॥

अन्ये तु ननु सर्वेषामज्ञानावृतज्ञानत्वे कथं मुमुक्षूणामात्मज्ञानाविर्भावः कथं वा तेषां मुक्तिरित्याकांक्षायामीश्वरप्रीत्यै कृतनित्यनैमित्तिककर्मानुष्ठानेन यदा चित्तपरिपाकस्तदा सम्यग्ज्ञानमुदेत्यज्ञानं नाशयित्वा परं तत्त्वं प्रकाशयति तदा ते मुक्तिं गच्छन्तीत्याशयेनाह ज्ञानेनेत्यादिद्वाभ्याम् । तुशब्दो ज्ञानव्यतिरिक्तस्याज्ञाननाशकत्वासंभवद्योतनार्थः । येषां कर्मोपास्तिभ्यां शुद्धैकाग्रचित्तानां ज्ञानेन तु श्रवणादिसमुत्पन्नेनात्मविषयकेनात्मनो बुद्धेः सम्बन्धि बुद्धिनिष्ठमित्येतत् ज्ञानाज्ञानयोर्बुद्धिधर्मत्वादावृतिरनावृतिश्च घटते न चक्षुष एव न तु घटस्य तद्वदज्ञानं ज्ञानं च बुद्धेरेव न त्वात्मनोऽन्यथाहमितिप्रत्ययानुपपत्तेस्ततो बुद्धिसम्बध्येवाज्ञानं येन मोहिताः संसरन्ति प्राणिनो यत्सर्वानर्थबीजं तदज्ञानं नाशितं भवति सूर्योदयेन तिमिरमिव विध्वस्तं भवति तेषां शुद्धात्मनां समुत्पन्नं तत् ज्ञानमादित्यवद्यथोदित आदित्यः पदार्थजातं प्रकाशयति तथा तत्सर्ववेदान्तप्रसिद्धं सत्य-

ज्ञानादिलक्षणं प्रत्यगभिन्नं परं ब्रह्म प्रकाशयति सूर्यप्रकाशेन स्थाणुरेवायमिति यथा तथा ज्ञानप्रकाशेन ब्रह्मैवाहमिति स्वं ब्रह्मैव विजानातीत्यर्थ इत्याहुः ॥ १६ ॥

तेन त्यक्तेन भुंजीथा मा गृधः कस्यचिद्धनमित्यादिश्रुत्युक्तरीत्या विदेहकैवल्यार्थिभिः समुत्पन्नज्ञानस्य संरक्षणं कर्तव्यं सदात्मनिष्ठया स्थित्वा न किंचिद्ग्राह्यं द्रष्टव्यमिति बोधयितुमाह—

तद्बुद्धयस्तदात्मानस्तन्निष्ठास्तत्परायणाः ।
गच्छन्त्यपुनरावृत्तिं ज्ञाननिर्धूतकल्मषाः ॥ १७ ॥

तद्बुद्धयः । आदित्येन रूपमिव श्रवणादिजन्यज्ञानेन प्रकाशितं सर्ववेदान्तप्रसिद्धं सच्चिदानन्दैकरसं सर्वात्मकं यत्परं ब्रह्म तस्मिन्नेव बुद्धिर्येषां ते तद्बुद्धयः सर्वत्र ब्रह्मदर्शिनः मुमुक्षुभिः कल्पितभेदमगृहीत्वा चक्षुषा रूपमिव प्रत्यग्दृष्ट्या सदा सर्वत्र ब्रह्मैव द्रष्टव्यमित्यर्थः । सर्वं ब्रह्मेवेति सर्वत्र ब्रह्मण्येव गृह्यमाणेपि गृहीताग्राह्यं ग्रहणमिति भेदः स्यात्तदा एतस्मिन्नुदरमन्तरं कुरुते अथ तस्य भयं भवतीति भेदद्रष्टुर्भयश्रवणादतोऽभेदेन द्रष्टव्यमित्याह तदात्मान इति । तदेव परं ब्रह्मात्माहंप्रत्ययार्थो येषां ते तदात्मानः ब्रह्मैवाहमिति ब्रह्मण्येव स्वात्मना साक्षात्कृतेऽहंप्रत्ययवन्तो न तु देहे इत्यर्थः । समाधिदशायां ब्रह्मण्येवाहंप्रत्यये सत्यपि विदुष आहारादौ देहेहंप्रत्ययो भवत्येव तेन प्रबलेन चिरकालिकेन स्थूलेन देहात्मप्रत्ययेन ब्रह्मात्मप्रत्ययो बाह्यध्वनिना नादध्वनिवद्विनश्यति ततो बाह्यं सर्वं कर्म संन्यस्याहाराद्यवस्थासु सर्वास्वपि ब्रह्मण्येवात्मत्वबुद्ध्या दृश्यानवगाहिन्या स्थातव्यमित्याह तन्निष्ठा इति । तस्मिन् ब्रह्मण्यात्माकारप्रत्ययकरणमेव निष्ठा अहंबुद्धेर्नैश्चल्यं येषां ते तन्निष्ठाः स्वस्य ब्रह्मात्मनावस्थितत्वदर्शन एव स्थिरीभूतवृत्तय इत्यर्थः । ब्रह्मात्मत्वदर्शने स्थिरीभूतचित्तवृत्तीनामपि क्वचित्प्रयोजनान्तरापेक्षास्ति चेत्तया सा निष्ठा प्रतिबध्येत बाह्यात्मत्वं च स्यात्ततः कार्यान्तरं बाह्यं किंचिदप्यनपेक्ष्य मुमुक्षोः सदा तदेकपरत्वेन भवितव्यमित्याह तत्परायणा इति । तत्सच्चिदानन्दैकरसमद्वितीयं स्वात्मनाधिगतं परं ब्रह्मैव बहिरन्तः सदा बुद्धिवृत्तेश्चक्षुषो रूपवत्परं नियतमयनं गतिर्येषां ते तत्परायणा आहारविहारादौ सदा सर्वत्र ब्रह्मदर्शनं ब्रह्मण्येवात्मदर्शनं च चिदेकवृत्त्या ये न मुञ्चन्ति ते तत्परायणाः सदात्मारामा इत्यर्थः । एवं सर्वत्र ब्रह्मदर्शनं ब्रह्मण्यात्मदर्शनं तन्निष्ठत्वं

तत्परायणत्वं च विदेहमुक्तेरसाधारणकारणमेतच्चतुष्टयमनुतिष्ठन्ति ये ब्रह्मविदस्त एव ज्ञाननिर्धूतकल्मषाः ज्ञानेनान्तरङ्गसाधनचतुष्टयानुष्ठानेनाप्रतिबद्धतां गतेन निर्धूतं निःशेषप्रक्षालितं कल्मषं बौद्धं जगद्ब्रह्मणोर्ब्रह्मात्मनोश्च भेदग्रहणलक्षणं येषां ते ज्ञाननिर्धूतकल्मषाः सन्तः स्वयमपुनरावृत्तिं भूयो देहसंबंधित्वापत्तिः पुनरावृत्तिस्तदभावोऽपुनरावृत्तिस्तां देहसम्बन्धराहितां मुक्तिं गच्छन्ति ब्रह्मात्मना स्थितिदशायां गलितेऽस्मिन्देहे ब्रह्मणि वृत्तौ लीनायां सत्यां स्वयं ब्रह्माकारेणैव तिष्ठन्तीत्यर्थः ॥

अन्ये तु इत्थं योजयन्ति । विदुषां विविदिषूणां वान्तरङ्गानि विद्यापरिपाकसाधनान्युपदिशति तद्बुद्धय इति । यज्ज्ञानेन प्रकाशितं परमात्मतत्त्वं तस्मिन्परमार्थतत्त्वे सच्चिदानन्दघन एव बाह्यविषयपरित्यागेन श्रवणमनननिदिध्यासनैः प्रवृत्ता बुद्धिरन्तष्करणवृत्तिः साक्षात्कारलक्षणा येषां ते तद्बुद्धयः निर्विकल्पसमाधिभाज इत्यर्थः । ननु जीवा बोद्धारो बोद्धव्यं ब्रह्मतत्त्वमिति बोद्धृबोद्धव्यलक्षणभेदे सति कथमुक्तसमाधिभाक्त्वमित्यत्राह तदात्मानः तदेव परं ब्रह्मात्मा स्वरूपं येषान्ते तथा बोद्धृबोद्धव्यभावो हि मायाकल्पितो न वास्तवाभेदविरोधीति भावः । नन्वज्ञा अपि वस्तुगत्या तदात्मानोऽतः कथं तद्व्यावृत्तिरिति चेदज्ञा ह्यनात्मनि देहादावात्माभिमानिन इति न तदात्मानो विज्ञास्तु निवृत्तदेहाद्यात्मत्वाभिमाना इति तदात्मान इति व्यपदिश्यन्ते इति युक्तं तद्व्यावर्तकं विशेषणमित्यवेहि । ननु कर्मानुष्ठानविक्षेपे सति कथं देहाद्यात्मत्वाभिमानानिवृत्तिरिति चेत्तत्राह तन्निष्ठास्तस्मिन्नेव ब्रह्मणि निष्ठाऽहंब्रह्मास्मीत्येवंस्थितिर्येषां न कर्मानुष्ठाने इति तन्निष्ठाः सर्वकर्मपरित्यागेन तदेकविचारध्यानपरा इत्यर्थः । तथापि स्वर्गादिफलरागे सति कथं तद्धेतुकर्मत्याग इति चेत्तत्राह तत्परायणाः तदेव परमयनं प्राप्तव्यं येषां न स्वर्गादि ते तत्परायणाः सर्वतो विरक्ता इत्यर्थः । अत्र तद्बुद्धय इत्यनेन साक्षात्कार उक्तः तदात्मान इति देहाद्यात्माभिमानरूपविपरीतभावनानिवृत्तिफलकसाक्षात्कारहेतुर्निदिध्यासनपरिपाकः तन्निष्ठा इति कर्मत्यागपूर्वकः प्रमाणप्रमेयगतासम्भावनानिवृत्तिफलको ध्यानहेतुः श्रवणमननपरिपाकरूपो वेदान्तविचारः तत्परायणा इति तद्धेतुभूतो वैराग्यप्रकर्ष इति द्रष्टव्यम् । एवंभूता यतयो पुनरावृत्तिं पुनर्देहादिसम्बन्धरूपपुनरावृत्तिशून्यां मुक्तिं गच्छन्ति प्राप्नुवन्ति । ननु सकृन्मुक्तानामपि संसारकारणे पापादौ सति पुनर्देहसम्बन्धरूपावृत्तिः कुतो न स्यादिति चेत्त-

त्राह ज्ञानेन ब्रह्मात्मैक्यसाक्षात्कारेण निर्धूतं समूलं निवृत्तं पुनर्देहसम्बन्धकारणं कल्मषं पुण्यपापात्मकं कर्म येषां ते ज्ञाननिर्धूतकल्मषाः ज्ञानेनाज्ञाननिवृत्त्या तत्कार्यकर्मनाशे तन्मूलकपुनर्देहग्रहणं न संभवतीति भावः ॥ १७ ॥

देहपातानन्तरविदेहकैवल्यरूपं ज्ञानफलमुक्त्वा येषां ज्ञानेनात्माज्ञानं नष्टं ते पंडिताः कथं तत्त्वं पश्यन्तीत्याकांक्षायां प्रारब्धकर्मवशाद्देहसद्भावे जीवन्मुक्तिरूपज्ञानफलं सूचयंस्तत्प्रकारमाह—

विद्याविनयसंपन्ने ब्राह्मणे गवि हस्तिनि ।
शुनि चैव श्वपाके च पंडिताः समदर्शिनः ॥ १८ ॥

विद्येति । पंडिताः ज्ञानिनः विद्या वेदार्थज्ञानं ब्रह्मज्ञानं वा विनयोऽनौद्धत्यमुपशमो निरहंकारत्वं वा तत्र दैन्यवारणाय विद्यापदमौद्धत्यवारणाय विनयपदं ताभ्यां संपन्ने संयुक्ते ब्रह्मविदि विनीते च ब्राह्मणे सात्त्विके सर्वोत्तमे गवि संस्कारहीनायां राजस्यां मध्यमायां हस्तिनि शुनि श्वपाके चात्यन्ततामसे सर्वाधमे वापि समं सत्त्वादिगुणैस्तज्जैश्च संस्कारैरस्पृष्टमेव ब्रह्म द्रष्टुं शीलं येषां ते समदर्शिनः यथा गंगाजले तडागे सुरायां मूत्रे वा प्रतिबिम्बितस्यादित्यस्य न तद्गुणदोषसंसर्गस्तथा ब्रह्मणोऽपि चिदाभासद्वारोपाधौ प्रतिबिम्बितस्य न तद्गतगुणदोषसंसर्ग इति प्रतिसन्धानशीलाः सर्वत्र समदृष्ट्यैवं रागद्वेषादिराहित्येन परमानन्दभानेन जीवन्मुक्तिमनुभवन्तीत्यर्थः ॥

अन्ये तु ब्रह्मविद्यतीनां सर्वदा कर्तव्यत्वेन यद्विहितं कल्पितनामरूपाद्यग्रहणेन सर्वत्र ब्रह्मदर्शनं तद्विशदयति विद्याविनयसंपन्ने विद्या सर्ववेदशास्त्राधीतिस्तदर्थज्ञानं वा विनयो नम्रता रूपशान्तिर्वा ताभ्यामन्यैश्च स्वधर्मपरत्वप्रतिग्रहविमुखत्वसत्यशौचदयादिभिः सुगुणैः संपन्ने जगत्पूज्ये ब्राह्मणे जात्या गुणेन धर्मेण च परमनिकृष्टे स्वप्राणवृत्त्यै श्वानमपि पचतीति वा श्वो भवितव्यमिति पचतीति वा श्वपाकश्चंडालस्तस्मिन्नपि जात्या संचारेण क्षीरादिना च जगत्पावन्यां गवि धेनौ जात्यादिभिरतिनिकृष्टे तुच्छभुजि शुनि श्वनके राजपूज्ये हस्तिनि भद्रगजे चकाराल्लोष्टाश्मकांचनादिषु सर्वत्र तत्तद्द्रव्यतत्तद्गुणतत्तद्धर्मतत्तत्कर्मभिरस्पृश्यमानं सर्वदाकाशवदेकरूपेण समरसतया तिष्ठतीति समं परं ब्रह्म तदेव सर्वत्र द्रष्टुं शीलं येषां ते समदर्शिनः आरोपितनामरूपाद्यगृहीत्वैव सर्वत्राधिष्ठानभूतब्रह्ममात्रदर्शन-

पराः पण्डिताः इत्यर्थः । परावरैकत्वविज्ञानपौष्कल्यवन्तः पण्डिताः सदा समदर्शिन एव भवन्ति न क्वचिद्विषयदर्शिन इति समदर्शित्वं पण्डितानां धर्म इति सूचितं भवतीत्यर्थ इत्याहुः ॥ १८ ॥

सदा सर्वत्र ब्रह्मैव पश्यन्तः सन्तो ये तु तदात्मना तिष्ठन्ति तेषामेव विदेहमुक्तिर्नेतरेषामिति सूचयितुं ब्रह्मनिष्ठानां यतीनां जीवद्दशायामेव मुक्तिं दर्शयति—

इहैव तैर्जितः सर्गो येषां साम्ये स्थितं मनः ।
निर्दोषं हि समं ब्रह्म तस्माद्ब्रह्मणि ते स्थिताः ॥१९॥

इहैवेति । परावरैकत्वविज्ञानवतां तद्बुद्धित्वाद्यन्तरङ्गसाधनवतां सर्वकर्मसंन्यासिनां येषां ब्रह्मविदां मनः सर्वदा साम्ये सममेव साम्यं स्वार्थे ष्यञ्प्रत्ययः तस्मिन्साम्ये समरसे परे ब्रह्मण्येव स्थितं नैश्चल्येन तिष्ठति ये तु सर्वत्र ब्रह्मैव पश्यन्ति तदात्मतामेवापद्यन्ते तत्रैव निष्ठां कुर्वन्ति तदात्मतापन्नवृत्त्या कालं नयन्ति तैरेवंलक्षणैर्ब्रह्मविद्भिरिहैव जीवद्दशायामेव सर्गो जन्म भविष्यद्देहसम्बन्धो जितः परिहृत इत्यर्थः । अविद्याकामकर्माणि खलु शरीरारम्भकानि अद्वितीये ब्रह्मणि जगद्बुद्धिसम्पादिका देहादावहं मम बुद्धिसम्पादिका वासनाऽविद्या तन्मूलकाः कामास्तत्कार्याणि कर्माणि तेषामविद्याकामकर्मणां निरन्तरब्रह्मनिष्ठया निःशेषविनाशे सति कारणनाशात्कार्यनाश इति न्यायेन तत्कार्यभूतभाविदेहसम्बन्धनाशोपि सिध्यत्यत एवोच्यते इहैव तैर्जितः सर्ग इति । ननु ब्रह्मविदां क्वचिदपि बाह्यालम्बनं विना सर्वदा ब्रह्मण्येव ब्रह्मात्मनावस्थानं कथमुपपद्यत इत्याकांक्षायां न तेषां मनसो निर्मूलत्वात् ब्रह्मसुखानुभूतिरसिकत्वात्तादृग्ब्रह्मनिष्ठासंपादितपुण्यसंपत्तेश्च सदानन्दैकरसे ब्रह्माणि स्थितिः सम्भवतीति सूचयितुं ब्रह्मण आनन्दरूपत्वं प्रतिपादयति निर्दोषं हीति । हि यस्मात्कारणाद्ब्रह्म निर्दोषं दोषशब्देनात्र तत्कार्यं दुःखं लक्ष्यते निर्दोषं निर्दुःखं दुःखलेशशून्यमानन्दरूपमित्यर्थः । आनन्दो ब्रह्म विज्ञानमानन्दं ब्रह्म स्वप्रकाशमानन्दघनमिति श्रुतेः । ननु ब्रह्मणः स्वत आनन्दरूपत्वेप्यनृतजडदुःखात्मकप्रपञ्चसम्बन्धसम्भवात्क्वचिद्दुःखलेशसम्बन्धः सम्भवेदित्याशङ्कायां न मायामात्रमिदं द्वैतम् असत्वादन्यस्य न ह्यस्ति द्वैतसिद्धिरात्मैव सिद्धोऽद्वितीय एकमेवाद्वितीयम् अद्वयो ह्ययमात्मैकल एवेत्यादिश्रुतिभिर्जगतः स्वरूपासत्त्वं ब्रह्मणोऽद्वितीयत्वं च नियमेन प्रतिपाद्य

इति कश्यपवशिष्ठवचनाभ्यां लङ्कासूर्योदयकालस्य वस्तुभूतस्यैव वारप्रवृत्तिरूपत्वात् । न चानयोः सर्वेषां मते लङ्कायां सूर्योदयो लङ्कायां वारप्रवृत्तिकालस्तेन स्वसूर्योदयः स्वदेशे वारप्रवृत्तिकालः । "वारः स्वदेशार्कोदयादितः"—इति लघुवसिष्ठोक्तेरित्यर्थे इति वाच्यम् ।

"वारप्रवृत्तिविज्ञानं सर्ववारार्थमेव हि ।
अखिलेष्वन्यकार्येषु दिनादिरुदयो भवेत्" ॥

इति वसिष्ठसंहितावचनोक्तविषयव्यवस्थाऽनुपपत्तेः । भास्करोदयो वारप्रवृत्तिरित्यनेन स्वसूर्योदयः स्ववारप्रवृत्तिरित्यर्थलाभाल्लङ्कायामित्यस्य व्यर्थतापत्तेश्च । तस्माल्लङ्कायां यः स काल एव वारप्रवृत्तिः सर्वेषां लोकानां भवतीति तदर्थो युक्तः । अत एव लघुवसिष्ठसिद्धान्ते-

"... ... ... दिग्भागगाः ।
लङ्कायां यमकोट्यां च सिद्धपुर्यां च रोमके ॥
अर्धरात्रोदयौ तद्वद्दिनार्धास्तमयौ तथा" ।

इति ग्रहोपजीव्यत्वेनाहर्गणसाधनोत्तरं सूर्यसिद्धान्तानुसारेण सोमसिद्धान्तरुदुक्त्या "स्वदेशार्कोदयादितः"—इत्यस्याग्रे स्पष्टगत्यध्याये

"देशान्तरचरप्राणैः स्वदेशार्कोदयः स्फुटः" ।

इति वारप्रवृत्तिरूपं विवरणमुक्तम् । अन्यथा वृद्धवसिष्ठसिद्धान्ते देशान्तरचरसंस्कारपलैः स्वदेशे लङ्कासूर्योदयकालस्य वारप्रवृत्तिरूपस्य साधनं व्यर्थं स्यात् । यत् तु लङ्कारसूर्योदयादेव चारवारादिप्रवृत्तेस्तत्सूर्योदयकालादेव वारप्रवृत्तिरित्येव युक्तम् । कश्यपवचनस्य सर्वेषां मतेन लङ्कायां यः सूर्योदयः स कालो वारप्रवृत्तिर्देशास्यानुद्दिष्टत्वात् सर्वेषां तदैव वारप्रवृत्तिरित्यर्थाच्च । एवं चोदयकाले वारप्रवृत्तिव्याख्यानि लङ्कोदयाभिप्रायिकाणि मध्याह्ने यानि यमकोट्यभिप्रायेणास्ते यानि तानि सिद्धपुराभिप्रायेणार्धरात्रे तानि रोमकाभिप्रायेणोदये । लङ्कोदयकाले हि यमकोटिसिद्धपुररोमकेषु क्रमेण मध्याह्ना-

स्तमनार्धरात्राः संभवन्ति । पूर्वापरसूत्रवृत्ते परिधिचतुर्थांशान्तरेण स्थितत्वात् ।

अत एव शाकल्यसंहितायाम् ।

"यमकोटी च लङ्का च रोमकं सिद्धपूर्यपि" ।

इति प्रथममुक्त्वाऽपे—

"मध्योदयार्धरात्र्यस्तकाले वारः प्रजायते" ।

इत्युक्तम् । सूर्यसिद्धान्तोक्तस्यापि लङ्कासूर्योदयकाले वारप्रवृत्तिरित्यर्थसिद्धिः ।

तथाहि—"तत् ततः स्वीयार्धरात्रस्य मिश्रसंज्ञस्य"-परामर्शादर्धरात्रादये संबन्धः । तपार्धशब्देन निरक्षदेशीयार्धरात्रमानं पञ्चदशघटिकात्मकम् । तथा च रेखातः पूर्वदेशे देशान्तरघटीभिर्युक्ते पञ्चदशघट्यात्मके पश्चिमदेशे हीने । तस्मात् स्वीयार्धरात्रसंज्ञमिश्रकालादये वारप्रवृत्तिः । एवं च स्वीयार्धरात्रपञ्चदशघटिकायोगो देशान्तरसंस्कृतः कार्य इति सिद्धमतो न विशेषः । एवं सोमसिद्धान्तोक्तस्याप्यर्धरात्रिको रोमकदेशीयार्धरात्रिको लङ्कासूर्योदय इत्यर्थाल्लङ्कायां वारप्रवृत्तिः । सिद्धपुरे यमकोटिमध्याह्ने यमकोट्यां लङ्कासूर्योदये रोमके सिद्धपुर्यस्तकाले । न च रोमकोक्तवचनस्यैतादृशार्थोऽपि चरसंस्कारानुक्तत्वेनासंगतमिति वाच्यं विषुवद्दिनविषयत्वात् । तस्माल्लङ्कासूर्योदयकाले वारप्रवृत्तिरिति निर्विवादमिति । तत्र लङ्कार्धरात्र एव वारवारादिप्रवृत्तिस्तत्रैव वारप्रवृत्तिर्युक्ता । तेन सूर्यसिद्धान्तोक्तयथाश्रुतार्थस्य साधुत्वात् । सोमसिद्धान्तोक्तं यथाश्रुतं युक्तम् । कश्यपवसिष्ठशाकल्यवचनेन लङ्कासूर्योदयबोधकानां यथासंभवमर्थो भवेदुक्तरीत्या ज्ञेयस्तेन लङ्कार्धरात्रकालस्यैव वारप्रवृत्तित्वमिति विपरीतस्यापि सुवचत्वात् । स कालः स्वदेशे साध्यः । तत्र स्वनिरक्षदेशे प्रथमं तज्ज्ञानम् । चन्द्रग्रहणोक्तदिशाऽऽनीतस्वदेशस्वरेखार्कोदयान्तररूपदेशान्तरफलेनाहर्गणोत्पन्नग्रहाणां संस्कारात्.

पि स्वनिरक्षदेशे संभवाद्देशान्तरघटीतुल्यमेव लङ्कास्वनिरक्षदेशार्कोदययो-रन्तरम्। तत्र लङ्कातः प्राच्यां स्वनिरक्षदेशे लङ्काक्षितिजात् पूर्वभागे स्वक्षितिजमधः पश्चिमभागे उपरि ध्रुवद्वये लङ्कास्वनिरक्षदेशक्षितिजयोस्तुल्यवृत्तयोः संयोगात्। अतः प्राच्यां स्वनिरक्षदेशे तत्सूर्योदयाद्देशान्तरघटीभिरग्रिमकाले लङ्कासूर्योदयः। एवं पश्चिमदेशे लङ्काक्षितिजात् पूर्वभागे स्वनिरक्षक्षितिजमूर्ध्वं पश्चिमभागे त्वध इति स्वनिरक्षदेशसूर्योदया-द्देशान्तरघटीभिः पूर्वकाले लङ्कासूर्योदयः। अथ स्वदेशे स्वनिरक्षदेशक्षितिजादुन्मण्डलाख्यात् स्वक्षितिजमुत्तरगोले त्वधः दक्षिणगोले तूर्ध्वम्। अतस्तदवधीभूतस्वनिरक्षदेशार्कोदय उक्तः। दक्षिणगोलयोः स्वार्कोदया-दूर्ध्वमधश्च क्रमेणेत्युपपन्नमर्कोदयादित्यादि यथोक्तम्। तथा च स्वदेशे पूर्वभागे उत्तरगोले स्वसूर्योदयाद्देशान्तरचरयोगघटीभिरूर्ध्वं लङ्कासूर्योदयो दक्षिणगोले तदन्तरघटीभिर्देशान्तरचरशेषवशादूर्ध्वमधः। पश्चिमभागे उत्तरगोलेऽन्तरघटीभिर्देशान्तरचरशेषवशादध ऊर्ध्वं पश्चिमदेशे दक्षिणगोले देशान्तरचरयोगघटीभिः पूर्वकाले लङ्कासूर्योदय इत्युपपन्नम्। अत एव।

"उत्तरदक्षिणचरदलहीनयुता नाडिका रवेरुदयात्।
प्राक्पश्चाद्देशान्तरयोजनखाष्टांशकेनापि" ॥

इति सप्तर्षिसंहितायां युक्तमुक्तम्।

एतेन।

"वारप्रवृत्तिं मुनयो वदन्ति सूर्योदयाद्रावणराजधान्याम्।
ऊर्ध्वं तथाऽधोऽप्यपरे च तस्माच्चरार्धदेशान्तरनाडिकाभिः ॥
चरार्धदेशान्तरयोर्वियोगयोगात् समानीय फलैश्च सम्यक्।
सूर्योदयादूर्ध्वमृणे धनेऽधो वारप्रवृत्तिं मुनयो वदन्ति ॥"

इति श्रीपत्युक्तं श्लोकद्वयं व्याख्यातम्।

अत एव च

"चरार्धदेशान्तरयुग्वियोगौ क्रमेण याम्योत्तरगोलगेऽर्के।

योगे पुरा स्वस्युदयाद्वियोगे पश्चात् प्रवृत्तिर्दिनवारकर्त्तुः" ॥

इति विवाहवृन्दावने केशवार्कोक्तस्यायं मदुक्तोऽर्थः । तथा हि, अत्र चरपुरस्कारेणैव संस्कारदर्शनाद्देशान्तरं रेखातः पूर्वभागे ऋणं पश्चिमभागे धनमिति स्थिरत्वात् स्वतः सिद्धं ग्राह्यम् । वारप्रवृत्त्यर्थं ग्रहसंस्कारवत् तयोः संस्कारस्य युक्तिसिद्धत्वेन प्राच्यामृणं पश्चिमतो धनमित्युक्तत्वात् । ततो याम्योत्तरगोलगेऽर्के क्रमेण चरार्धदेशान्तरयुतिवियोगौ कार्यौ । अर्धस्यांशपरत्वाच्चरमेव न तु चरस्यार्धमर्थः । तेन देशान्तरस्य युतिवियोगौ । चरेण देशान्तरं युतं हीनं गोलक्रमेण कार्यमित्यर्थः । अतो रेखातः पूर्वभागे दक्षिणगोले देशान्तरस्य चरयोगे "धनर्णयोरन्तरमेव योगः"-इति रीत्या देशान्तरचरान्तरमेव निष्पन्नम् । चरदेशान्तरं तु शेषवशाद्धनमृणम् । पश्चिमभागे देशान्तरस्य धनस्य चरयोगे "योगे युतिः स्यात् क्षययोः स्वयोर्वा"—इति तद्योगो धनम् । उत्तरगोले पूर्वभागे च देशान्तरस्यर्णस्य चरवियोगे ।

"संशोध्यमानं स्वमृणत्वमेति स्वत्वं क्षयस्तद्युतिरुक्तवच्च" ।

इत्युक्तेन चरस्य संशोध्यमानत्वाद्देशान्तरचरयोग ऋणम् । पश्चिमभागे तु देशान्तरस्य धनस्य चरोने क्रियमाणे उक्तरीत्या देशान्तरचरान्तरं देशान्तरचरशेषवशाद्धनमृणमिति सिद्धम् । ततो वारप्रवृत्तिज्ञानं सुलभमित्याह योग इत्यादि । योगे धनशेषस्यार्कोदयात् पूर्वं वियोगे ऋणसंस्कारे पश्चात् अयिमकाले । दिनवारकर्त्तुर्वारस्य प्रवृत्तिरादिर्भवतीत्यर्थः । ननु यथाश्रुतोऽर्थो मुनिभिरनुक्तत्वेन सदाऽमुकदेशार्कोदयो वारप्रवृत्तिकाल इत्याद्यनियमात् ? न च । पश्चिमभागे देशान्तरस्य धनत्वेन दक्षिणगोले तद्योगस्योत्तरगोले तदन्तरस्य युक्तत्वेन रेखातः पश्चिमाभिप्रायेणोक्तमिति यथाश्रुतेऽर्थे न क्षतिरिति वाच्यम् । उत्तरगोले देशान्तरादूने चरे उक्तरीत्या तदन्तरेण स्वसूर्योदयात् पूर्वं वारप्रवृत्तिरिति युक्तिसिद्धार्थस्य वियोगे पश्चादित्यनेनासिद्धेरित्यलं पल्लवितेन ॥६॥

इदानीं ग्रहाणां बीजकर्माह ।

खाभ्रखार्कैर्हृताः कल्पयाताः समाः
शेषकं भागहारात् पृथक् पातयेत् ।
यत् तयोरल्पकं तद्द्विशत्या भजे-
ल्लिप्तिकाद्यं फलं तत् त्रिभिः सायकैः ॥ ७ ॥
पञ्चभिः पञ्चभूभिः कराभ्यां हतं
भानुचन्द्रेज्यशुक्रेन्दुतुङ्गेष्वृणम् ।
इन्दुना दस्रबाणैः कराभ्यां कृतै-
र्भौमसौम्येन्दुपातार्किषु स्वं क्रमात् ॥ ८ ॥

वा.भा.—स्पष्टम् ।

अत्रोपलब्धिरेव वासना । यद्वर्षसहस्रषट्कं यावदुपचयस्ततोऽपचय इत्यत्रागम एव प्रमाणं नान्यत् कारणं वक्तुं शक्यत इत्यर्थः ॥ ७–८ ॥

मरीचिः—ननु चन्द्रग्रहणाज्ज्ञातयोजनानि स्वरेखास्वदेशमध्यस्थगणितयोजनेभ्यो विशदानीत्ययुक्तं चन्द्रग्रहणाद्देशान्तरफलज्ञानमतो बीजसंस्कारकथनव्याजेन स्रग्विणीभ्यामुत्तरमाह । खाभ्रखार्केरिति स्पष्टार्थम् । तथा च ग्रहाणामेतत्संस्कारस्यावश्यकत्वात् तदन्तर्गतं चन्द्रग्रहणहेतुभूतसूर्यचन्द्रोच्चपातानामेतदसंस्कारेण स्वतः सिद्धो योजनविसंवाद इत्येतत्संस्कृतानीतेभ्य उक्तप्रकारेणानीतयोजनानामन्तर्गणितयोजनतुल्यत्वमेव भवतीति भावः ।

अत्रोपपत्तिः । परम्परागतगुरुसंप्रदायानुमितागम एव । स यथा । अतीन्द्रियदृग्भिर्मुनिभिः कल्पादितः षट्सहस्रवर्षे क्रमेणोपचितमन्तरमेतद्गणानीतग्रहाणामाकाशस्थग्रहासंवादेन परमं दृष्टम् । एतद्गणितानीतग्रहाणामाकाशे संवादार्थं सूर्यचन्द्रगुरुशुक्रशीघ्रोच्चचन्द्रोच्चेषु ऋणम् । मङ्गलबुधशनिराहुषु धनमिति च दृष्टम् । तत्र सूर्यस्य नवतिकलाः ९०, चन्द्रस्य पञ्चाशदधिकशतम् १५०, भौमस्य त्रिंशत् ३०, बुधशीघ्रोच्चस्य

षष्टियुतसार्धसहस्रम् १५६०, गुरोः सार्धशतम् १५०, शुक्रशीघ्रोच्चस्य सार्धचतुःशतम् ४५०, शनेर्विंशत्यधिकं शतम् १२०, चन्द्रोच्चस्य षष्टिः ६०, चन्द्रपातस्य षष्टिः ६० । ततः षट्सहस्रवर्षैः क्रमेणापचितेनान्तराभावश्च । एवं पुनः पुनरिति द्वादशसहस्रवर्षेषु क्रमेणोपचितमन्तरमपचितान्तराभावश्चेत्युभयं दृष्टम् । अत इष्टकाले कल्पगवर्षाणि अव्यवहितपूर्वान्तराभाववत् तत्कालाद्गतवर्षज्ञानार्थं द्वादशसहस्रतष्टानि । शेषं यदि षट्सहस्राच्चूनं तदाऽन्तरोपचयकालत एव फलानयनम् । यदि तदधिकं तदाऽन्तरापचयकालादिष्टकालाग्रिमान्तराभावकालयोरन्तःस्थवर्षाणि फलानयनार्थं ग्राह्याणि । अत उक्तं यत् तयोरल्पकमिति । षट्सहस्रवर्षैः परमान्तरं तदाऽल्पवर्षैः किमिति गुणहरौ त्रिशदपवर्तितौ । हरस्थाने शतद्वयं गुणस्थाने उक्ताङ्का इत्युपपन्नम् । एतस्य युक्त्यसंभवदोषादिकं नाशङ्कनीयं पारम्पर्यागतत्वात् । अत एव सिद्धान्तशेखरे—

"ब्रह्मवासरगताब्दसंचयात् पूर्णखाभ्ररविभिर्विभाजितात् ।
शेषके हरविशोधितेऽल्पके यत् तयोः खखयमैर्विभाजिते ॥
लब्धरामममशरघातलिप्तिकाः सूर्यशीतकरयोः परित्यजेत् ।
चन्द्रवत् सुरगुरोर्विधूच्चतः शुक्रतो द्वितिथिताडितस्तथा ॥
चन्द्रपातकुजमन्दगामिनां द्वीन्दुवेदगुणितं क्रमाद्धनम् ।
ज्ञस्य च द्विशरसंगुणं जगुः कर्म दृग्गणितसाम्यकारकम्" ३ ॥

इत्यस्य ।

"युगानां परिवर्त्तेन कालभेदोऽत्र केवलः" ।

इति सूर्यसिद्धान्तादिवचनैः स्वकाले यत्संस्कारेण गणितागतग्रह आकाशे प्रमाणीभूतो भवति तद्बीजमित्यभ्युपगमाद्बीजत्वम् । देशान्तरघट्यानयने ग्रहसंज्ञादे हेतुत्वाच्च । अत एव बीजं स्वस्वकालेऽनियतस्थितिकं भिन्नमेवेत्युक्तप्रायमित्यलम् ॥ ८ ॥

अथाधिकारोपसंहारे श्लोकद्वयं युक्तियुक्तमाह ।

यद्ग्राम्यैरपि विस्तृतं बहुतरैस्तन्त्रं प्रकारान्तरै-
र्मन्दानन्दकरं तदत्र निपुणैः प्राज्ञैरवज्ञायते ।
आख्याते पृथुता सगोलगणिते व्यर्था हि तस्मान्मया
संक्षिप्तं न च विस्तृतं विरचितं रञ्ज्यो हि सर्वो जनः ॥९॥
रूपस्थानविभागतो दृढगुणच्छिद्भ्यां च संचारतो
नानाच्छेदविभेदभिन्नगुणकैर्नानाप्रकारेष्वपि ।
आद्याद्यत्र विचित्रभङ्गिभिरभिप्रेतप्रसिद्धौ क्रिया
लघ्वी वाऽथ समा तदेव सुधिया कार्यं प्रकारान्तरम् ॥१०॥

वा.भा. स्पष्टार्थमिदं श्लोकद्वयम् ॥ ९–१० ॥

मरीचिः—नन्वत्राहर्गणग्रहानयनप्रकाराणां पूर्वग्रन्थोक्तप्रकारेभ्योऽल्पत्वादनुपादेयोऽयम् । पूर्वग्रन्था एव चोपादेया अधिकविषयज्ञानकर्तृत्वादतः सिंहावलोकनन्यायेन सर्वोपादेयत्वयुक्त्या शार्दूलविक्रीडितेनाह यद्ग्राम्यैरिति । ग्राम्यैरचतुरैः पूर्वाचार्यैर्वटेश्वरश्रीपतिलल्लादिभिः । अतिशयेन बहवो बहुतरास्तैः प्रकारान्तरैरिष्टज्ञानोपयोगिकर्मान्तरैः । यत् तन्त्रं शास्त्रं कृतं तन्मन्दानन्दकरं ज्योतिःशास्त्रविचारे कुण्ठितबुद्धीनां संतोषकरम् । अत्र जगति । अत्र हेतुमाह निपुणैरिति । चतुरैः प्राज्ञैः सुबुद्धिभिः । अवज्ञायते तिरस्क्रियते । अत्रापि हेतुमाह आख्याते इति । हि यतः सगोलगणिते गोलस्वरूपनिरूपणयुतगणितनिरूपणग्रन्थे आख्याते कथिते पृथुता प्रकारान्तरैः शास्त्रविस्तृतता व्यर्था निष्प्रयोजका । गोलज्ञाने स्वरूपज्ञानद्वारा सकलतद्विषयस्य स्वतो ज्ञेयत्वात् । तथा च पूर्वग्रन्था एव प्राज्ञानामनुपादेया इति भावः । ननु बहुप्रकारान्तराभावेनायं मन्दानुपादेयोऽपि किञ्चित्प्रकारान्तरसत्त्वेन प्राज्ञानुपादेयश्चात आह तस्मादिति । यस्मात् मन्दसुबुद्ध्योः क्रमेण संक्षिप्तविस्तृतग्रन्थयोरनादरस्तस्मादित्यर्थः । मया भास्कराचार्येण चतुरेण । एतत् तन्त्रं संक्षिप्तं प्रकारान्तराभाववत्

ग्विरचितं कृतं न विस्तृतम् । बहुप्रकारान्तरयुक्तमपि न कृतम् । तथा चोभयोरप्यनुपादेयः । मिश्ररीत्यैकपद्यात्मकादिति भावः । ननु मन्दोपादेयपूर्वग्रन्थानां सत्त्वात् । प्रकारान्तराभावयुते रूपसंक्षिप्तमेव कुतो न कृतमिदम् । प्राज्ञानन्दकरत्वान्यथोक्तप्रकारान्तरे प्राज्ञानां नासिकासंकोचोत्पत्त्यापत्तेरत आह रञ्ज्य इति । हि यतः सर्वो मन्दसुबुद्धिसाधारणो जनः पिपठिषू रञ्ज्योऽनुरञ्जनीयः । ग्रन्थेऽनुरक्तः कार्य इत्यर्थः । तथा च प्राज्ञानां प्रकारान्तरे स्पष्टार्थद्योतकत्वज्ञानं स्यात् । पूर्वग्रन्थेऽपि यावत्प्रकारान्तराभावात् तदीयान्यप्रकारान्तरज्ञानं मन्दानां तथाऽत्रापि स्वल्पप्रकारान्तरैरप्यधिकप्रकारान्तरज्ञाने तेषां बुद्धिर्भवतीति भावः ॥९॥

ननु पूर्वग्रन्थेष्वनेकप्रकारान्तराणां सत्त्वात् कथं तदन्तर्गताः स्वल्पा अप्युक्तप्रकारा गृहीतास्तदन्ये च न गृहीता इत्यतः प्रकारान्तरकरणोपदेशव्याजेनोत्तरं शार्दूलविक्रीडितेनाह रूपस्थानविभागत इति । रूपगुणनं रूपविभागगुणनं स्थानविभागगुणनम् । एकशेषः । द्वन्द्वे एकत्वम् । एभ्यो लीलावत्युक्तेभ्यः ।

"गुण्यान्त्यमङ्कं गुणकेन हन्यादुत्सारितेनैवमुपान्तिमादीन् ।
गुण्यस्त्वधोऽधो गुणखण्डतुल्यस्तैः खण्डकैः संगुणितो युतो वा ॥
भक्तो गुणः शुद्ध्यति येन तेन लब्ध्या च गुण्यो गुणितः फलं वा ।
द्विधा भवेद्रूपविभाग एवं स्थानैः पृथग्वा गुणितः समेतः" ॥

इत्यनेन । दृढगुणाच्छेदाभ्याम् ।

"परस्परं भाजितयोर्ययोर्यः शेषस्तयोः स्यादपवर्तनं सः ।
तेनापवर्त्तेन विभाजितौ यौ तौ भाज्यहारौ दृढसंज्ञकौ स्तः" ॥

इत्युक्तरीत्याऽपवर्तितगुणहाराभ्यां संचारतो गुणसंचाराद्धरसंचाराच्च । अस्मिन् गुणे हरे वा क्रमेणायं गुणो हरो वा लभ्यते तदा कल्पिते हरे गुणे वा को गुणो हरो वेति संचारजगुणहराभ्यामित्यर्थः ।

"इष्टोनयुक्तेन गुणेन निघ्नोऽभीष्टघ्नगुण्यान्वितवर्जितो वा" ।

इतीष्टसंवारादित्यन्ये । नाना अनेके ये छेदविभेदाः । भिन्नगुणकैरनेकगुणकभेदैश्च "समेन केनाप्यपवर्त्य हारभाज्यौ भजेद्वा" इति ।
"छेदं लवं च परिवर्त्य हरस्य शेषः कार्योऽथ भागहरणे गुणनाविधिश्च" ।
"अंशाहतिश्छेदवधेन भक्ता लब्धं विभिन्ने गुणने फलं स्यात्" ।

इत्युक्तभेदैर्नानाप्रकारेषु कल्पितेषु अपिशब्दादाद्योक्तप्रकारेषु च । यत्र प्रकारे आद्यात् प्राचीनोक्तप्रकारात् । विचित्ररचनाभिर्बुद्धिजनिताभिरभिमतप्रसिद्धौ अहर्गणादिपदार्थज्ञाननिमित्तम् । क्रिया गणितेतिकर्त्तव्यता लघ्वी लघुभूता । गौणमाह वेति । अथ वा प्रकारान्तरेण समा तुल्या क्रिया भवति तत् तादृशं प्रकारान्तरमभीष्टज्ञानोपजीव्योपायान्तरम् । एवकार आद्योक्तप्रकाराधिकगौरवप्रकारान्तरव्यवच्छेदार्थः । स्वयमन्ये कार्यं निबन्धनीयम् । सुधियेति हेतुगर्भम् । यथा यथा लघुभूतप्रकारज्ञानं भवति तथा विचार्यमित्यर्थः । अल्पप्रयासेन कार्यसिद्धेर्महदुत्कर्षद्योतकत्वात् । तथा चाद्योक्तप्रकारेषु लघुभूताः प्रकारा अङ्गीकृताः कल्पिता अपि तल्लघुभूता उक्ता इति भावः । अत एव जगद्गुरुविष्णुदैवज्ञोक्तिः ।

'यद्यत् क्रियालाघवमत्र तन्त्रे तत्तद्गुरुत्वाय भवेत् कृतीनाम् ।
क्रियागुरुत्वाच्चितरां लघुत्वमहो विचित्रा गणितप्रसक्तिः"—इति॥१०॥

वा. भा.—इति श्रीभास्कराचार्यविरचिते सिद्धान्तशिरोमणिवासनाभाष्ये मिताक्षरे मध्यगतिसाधनाधिकारः प्रथमः ॥ १ ॥

मरीचिः—अग्रिमग्रन्थासंगतत्वं फक्किकया परिहरति इति श्रीभास्करीये सिद्धान्तशिरोमणौ मध्यमाधिकार इति । श्रीमद्भास्कराचार्यकृते सिद्धान्तशिरोमणिनाम्नि ग्रन्थे मध्यममानेनाधिकृतं गणितं ग्रहाणां संपूर्णं जातमित्यर्थः । तथा चाग्रिमग्रन्थस्य मिश्राग्रप्रपत्वेन सङ्गतमेवेति भावः ।

दैवज्ञवर्यगणसन्ततसेव्यपार्श्वे—
श्रीरङ्गनाथगणकात्मजनिर्मितेऽस्मिन् ।

मध्यः शिरोमणिमरीच्यभिधे समाप्तिं
यातोऽधिकार इति खेचरनिर्णयोऽयम् ॥

इति श्रीसकलगणकसार्वभौमश्रीबल्लालदैवज्ञसूनुरङ्गनाथगणकात्मजमुनीश्वरापरनामकविश्वरूपनिर्मितसिद्धान्तशिरोमणिमरीचौ मध्यमाधिकारः संपूर्णः ।

महामण्डल शास्त्रप्रकाशक समिति यन्त्रेऽम्बिकाचरण
चक्रवर्तिना मुद्रितम् ।

लघुभूमिका ।

जानन्ति जगति ज्यौतिषसिद्धान्तज्ञाः श्रीमतां भास्कराचार्याणां सिद्धान्तशिरोमणिं वासनाभाष्यसहितं भव्यविविधनव्योपपत्तिसंकलितम् । किन्तु सम्प्रतिपाश्चात्यगणितलाघवमाकलय्य तद्वासनारसा अपि तद्भास्करविकसितसाहित्यकमलसौरभाः प्रायो बहवो विधुरा एव ज्यौतिषिकमिलिन्दा भ्रमन्तीत्यवगम्यते प्राप्तकरुणावरुणालयश्रीइमद्गुरुलब्धज्ञानकणिकेन तदाज्ञयाऽवलोकितवासनावार्त्तिकमरीचिकेन मयाऽपीति ।

वस्तुतो मुनीश्वरमरीचिरेव सिद्धान्तशिरोमणेर्मणित्वमावहतीति केस्तदभिज्ञैर्न स्वीक्रियेत । अपि च भास्कराचार्यानन्तरं न्यायसाहित्यकलाकुशलो ज्योतिर्विन्मुनीश्वर एवैतादृशो यद्बुद्धिप्रकर्षमसहमानः कमलाकरभट्टस्तदवलिप्तस्वजनको ज्यौतिषसिद्धान्ततत्त्वविवेकं सिद्धान्तशिरोमणेः सद्विषयस्याप्यलं खण्डनेन खण्डनरूपं विधायोपस्थापयामास । येनामुद्रितत्वादनवगतेऽपि तन्मरीचौ तथा सिद्धान्तसार्वभौमनामके स्वतन्त्रग्रन्थे भास्करमुनीश्वरपाण्डित्यमुज्जृम्भत एव ।

सिद्धान्ते आर्यभट-लल्ल-वराहमिहिर-ब्रह्मगुप्त-श्रीधर-पद्मनाभकेशवादीनामाचार्याणां बहूनां ग्रन्थाः सन्त्यमुद्रिता दुर्लभाः कतिचन मुद्रिताः सुलभा अपि भास्करपुण्यपताकायितः सिद्धान्तशिरोमणिरेव शिरोमणिरिव राजते तेषु ।

सर्वप्रथमं कलिकातायां पण्डितजीवानन्देन वासनाभाष्यसंवलितः स सिद्धान्तशिरोमणिः प्रकाशितोऽपि बहुत्र मरीचिचितान्येव भूयांसि प्राचीनप्रमाणवचनान्यवचित्य मध्येमध्ये पाश्चात्यगणितबलसंवलितान्यपि स्वरचितवृत्तानि संरच्य जगदादृतैर्महामहोपाध्यायैः पण्डितबापूदेवशास्त्रिभिः स मेडिकल्हाल्-नाम्नि यन्त्रालये मुद्रापितः । पुनस्तच्छिष्यैः

पण्डितचन्द्रदेवविनायकश्रीमहादेवभट्टैः स्वस्वटिप्पणीऽधिकः स मुद्रापितोऽपि मरीचिर्वञ्चितो निपुणार्थे सङ्कुचित इव विविच्य जगद्गुरुभिर्महामहोपाध्यायैः पण्डितसुधाकरद्विवेदिभिः काशीविद्यासुधानिधौ पण्डितपत्रापरपर्यायकेऽतिप्राचीने मासिकपत्रे नृसिंहकृतवासनावार्त्तिकेन सह प्रकाशनाय प्रेरितोऽहं तच्चरणशरणो यथाऽवसरं स्वटिप्पण्या च समलंकृत्य शोधयितुं प्रावर्त्तेयम् ।

तत्र वासनावार्त्तिकस्य शुद्धे ज्यौतिषाचार्यज्यौतिषतीर्थ-पं० श्रीबबुआजीमिश्रेण स्वान्तेवासिना लब्धे तथा मरीचेरपि मैथिलाक्षरलिखिते द्वित्रे पुस्तकेऽप्यशुद्धिप्राचुर्यमवलोक्य विरतमना अपि तच्चरणमेव स्मारंस्मारं जीवत्स्वेव पूज्यचरणेषु कतिचन पत्राणि मुद्रापयित्वा प्रकाशितवानपि यन्त्रालयस्याव्यवस्याऽऽलस्यवशादतिमन्दगतिश्चितं भारतसदृशं पुस्तकमेतदसकृदुज्झन्नपि तन्मां नात्यजत् । एवं कथं कथमपि सम्प्रतिग्रहगणितस्य मध्यमाधिकारपर्यन्तं संमुद्र्य प्रस्तुतमनन्तरं शीघ्रां गतिं प्राप्स्यतीति जगदीशं प्रार्थयन् स्वाल्पधीदोषाशुद्धिनर्त्तकीमखिलनिपुणजनाय संनर्त्य तत्सत्सूचनां लब्धुमाशासे ।

अतिविनीतो झोपाभिधो

मुरलीधरशर्मा ।